

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
मुहूर्तमार्तंड	–	ज्योतिष	सम्पूर्ण	–	3/12	152	संस्कृत	कागद	11	55		

M-2942

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथमुहूर्तमार्तंडप्रारंभः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ ॥अविघ्नमस्तु॥ मार्तंडोवतुवाचंनः पादैर्जाड्यतमोहरः॥ वृत्तबद्धतनुः सेव्योऽभीष्टदो विश्वलोचनः॥ अर्थद्वयवाची॥ तत्रप्रथ
मंसूर्यपक्षे॥ मार्तंडः श्रीसूर्यः नोस्माकंवाचंअवतुरक्षतु॥ किंलक्षणोमार्तंडः वृत्तबद्धतनुः वृत्तेमंडलेबद्धातनुर्यस्यतथा॥ तथाचस्मृतौ॥ सशंखचक्र
विमंडलेस्थितंकुशेशयकांतमनंतमच्युतमित्यादि श्रुतिरपि यएषएतस्मिन्मंडलेपुरुषःसोग्निरित्यादि॥पुनःकिंलक्षणः॥ पादैः किरणैः जाड्यतमोहरः
जाड्यंपातकंशीतंवातमोधकारंहरतीतितथा॥पुनःकिंलक्षणः सेव्यः सेवितुंयोग्यः॥सेव्यः॥ अभीष्टफलदातृत्वात् पुनःकिंलक्षणः अभीष्टदः सेवितः
सन्नभीष्टार्थदायीत्यर्थः पुनः कथंभूतः विश्वलोचनः विश्वंलोच्यतेअनेनेतिविश्वलोचनः लोकचक्षुर्महेश्वरइत्यादिस्तुदयेउक्तत्वात्॥ प्रकाशकत्वात्॥
अथग्रंथपक्षे॥ मार्तंडोमुहूर्तमार्तंडः नःवाचंअवतु॥ किंलक्ष० वृत्तबद्धतनुः वृत्तानिमहर्षीणिशार्दूलविक्रीडितानि॥ तैर्बद्धातनुर्यस्यतथा॥ पुनःकिं०पादै
र्जाड्यतमोहरः पादैर्वृत्तचरणैर्जाड्यंमूर्खत्वंतदेवतमःतद्धरतीतितथा॥पुनःकिं० सेव्यःनिरंतरंपठनीयइत्यर्थः॥ पुनःकिं० अभीष्टदः यथोक्तमुहूर्तव्यु
त्पत्तिकरणादभीष्टार्थसिद्धिकारीत्यर्थः॥ पुनःकिं० विश्वलोचनः समयप्रकाशकत्वात् १ कुर्वेमुहूर्तमार्तंडटीकांमार्तंडवल्लभां॥ इयमाकल्यमेतेनदिव्याहि
मास्यवेश्मसु २ इहशास्त्रेतावत्संबंधाभिधेयप्रयोजनान्युच्यंते॥ आब्रह्मादिविनिःसृतमिदंवेदांगमितिसंबंधः॥ उक्तंचनारदमुनिनास्वसंहितायां॥
वेदस्यनिर्मलंचक्षुर्ज्योतिःशास्त्रमनुत्तमं॥ अस्यशास्त्रस्यसंबंधोवेदांगमितिधातृतइति॥ अत्राप्युक्तं पूर्ववाक्यार्थमादाययंयोयंराज्ञतोलघुरिति॥ स्था
ज्यनक्षत्राद्यतुलग्नगोचरगर्भाधानादिसंस्कारविवाहाग्न्याधानवास्तुयात्राभिध्यानध्यायपल्लीग्रहगोचरसंक्रांतिकथनमभिधेयंतथाचनारदः अभिधेयंच
जगतःशुभाशुभनिरूपणमिति॥ अस्यप्रयोजनंमुहूर्तैर्नानाकार्यसाधनं॥ अस्यसम्यक्ज्ञानान्मोक्षावाप्तिरिति [illegible] रितान्युच्यते॥ नू
बंधाभिधेयप्रयोजनकथनात्शास्त्रेप्रवृत्तिर्जायते॥ उक्तंच॥ सिद्धिःश्रोतृप्रवृत्तीनांसंबंधकथन [illegible]

टी·

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्राभिधेयंस्यादितिपृष्टस्तुकेनचित् ॥ यदिनप्रोच्यतेतस्मैफलंशून्यंतुतद्भवेत् ॥ सर्वस्यैवहिशास्त्रस्यकर्मणोवापिकस्यचित् ॥ यावत्प्रयोजनंनोक्तंतावत्केन
नगृह्यतइति ॥ इहशास्त्रेकस्याधिकारइतिप्रोच्यते ॥ द्विजस्यैववेदांगत्वात् ॥ यतःषडंगोवेदोहिद्विजैरेवाध्ययनीयोज्ञातव्यश्च ॥ तथाचोक्तंभास्करीयसि
द्धांतशिरोमणौ ॥ तस्माद्द्विजैरध्ययनीयमेवपुण्यंरहस्यंपरमंपवित्रं ॥ योज्योतिषंवेत्तिनरःससम्यक्धर्मार्थमोक्षान्लभतेयशश्चेति ॥ शिष्टास्तावच्छास्त्रारं
भे ॥ सर्वारंभाहिदोषेणधूमेनाग्निरिवावृताइतिशास्त्रेणसर्वारंभेष्वंतरायप्राप्तौसत्यांधर्मेणपापमपनुदतीतिश्रुतिसिद्धंप्रयोजनमास्थाय ॥ स्वस्तिनइंद्रो
वृद्धश्रवाइतिश्रुतिलिंगाच्चग्रंथस्यनिष्प्रत्यूहपरिसमाप्तयेमंगलमाचरंति ॥ तस्मान्माध्यंदिनीयोब्राम्हणोनारायणोनारायणाच्चावाप्तसमस्तज्योतिःशास्त्र
संहितास्कंधश्चिकीर्षुरशेषप्रत्यूहोपशांतयेअभिमतदेवतानमस्कारलक्षणंमंगलपूर्वकंग्रंथकरणप्रतिज्ञांप्रहर्षिण्याह ॥ ७ ॥ ७ ॥ ७ ॥

सिंदूरोल्लसितमिभेंद्रवक्त्रमंबांश्रीविष्णुंवियतिचरान्गुरून्प्रणम्य ॥ बह्वर्थंविबुधमुदेलघुंमुहूर्तमार्तंडंसुगममहंतनोमिसिद्ध्यै १

सिंदूरोल्लसितमिति ॥ सिंदूरेणउल्लसितंशोभायमानंइभेंद्रवक्त्रंगजाननंअंबांश्रीविष्णुंसरस्वतींप्रसिद्धंवियतिचरान्ग्रहान्गुरून्निजगुरून्शास्त्रोपदेष्टृन्प्र
णम्यनमस्कृत्वाहंनारायणोमुहूर्तमार्तंडंनामग्रंथंतनोमिविस्तारयामि ॥ किमर्थं ॥ सिद्ध्यैकार्यसाधनायपुनःकिमर्थंविबुधमुदेपंडितहर्षाय ॥ हर्षकारणंविशेषण
द्वारेणाह ॥ किंलक्षणंमुहूर्तमार्तंडं ॥ लघुं ॥ अतिशयेनाल्पं ॥ अल्पेबह्वर्थाभावशंकांविशेषणद्वारापरिहरति ॥ पुनःकिंलक्षणंबह्वर्थंअर्थबहुलंअल्पग्रंथेबह्वर्थेदुर्बो
धशंकांपरिहरति ॥ पुनःकिं॰ सुगमंप्रकटार्थमिति ॥ अथनानामुहूर्तौविवक्षुस्तावच्छुभकर्मणित्याज्यांस्त्रिभिः ॥ शार्दूलविक्रीडितेनाह ॥ १ ॥ यामार्धमिति ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु॰ मा॰
२

यामार्धमिति ॥ २ ॥ यामार्धादिकं शुभेषु शुभकर्मणि संत्यजेत् ॥ इत्यंतिमश्लोकेनान्वयः ॥ यामार्धकुलिकौ वक्ष्यमाणलक्षणौ ॥ दिनार्धं नाम पत्रतिथिः सूर्योदयात्सप्ति
घटिकात्मकतिसैवान्यस्मिन्दिने हश्यते सा दिनार्धं ॥ अवमः मासस्थः पारिघप्राग्दलं परिघयोगस्य पूर्वार्धं ॥ विष्टिर्भद्रा वक्ष्यमाणा वैधृतिर्योगः पातो व्यतीपातः संक्रमणं
सूर्यादीनां राशिसंक्रमणं सर्वेषां ग्रहाणां संक्रमणे त्याज्यघटिका अग्रे वक्ष्यमाणाः गंडांतं त्रिविधं वक्ष्यमाणं एकार्गलो वक्ष्यमाणः कृष्णानंग चतुर्दिनं कृष्णात्रयोद-
श्यादिप्रतिपदंतं ॥ चंद्रस्य क्षीणत्वात् केश्चित्तु द्वादश्यादि सार्धदिनपंचकं त्यज्यते कृष्णे चात्यंतिकं केश्चित् ॥ तेषु मध्यमोयं पक्षो १ त्रांगीकृतः ॥ कृष्णानंग चतुर्दिनमिति
रविशशिक्रांत्योः समत्वं ॥ सूर्यचंद्रमसोः क्रांतिसाम्यं गणितगम्यं ॥ तथापि तस्यावलोकनं कस्मिन्दिने कर्तव्यमित्यग्रे वक्ष्यति ॥ खलांहोरां पापग्रहहोरां ॥ रात्रिदिनार्धं

यामार्धं कुलिकं दिनार्धमवमं पूर्वं दलं पारिघं विष्टिं वैधृतिपातसंक्रमगणं गंडांतमेकार्गलं ॥ कृष्णानंग चतुर्दिनं रविशशिक्रांत्योः समत्वं खलां
होरां रात्रिदिनार्धकं क्षयदिनं पित्रोर्जनन्यार्तवं ॥ २ ॥ मासाद्यं जनिसंभवं ग्रहणभं चंडायुधं दुःक्षणं ज्येष्ठं पूर्वभवस्य पापयुगितेष्वक्षा
णि विद्धं च भं ॥ ऊनाख्याधिकमासको ऽस्तुतिजुविव्यापक्षवगंडांतिषु न्यंकार्याकरस्तु पूर्वघटिकामानां विषाख्याघटीः ॥ ३ ॥ केदिनार्धरात्र्यर्धं च ॥ उक्तं
ग्रंथांतरे ॥ मूर्तः कालोनिवसतिमहानिशायां च दिनदले यस्मात् ॥ दश पूर्वं दश परतस्तस्माद्वर्ज्यानि च पलानीति ॥ क्षयदिनं पित्रोः माता च पिता च पितरौ तयोः पित्रोः क्ष
यदिनं श्राद्धदिनमित्यर्थः ॥ जनन्यार्तवं मातुः रजस्वलात्वं ॥ मासाद्यमिति ॥ मासाद्यं जनिसंभवं जनिरुत्पत्तिः ॥ तत्र संभवो यस्यैवंविधं मासाद्यं मास प्रभृति ॥ जन्ममास
जन्मतिथि जन्मनक्षत्रादि ॥ ग्रहणभं ग्रहणनक्षत्रं चंडायुधं वक्ष्यमाणं ॥ दुःक्षणो दुर्मुहूर्तो वक्ष्यमाणस्तं ॥ ज्येष्ठं पूर्वभवस्य प्रथमजातापत्यस्य ज्येष्ठमासं ॥ पापयुगि
तेष्वक्षाणि पापाः पापग्रहाः वक्ष्यमाणाः तेषां अन्यतमेन ग्रहयुक्तं ॥ इतंगतं ॥ एष्यं पुरस्थितं ॥ एतानि ऋक्षाणि नक्षत्राणि ॥ विद्धं च भं विद्धनक्षत्रं वक्ष्यमाणलक्षणं ॥ ऊ

८

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारव्याधिकमासकौक्षयमासाधिमासौ वक्ष्यमाणलक्षणौ ॥ धृतिशूलविव्याघातवगंडांतिषुत्र्यं ३ का ९ र्था ५ क ९ रस ६ तु ६ पूर्वघटिकाः विष्कंभः व्याघ्याघातः शूलशूलः ववज्रः गंडः प्रसि
द्धः अक्षिगंडः एषुयोगेषुक्रमेण त्र्यंकार्थांकरसर्तुसंख्याकाः पूर्वघटिकाः प्रथमघटिकाः ॥ तद्यथा ॥ विष्कंभेतिस्रः व्याघातेअंकाः नव ॥ शूलेअर्थाः पंचवज्रेअंकाः नव ॥ गंडेर
साः षट् अक्षिगंडेऋतवः षट्इति भानांविषाख्याघटीः भानांअश्विन्यादीनांनक्षत्राणांविषाख्याघटीः वक्ष्यमाणलक्षणाः ॥ ३ ॥ लत्तेतिलत्तापंचकपापवर्गएतत्सर्वंवक्ष्यमाणं-
अशुभंचंद्रंवक्ष्यमाणंगोचरप्रकरणेवेधंदशारिष्टकंजातकशास्त्रगम्यं ॥ जन्मेशेज्यसितास्तं ॥ जन्मेशोराशिस्वामी ॥ ईज्योगुरुः सितः शुक्रः एषांअस्तगमनंरविलुप्तकिरण
त्वंअंगशशिनोः क्रूरोद्भवांकर्तरीं अंगंलग्नंशशीचंद्रः तयोः क्रूरोद्भवांक्रूरग्रहजनितांकर्तरींवक्ष्यमाणलक्षणां ॥ रिष्टंगोचरसंभवं गोचरेदुष्टग्रहाधिक्यं गोचरंवक्ष्यमाणं ग्रहजनि

लत्तापंचकपापवर्गमशुभंचंद्रंदशारिष्टकंजन्मेशेज्यसितास्तमंगशशिनोः क्रूरोद्भवांकर्तरीं ॥ रिष्टंगोचरसंभवंग्रहजनिप्रांतोद्भवंसूतकंदुश्चिन्हा
निमनोविभंगमपिचव्याधिंशुभेसंत्यजेत् ॥ ४ ॥ नोकुर्याद्द्रविभादगेद्रधृतितोयुग्मेषुपंचाशयोः स्वगोत्तांचसुशोभनानितनुयादेशग्रशस्त्यादिके ॥

प्रांतोद्भवंसूतकं ॥ ग्रहोग्रहणं ॥ जनिर्जन्म प्रांतोमरणं एभ्यः उद्भूतंसूतकं ग्रहणसूतकंजन्मसूतकं मृतसूतकमिति ॥ तेषुग्रहणसूतकंवक्ष्यमाणं ॥ दुश्चिन्हानिकार्यारंभ
समयेक्षुतदुर्वचनश्रवणादीनि ॥ मनोविभंगः अंतःकरणस्यअप्रवर्तनं ॥ व्याधिर्ज्वररक्तमपिरोगः पाप्माज्वरोव्याधिर्विकारोदुःखमामयइतिवाग्भटः ॥ ज्वरितस्यमंगलं
नकुर्यादित्यर्थः ॥ तथाचोक्तंज्योतिःप्रकाशे ॥ जन्माधिपविलग्नेशश्चंद्रभार्गवमंत्रिणां ॥ विराशिमस्तंजन्ममासोजन्मभंजन्मवासरः दुर्निमित्तंमनोभंगः क्षयमासाधि
मासकौ ॥ मृतजातकयोश्चैवसूतकंग्रहणस्यच ॥ ज्वरोसन्निरजोमातुःपित्रोः क्षयदिनंतथा ॥ गंडांतत्रितयंकालः संधिर्भस्यतिथेस्तनोः ॥ क्रांतिपातोव्यतीपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोयेवधृतिः पारिघार्धकं ॥ भानोःसंक्रांतिभोगस्त्वकुलिकश्चार्धयामकः ॥ क्रूरैर्युक्तंयुतंभोग्यंसराहुशिखिधूमितं ॥ धिष्ण्यंग्रहणगंपापैर्विद्धंसौम्यैश्चपादतः ॥ विष्टिःक्रूरयुतंलग्नं
लग्नेशोरिपुमृत्युगः ॥ जन्मतोदुःस्थितश्चंद्रोलग्नस्योनिधनोपगः ॥ जन्मभाज्जन्मलग्नाच्चलग्नलग्नांशकाष्टमौ ॥ पापयोर्मध्यगंलग्नंक्षीणेंदुःकुनवांशकः ॥ क्रूरवारेपापहोराद्दु
ष्टयोगाग्रहोद्भवाः ॥ तिथिवृद्धिक्षयोभानांनाडिकाविषसंज्ञिताः ॥ एतेदोषाःसमाख्याताःशुभकर्मणिगर्हिताः ॥ दशारिष्टोद्भवाश्चान्येगोचरोत्थास्तथापरे ॥ लत्तेकार्गलचं
डास्त्रकालवेलास्त्रपंचकं ॥ मृत्युयोगोपग्रहाद्यास्तेस्वेदेशेतुनिंदिताइति ॥ ४ ॥ ॥अथोपग्रहांतर्वर्तिदोषांतरंवृत्तार्धेनाह ॥ नोकुर्यादिति ॥ रविभादिसूर्याधिष्ठितनक्षत्रादिश्र
गेंद्रधृतिमितानियानिनक्षत्राणितेभ्योयुग्मेषु ॥ एतदुक्तंभवति ॥ सप्तमाष्टमयोः चतुर्दशपंचदशयोः अष्टादशैकोनविंशयोरिति ॥ तथापंचाशयोःरविनक्षत्रात् पंचमदशमयो

मासर्त्वायनवारयोगतिथिभादीनांचसिद्धाभिधाज्ञातव्याःपुनरुक्तिरस्तिकुहचित्साततस्मृतिप्राप्तये ॥ ५ ॥ ॥इतिश्रीमदनंताख्यचातुर्मास्ययाजिसु
तनारायणविरचितेमुहूर्तमार्तंडेत्याज्यप्रकरणं ॥ १ ॥

तथास्वर्गोस्तंचसप्तएकविंशात्संचसप्तनक्षत्रेषु २१।२२।२३।२४।२५।शोभनानिकर्माणिनोकुर्यात् ॥ एषुउग्रशस्त्रघा
तादिकंतत्तुपापाद्विस्तारयेत्कुर्यादित्यर्थः ॥ उक्तंच ॥ विद्युत्संचतमभोक्षितेश्चचलनंस्यात्तसमेसूर्यभाच्छूलश्चाष्टमभेशनिश्चदशमेकेतुस्तथाष्टादशे ॥ दंडःपंचदशेचतुर्दशइहमो
कोनिपातोबुधैरुल्काकालविदांगणैर्निगदितान्वैकोनविंशेर्कभादिति ॥ दैवज्ञवल्लभेपि ॥ क्रमशोमोहनिर्घातभूकंपावज्रएवच ॥ परिवेषश्चविज्ञेयानक्षत्रादेकविंशतेः ॥ एतेषुदु
समेतेषुकुर्यात्कर्मनशोभनं ॥ दहनाख्यविषेःसाध्यंयत्तत्सिध्युपैतिचेतिअन्यानपिदोषान्अग्रेप्रसंगतोवक्ष्यामि ॥ अथास्मिन्ग्रंथेमासादीनांसंज्ञालोकसिद्धाज्ञेयाइति ॥ त
थापुनरुक्तिनिर्दूषणंवृत्तार्धेनाह ॥ मासर्त्वायनेति ॥ मासाः चैत्रादयः ॥ ऋतवोवसंतादयः ॥ अयनेदक्षिणोत्तरे ॥ वाराःसूर्यादयः ॥ योगाःविष्कंभादयः ॥ तिथयःप्रतिपदादयः ॥ भा
न्यश्विन्यादीनि ॥ इत्यादीनांकरणराशिभावादीनांसिद्धाभिधाः ॥ शास्त्रांतरसिद्धाःसंज्ञाःज्ञातव्याः ॥ तथाइहास्मिन्ग्रंथेकुहचित्कुत्रचित्पुनरुक्तिर्वर्ततेसाततस्यदूरांतरितस्य-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृतिमासय स्मरणार्यातनदोषः॥५॥ ॥इतिश्रीमुहूर्तमार्तंडटीकायांमार्तंडवल्लभायांत्याज्यप्रकरणं॥ ॥अथसाधारणनक्षत्रप्रकरणंविवक्षुरादौनक्षत्रदेवताः वृत्तेनैकेनाह॥
अस्मिन्प्रकरणेसर्वाणिशार्दूलविक्रीडितानि॥ स्रेशाइति॥ अश्विन्याःसकाशात् क्रमेणस्रेशाबुधैःप्रोक्ताइत्यन्वयः॥ भानांनक्षत्राणांईशाः स्वामिनः॥ दस्रौअश्विन्याःयमो
भरण्याःअग्निःकृत्तिकायाः कोब्रह्मारोहिण्याः इंदुर्मृगस्य गिरिशोमहादेवःआर्द्रायाःअदितिःपुनर्वसोःअंगिराःगुरुःपुष्यस्य पन्नगाःसर्पाःआश्लेषायाः कव्यभुजःपितरः
मघायाः भगःपूर्वाफाल्गुन्याः अर्यमाउत्तराफाल्गुन्याः रविर्हस्तस्य त्वष्टाचित्रायाः समीरणोवायुःस्वात्याःइंद्राग्नीदेवताद्वयंविशाखायाः मित्रोअनुराधायाः इंद्रोज्येष्ठायाः

स्रेशादस्रयमाग्निकंइदुगिरिशाःप्रोक्ताअदित्यंगिराः सर्पाः कव्यभुजोभगोर्यमरवित्वष्टासमीराःक्रमात् ॥
इंद्राग्नित्वयमित्रइंद्रनिर्ऋतीनीरंचविश्वेविधिर्वैकुंठोवसुपाशयजैकचरणाहिर्बुध्न्यपूषाभिधाः॥१॥ ॥

निर्ऋतिःराक्षसोमूलस्य नीरंजलंपूर्वाषाढायाः विश्वेउत्तराषाढायाः विधिर्ब्रह्माभिजितः वैकुंठोविष्णुः श्रवणस्य वसवोधनिष्ठायाः पाशीवरुणःशततारकायाःअजैकच
रणःपूर्वाभाद्रपदायाःअहिर्बुध्न्यउत्तराभाद्रपदायाः पूषारेवत्याः देवनामप्रयोजनंनक्षत्रज्ञानार्थंशांतिकादौयजनार्थंच॥ १॥ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथनक्षत्राणांस्थिरचरादिसंज्ञामाह ॥ ॥ब्राम्हंरोहिणी किंलक्षणंब्राह्मं त्र्युत्तरयुक्तिस्रणांउत्तराणांसमाहारस्त्र्युत्तरं ॥ तेनयुक्तयुक्तं ॥ ध्रुवंस्थिरमितिव्द्याभिधानंमुनीद्रैः स्मृतमित्यन्वयः ॥अथोपूर्वामाघायाम्यमंपूर्वात्रयंमघाभरणीतिपंचकं ॥ क्रूरोग्रंक्रूरउग्रंचोक्तं ॥ श्रवणत्रयादितियुतास्वातीश्रवणधनिष्ठाशततारकाः आर्दातिः पुनर्वसुः एभिः सहितास्वातीचराख्याचलाचोक्ता श्रवणत्रयादिपंचकं चराख्यंचलंप्रोक्तमित्यर्थः दस्त्रार्काऽभिजिदीज्यमंदस्त्रोऽश्विनी अर्कोहस्तः अभिजिद्वक्ष्यमाणलक्षणः इज्योगुरुस्तस्यभंपुष्यइतिचतुष्टयंलघुतथाक्षिप्रंप्रोक्तं मैत्रांतिमंदुत्वाष्ट्रंमैत्रंअनुराधा अंतिमंरेवती इंदुर्मृगः त्वाष्ट्रंचित्राएतच्चतुष्टयंमृदुतथामैत्रंप्रोक्तंअग्निभाविशेअ ग्निभंकृत्तिका विशाविशाखाएतद्द्वंमिश्रंसाधारणंप्रोक्तं ॥२॥ मूलंप्रसिद्धं अहिराश्लेषा इंद्रोज्येष्ठाशिवः आर्द्रा एतच्चतुष्टयंदारुणं अदःइदंतीक्ष्णंचोक्तं इहएषुध्रुवादि

ब्राम्हं त्र्युत्तरयुक्ध्रुवंस्थिरमथोपूर्वामघायाम्यभंक्रूरोग्रंश्रवणत्रयादितियुतास्वातीचराख्याचला ॥ दस्त्रार्काभिजिदीज्यभंलघुतथाक्षिप्रंचमैत्रांति मेंदुत्वाष्ट्रंमृदुमैत्रमग्निभविशेमिश्रंचसाधारणं ॥२॥ मूलाहींद्रशिवंचदारुणमदस्तीक्ष्णंमुनींद्रैः स्मृतंसंज्ञातुल्यमिहाचरंतिसुधियः कार्यहिसंसि द्धये ॥सूर्याद्याः स्थिरचंचलोग्रमिलिताः क्षिप्रोमृदुर्दारुणः क्षीणेंदर्कयमाररारुशिखिनः पापाबुधस्तैर्युतः ॥ ३॥ संज्ञेषुनक्षत्रेषुसंज्ञातुल्यंकार्यसुधियः पंडिताः आचरंति किमर्थंसंसिद्धये एतदुक्तंभवति स्थिरनक्षत्रेषुस्थिरम्‌ स्तंभप्रतिष्ठादिकं चरेचरमित्यादिकुर्वीतीतिस्पष्टं अत्रसमानार्थसंज्ञाद्वयकरणंकवित्वबंधनार्थं अत्रप्रसंगेनसूर्यादीनामपिस्थिरादिसंज्ञासौम्यपापत्वंचवृत्तार्धेनाह सूर्याद्याइत्यादि सूर्यः स्थिरः चंद्रश्चंचलः भौमः उग्रः बुधः मीलितोमिश्रः गुरुः क्षिप्रः शुक्रोमृदुः शनिर्दारुणः अथपापसौम्यान्ग्रहानाह क्षीणेति क्षीणेंदुः कृष्णाष्टम्यूर्ध्वंप्रतिपत्पर्यंतंक्षीणः अर्कः सूर्यः यमः शनिः आरोभौमः राहुः प्रसिद्धः शिखीकेतुः एतेक्षीणेंद्वा द्य·पापा ... ...बुधः ...स्यात् उक्तंचजातकोत्तमे ॥ क्षीणेंद्वर्कार्किसौमाः स्युःपापाः सौम्योपितद्युतः ॥ राहुकेतूपापतरौपापः पापयुतस्तयोति ॥ अर्थादन्ये सौम्याः एषांप्रयोजनंक्रूरसौम्यकर्मसाधने ॥ ३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथप्रसंगेन नक्षत्रसमाननामान् दिनरात्रिमुहूर्तान्नक्षत्रोक्तकार्यसाधकान् वृत्तेनैकेनाह ॥ एतेऽन्होदिवसस्यतिथि १५ लवाः पंचदशांशाः मुहूर्ताः शिवादयः स्युः प्रथमः शिवः द्विती
यः सर्पः तृतीयोमित्रः चतुर्थः पिता पंचमोवसुः षष्ठोऽम्बुसप्तमोविश्वेअष्टमोऽभिजित् नवमोब्रम्हादशमइंद्रः एकादशइंद्राग्नीद्वादशोनिशाचरः त्रयोदशोजलाधीशोवरुणः च
तुर्दशोऽर्यमाख्यः पंचदशोभगः अथरात्रेः प्रथमः स्मरहाशिवः अजचरणात्त्रयः अजचरणाहिर्बुध्न्यपूषाह्वयाः क्रमेणद्वितीयोऽजचरणः तृतीयोहिर्बुध्न्यः चतुर्थः पूषा पंचा
श्विनइतिअश्विनः पंचदस्रयमाग्निकेंद्रवः पंचमोदस्रः षष्ठोयमः सप्तमोऽग्निः अष्टमः कः ब्रम्हानवमः इंदुः अथोऽदितिर्दशमः एकादशोजीवः द्वादशोविष्णुः इनात्त्रयः रवित्वष्टा

अन्हः स्युः शिवसार्पमित्रपितरोवस्वंबुविश्वेऽभिजित्कंइंद्राग्निनिशाचराअपिजलाधीशोर्यमाख्योभगः ॥'
रात्रेः स्युः स्मरहात्रयोजचरणात्संचाश्विनतोयोऽदितिर्जीवोविष्णुरिनात्त्रयस्तिमिलवाः कर्मैषुभोक्तंस्मृतं ॥ ४ ॥

निलाः त्रयोदशोरविः चतुर्दशस्त्वष्टा पंचदशोऽनिलः वायुः प्रयोजनमाह कर्मैषुभोक्तंस्मृतं एषुमुहूर्तेषुभोक्तंनक्षत्रोक्तंकर्मस्मृतंमुनीन्द्रै रित्यध्याहारः एतदुक्तंभवतिशि
वमुहूर्तेआर्द्रानक्षत्रोक्तम् सार्पमुहूर्तेआश्लेषोक्तं मित्रमुहूर्तेअनुराधोक्तं कर्मकुर्यादित्यादि तदुक्तंरत्नमालायां यस्मिन्विधिर्धिष्ण्येयच्चकर्मोपदिष्टंतद्दैवत्येतन्मुहूर्तेपिकार्यमि
ति लोकेहिस्वामिशब्दंसेवकेप्रयुंजानादृश्यंते अतोदेवताशब्दस्तन्नक्षत्रतिथ्यादिषुस्मर्यते तथाविधवृद्धप्रयोगदर्शनाच्च ॥ नागोद्वादशनाडीभिर्दिक्पंचदशोभिस्तथा भू
तोष्टादशनाडीभिर्दूषयत्युत्तरांतिथिमिति नागः पंचमीदिग्दशमी भूतश्चतुर्दशीतिवत्   इतिस्वोक्तमुहूर्तमार्तंडटीकायांनक्षत्रप्रकरणंसमाप्तं ॥ ४ ॥   ४ ॥ ४

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथगर्भाधानादिसंस्कारप्रकरणंविवक्षुस्तावद्गर्भाधानस्यऋतुसंबंधात्प्रथमर्तुफलंस्रग्धरावृत्तेनाह आद्यर्ताविति ॥ तत्रादौमासफलमाह आद्यर्तौप्रथमर्तौपौषशुक्रोर्जे मधुशुचि
नभस्याः संतोनस्युरित्यन्वयः अर्थाद्दिष्टाक्तिपरिणामः पौषः प्रसिद्धः शुक्रोज्येष्ठः ऊर्जः कार्तिकः मधुश्चैत्रः शुचिराषाढः नभस्योभाद्रपदः एतेषण्मासाः नशुभाइत्यर्थः अर्थाद
न्येशुभाः तदुक्तंज्योतिर्निबंधे प्रथमर्तौप्रधौनारीविधवाप्रभवतिध्रुवं वैशाखेधनपुत्राढ्याज्येष्ठेरोगान्विताभवेत् आषाढेचमृतापत्याश्रावणेचधनान्विता भाद्रपदेदुर्भगाचआ
श्विनेचतपस्विनी ऊर्जेल्पायुष्मतीनारीमार्गशीर्षेबहुप्रजा पुष्येतुपुंश्चलीनारीमाघेपुत्रसुखान्विता फाल्गुनेश्रीमतीसाध्वीक्रमान्मासफलंस्मृतमिति योगफलमाह कु
युगिति कुयोगोविष्कंभादिकः योगेषुनवयोगाः दुष्टाः संति विष्कंभातिगंडव्याघातवज्रव्यतीपातपरिघवैधृतयः एतेयोगानशुभाइत्यर्थः अर्थादन्येशुभाः तदुक्तं आद्यर्तौदु-

आद्यर्तौपौषशुक्रोर्जमधुशुचिनभस्याः कुयुक्पापवारारिक्तामार्काहिषष्ठ्यः परगृहकुपदेराशिसंध्यापराण्हाः ॥ मिश्रो
ग्राम्मूलतीक्ष्णाविवरमनरुणाल्याधिकास्त्रंगराष्टोत्पातः पापस्यलग्नंनसदरुणजरन्नीडचित्रांबरंच ॥ १ ॥

र्भगानारीविष्कंभेचेद्रजस्वला वंध्याचैवातिगंडेचशूले शूलवतीभवेत् गंडेचपुंश्चलीनारीव्याघातेचात्मघातिनी वज्रेचस्वैरिणीप्रोक्तापातेचपतिघातिनी परिघेमृतवंध्याचवैधृतौ
पतिमारिणी शेषाः शुभावहायोगायथानामफलप्रदाइति वारफलमाह पापवाराइति क्षीणेंद्वर्कयमराः पापाः तेषांवारानशुभाः अर्थादन्येशुभाः उक्तंचकारिकायां आ
दित्येविधवानारीसोमेचैवमृतप्रजा अंगारकेस्वसृहंत्रीबुधेकन्याप्रसूर्भवेत् पुत्रिणीगुरुवारेचकन्यापुत्रवतीभृगौ शनौतुपुंश्चलीनारीप्रथमर्तौविदुर्बुधाइति तथाचनारदः
रोगीपतिव्रतादुःखीपुत्रिणीभोगभागिनी पतिप्रियाक्लेशभागीसूर्यवारादिषुक्रमादिति कारिकावचनेसोमवारफलंमृतप्रजेति नारदवचनेपतिव्रतेति एवंद्वयोर्विरोधेमृ
तप्रजेति कृष्णपक्षेसोमवारविषयं पतिव्रतेतिशुक्लसोमविषयम् इतिव्यवस्थापनीयं अतोमार्तंडवचनं पापवाराइत्येतदतिप्रशस्तं तिथिफलमाह रिक्तामार्काष्टषष्ठ्याइति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिक्ताश्चतुर्थीनवमीचतुर्दश्यः अमाअमावास्या अष्टअष्टमी द्वादश्याःस्वामीअर्कः अथवाअर्कसंख्यापिद्वादशवान्नकासंख्यायाअपिद्वादशीभवति तिथिदेवतापिरत्नमा-
लायां तिथिपाश्चतुर्मुखविधातृविष्णवइत्यादयः अष्टअष्टमी षष्ठीमसिद्धाएताः ससतिथयः नक्षत्राः अर्थादन्याः शस्ताः उक्तंच आद्यतौस्त्रभगानारीप्रतिपत्स्त्ररजस्वला द्वि
तीयायांभाग्यवतीतृतीयायांसुतान्विता चतुर्थ्यांविधवानारी पंचम्यांधनदायिनी षष्ठ्यांनक्लेशभाक्नारीसप्तम्यांधनवर्धिनी अष्टम्यांराक्षसीनारीनवम्यांपापवर्धिनी
दशम्यांप्रीतिकृन्नारीएकादश्यांसुतान्विता द्वादश्यांदुर्भगानारीत्रयोदश्यांहिरण्यदा चतुर्दश्यांपुंश्चलीस्यात्पौर्णमास्यांसुपुत्रिणी यदिभद्रानजायेतदर्शेस्याच्चोरि-
काध्रुवं इतिस्थानफलमाह परगृहकुपदेतिपरगृहंभर्तृगृहादन्यत कुपदंकुत्सितंस्थानं एतेउभेनिंद्ये अर्थादन्यच्छुभं उक्तंच देवस्थानेपितृस्थानेनिंद्यस्थानेन्यवेश्मनि
पुष्पवत्याः फलंनस्यान्मार्गेचांडालवेश्मनीति देवस्थानंदेवालयं पितृस्थानंश्मशानं निंद्यस्थानंकुत्सितस्थानं अन्यवेश्मभर्तृगृहादन्यगृहं अन्यत्स्पष्टं ननुअत्रश्लोके
बहूक्तं अत्रकथंपरगृहकुपदेइत्येवोक्तम् सत्यं यत्स्थानद्वयमुक्तंतस्मिन्नेवसर्वश्लोकोक्तम् अधितिष्ठतितद्यथा देवस्थानान्यवेश्मचांडालवेश्मेतिपदत्रयंपरगृहद्व
येतस्मिन्पदेधितिष्ठति अन्यत्श्लोकोक्तंनकुपदेवर्तते ननुमार्गःकथंकुपदेअस्ति सतुकुत्सितोनभवति अस्तिमार्गेपिदुष्टत्वंसर्वजनसंचारात्धर्मशास्त्रप्रसिद्धं तर्हि
पूर्वश्लोकोक्तंवहुभाषणं व्यर्थंस्यात्मैवं तदुक्तं बहुभाषणंनत्वधिकाधिकदोषविवक्षयोक्तमितिनदोषः वेलाफलमाह रात्रिसंध्यापराण्हाइति रात्रिःप्रसिद्धासं
ध्येद्वे अपराण्हस्त्रेधाविभक्तस्यान्हस्तृतीयोभागः एतेचत्वारः कालाःनष्टाः अर्थादन्योपूर्वाण्हमध्यान्होशस्तौ उक्तंच पुत्रिणीस्त्रभगापुण्या पूर्वाण्हेयारजस्व
ला मध्यान्हेतुशस्ताप्राप्तिः स्वैरिणीचापराण्हके संध्ययोरुभयोर्वेश्यानिशायांविधवातथेति नक्षत्रफलमाह मिश्रोग्रामूलतीक्ष्णमिति मिश्रेकृत्तिकाविशाखे उ
ग्राणिपूर्वात्रयभरणीमघाः अमूलतीक्ष्णानि मूलरहिततीक्ष्णानि आश्लेषाज्येष्ठार्द्रा इत्येतन्नक्षत्रदशकंनष्टं अर्थादन्यानिशस्तानि तदुक्तंनारदीयसंहिता
यां श्रीयुतास्त्रभगापुत्रवतीसौख्यान्विताऽस्थिरा कुलाधिकामानवतीचाश्विन्यांप्रथमार्तवा १ दुःशीलास्वैरिणीस्वस्यगर्भपातनतत्परा परप्रेष्याकाकवंध्यामर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ण्यांप्रथ॰२ अनर्थापुंश्चलीवंध्यागर्भपातनतत्परा प्रेष्यामृतप्रजावापिवन्हिभेप्रथमा॰३ सुशीलासुप्रजामान्यापतिभक्तादृढव्रता ग्रहार्चननरतानित्यंधातृभेप्रथ॰४
गुणान्वितधर्मरतानारीसर्वसहासती पतिप्रियासुताढ्याचचंद्रभेप्रथमार्तवा ५ कुलटादुर्भगाकष्टसृतपुत्रारवलाजडादुष्टाव्रतपरिभ्रष्टारौद्रभेप्र॰६ पतिभक्तापुत्र
वतीवरसंतानमोदिनी कुलाचारानुरक्ताढ्यादितिभेप्र॰७ पतिप्रियापुत्रवतीनानाभोगवतीशुभा स्वकर्मनिरतादक्षातिष्यभेप्रथ॰८ परभर्तृरताप्रेष्याकोपिनीनि
र्घृणारसा मृषावागीशादुःस्युत्राभोजंगभेप्रथ॰९ निर्द्वेष्यारोगसंयुक्तासर्वदागेयलोलुपा पितृवेश्मरतामान्यापितृभेप्रथमा॰१० परकार्यरतादीनादुष्पुत्राक्लेश
भागिनी मलिनाकर्कशाक्रुद्धाभाग्यर्क्षेप्रथ॰११ प्रजावतीधर्मरतानिर्वैरामित्रपूजिता सतीमातृगृहासक्ताआर्यमर्क्षेरजस्वला १२ निर्द्वेष्यापृरिविभवापुत्राढ्या
भोगभागिनी प्रधानादानकुशलाहस्तर्क्षेप्रथ॰१३ चित्रकर्माभोगिनीचकुशलाक्रयविक्रये विकीर्णकामाश्लक्ष्णाढ्यात्वाष्ट्रभेप्रथ॰१४ बहुवित्तवतीनीरुक्कुशला
शिल्पकर्मणि पुत्रपौत्रवतीसाध्वीवायुभेप्रथ॰१५ नीचकर्मरतादुष्टापानासक्तापरप्रिया विपुत्रामलिनाक्रुद्धाद्विदैवेप्रथ॰१६ स्वामिपक्षार्चितास्वस्यगुणैःसम्य
क्विभूषिता सुपुत्रासुभगाकांतामित्रभेप्रथ॰१७ दुश्चरित्ररताक्लेशिन्यनर्थापुंश्चलीव्यसः दुःसंतानवतीज्येष्ठानक्षत्रेप्रथमार्तवा १८ संतानार्थगुणैर्नाल्पैर्युतान्यक्ले
शमोचनी स्वकर्मनिरतानित्यंमूलर्क्षेप्रथ॰१९ प्रच्छन्नपापादुःपुत्राप्राणिहिंसनतत्परा अजस्रव्यसनासक्तातोयभेप्रथ॰२० कार्याकार्येषुकुशलासदाधर्मानुवर्ति
नी गुणाश्रयाभाग्यवतीविश्वभेप्रथ॰२१ पुत्रपौत्रान्विताभोगधनधान्यवतीसती कालानुमोदिनीमान्याविष्णुभेप्रथ॰२२ धनधान्यवतीभोगपुत्रपौत्रसमन्विता स्वकर्म
निरतासाध्वीवसुभेप्रथ॰२३ बहुपुत्राधनवतीस्वकर्मनिरतासती कालानुमोदिनीमान्यावारुणेप्रथ॰२४ बंधकीबंधुविद्वेष्यानित्यंदुष्टरतारवला शिल्पकार्येषु
कुशलाजांघ्रिभेप्रथ॰२५ आढ्यापुत्रवतीमान्यासुप्रसन्नापतिप्रिया बंधुपूज्याधर्मवत्यहिर्बुध्न्येप्रथ॰२६ दृढव्रताधर्मवतीपुत्रसौख्यार्थसंयुता विख्यातागु
णसंपन्नापौष्णभेप्रथ॰२७ अथसंधिफलमाह विवरमिति तिथिभादीनांविवरंसंधिः नशुभं उक्तंच दुर्भगासर्वसंधिषिति रक्तफलमाह अनरुणाल्पाधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काम्नामात अ[illegible]णादन्यत् अनरुणं च अल्पं च अधिकं च अनरुणाल्पाधिकं तच्च तत् अस्त्रं च अनरुणाल्पाधिकास्त्रं न सत्स्यात् अनरुणं नाम यत्स्फुरंगमारक्तं न भवति अस्त्रं
रक्तं अन्यत् स्पष्टगमं अर्थादन्यत्स्वच्छं उक्तं च प्रथमर्तौ फलं स्त्रीणामुच्यते रजसोधुना स्फु भगापुत्रसंयुक्ता शक्लवर्णे तथार्तवे शशशोणितसंकाशे यद्वालक्तकसन्निभो पु
त्रकन्याप्रसूतिः स्यान्नीले तु स्यान्मृतप्रजा कर्बुरे म्रियते सा च पिंगटे च मृतप्रजा कृष्णे तु विधवा नारी रजस्येवं विनिर्दिशेत् शोणिते बिंदुमात्रे तु स्वैरिणी चाल्पशोणिता
वरा मध्यस्त्वा वा स्यात्सुदुर्भगा बहुशोणितेति ग्रंथांतरेप्युक्तं रक्ते रक्ते भवेत्पुत्रः कृष्णे च मृतपुत्रका पिच्छलाभे भवेद् वंध्या काकवंध्या च पांडुरेति पीते च स्वैरिणी प्रोक्ता स्फुभ
गा गुंजवर्णके सिंदुराभे भवेत्कन्या रजःशोणितलक्षणेति करणफलमाह गराष्टेति गरात् अष्टगराद्यष्टकरणानि ववपर्यंतानि न संति नशुभानि स्युः अर्थादन्यानि
शुभानि उक्तं च ववे सुपुत्रवती नारी वंध्या वा विधवा भवेत् बालवे पुत्रिणी नारी कौलवे प्रमदा भवेत् तैतिले सन्मानवती गरे नारी विनश्यति नष्टप्रजा वणिक्संज्ञे विष्ट्यां वंध्या
पनोझिता शकुनौ तच्च तु ष्पादे नारी वैधव्यमाप्नुयात् नागे नरमते रामा किंस्तुघ्ने विधवा भवेदिति अथोत्पातफलं उत्पातः त्रिविधः न सत् न स्यात् तथा च नारदः संध्या
स्वप्न भूवे विष्वाभ्र शुभं प्रथमार्तवमिति अथ लग्नफ॰ पापस्य लग्नमिति पापग्रहस्य लग्नं न सत्स्यात् क्षीणेंदुर्कयमाराः पापास्तेषामन्यतमस्य लग्नमित्यर्थः पापग्र
हस्य मेषसिंहवृश्चिकमकरकुंभाः एतानि लग्नानि न शुभानीत्यर्थः अर्थादन्यानि शुभानि कर्कलग्ने शुक्लपक्षे शुभं कृष्णपक्षे अशुभं स्वामिवशात् लग्नस्वामिनोव-
क्ष्यमाणाः उक्तं च आत्मघ्नी भ्रूणहा मेषे वृषे पुत्रवती भवेत् द्वंद्वे कन्याप्रसूर्नारी मृतापत्या च कर्किणि सिंहे वैधव्यमाप्नोति कन्यायां स्त्रीप्रसूर्भवेत् तुलायां बहुपुत्रा
स्याद्दुष्टकर्मरतालिनी चापे पुत्रधनाढ्या स्यान्मकरे दुःखिनी भवेत् सकृत्प्रजावती कुंभे मीने चाल्पप्रजा भवेत् नारदोपि कुलीरवृषचापाल्यनृयुक्कन्यातुलाध
माः राशयः शुभदा ज्ञेया नारीणां प्रथमार्तवे इति अत्रापि कर्कलग्नस्य द्वैधे चंद्रस्य सौम्यत्वपापत्ववशाद्व्यवस्था ज्ञेया अथ वस्त्रफलं॰ अरुणजरन्नीलचित्रांबरमि
ति न सत्स्यात् अरुणं आरक्तं जरज्जीर्णं नीलं प्रसिद्धं चित्रं नानावर्णैरंजितं एवंविधमंबरं वस्त्रं न सत्स्यात् नशुभं स्यादित्यर्थः अर्थाद्वृद्धं शुभं पीतं वस्त्रं शुभं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्तंच सुभगाश्वेतवस्त्राचरोगिणीरक्तवाससा नीलांबरधरानारीविधवाप्रथमा॰ भोगिनीपीतवस्त्राचदृढवस्त्रापतिव्रता दुर्भगाजीर्णवस्त्राचसुभगाचारुवस्त्रि
णी अत्रात्तूक्तमपित्याज्यप्रकरणोक्तमन्यदुष्टत्वं विचारणीयं अत्रास्मिन्नुक्तेनिबद्धकालेरजोदर्शनेसति अक्षततिलघृतैर्दूर्वयाईज्ययायजनंस्यात् केनदेव्यागायत्रीमं
त्रेणसंख्यानुपादात् अक्षततिलघृतानामष्टोत्तरशतंहोमः यथाशक्तिस्वर्णगोभूतिलदानंचकार्यं इतिस्वोक्तमुहूर्तमार्तंडटीकायांमार्तंडवल्लभायांप्रथमार्तवप्र
करणं १ अथसाधारणलग्नबलंस्रग्धरावृत्तेनाह प्रायइति इहवक्ष्यमाणे गर्भाधानादिकृत्येप्रायोबाहुल्येनचंद्रंअंत्याष्टमरिपुतनुगंत्यजजहीति अंत्यंद्वादशं अ
ष्टमंप्रसिद्धं रिपुःषष्ठं तनुर्लग्नं एतान्प्राप्तिगतंचंद्रंत्यजेति तथाभांशकौत्यज किंलक्षणौभांशकौ मूढनाथौमूढः नाथौययोस्तौ तथाअस्तंगतस्यलग्ननवांशाधिपस्यर्थः

प्रायश्चंद्रंत्यजांत्याष्टमरिपुतनुगंभांशकौमूढनाथौक्रूरेंद्वासौखलांशंमूर्तिगतखचरंमृत्युकृतसौतनुस्थौ सौम्याःकेंद्रत्रिकोणेष्वरिभवस
हजेष्वन्यखेटाःप्रशस्ताःसर्वत्रैतत्प्रयोज्यंप्रकरणपठितांस्तद्विशेषान्विदित्वा ॥२॥ इतिसाधारणलग्नबलप्रकरणं ॥३॥

पुनःकिंलक्षणौ क्रूरेंद्वासौ क्रूरग्रहचंद्राणामन्यतमेनयुक्तौ तथाखलांशंत्यज यत्रकुत्रापिलग्नेपापग्रहनवांशोत्यज तथामूर्तिगतखचरंत्यज लग्नादष्टमंग्रहंत्यजेदि-
त्यर्थः तथामृत्युकृतसौतनुस्थौत्यज मृत्युर्जन्मराशिजन्मलग्नाभ्यामष्टमंत्याज्यम् तत्पस्तत्पतिः त्याज्यः एतौतनुस्थौत्यजेदित्यर्थः लग्नगोचरमाह सौम्यादिति सौम्याः सौ
म्यग्रहाः केंद्राणिलग्नचतुर्थसप्तमदशमानि त्रिकोणेनवपंचमे एतेषुकेंद्रत्रिकोणेषुसौम्याःग्रहाःप्रशस्ताः अरिभवसहजेषु अन्यखेटाःअरिःषष्ठंभवःएकादशंसह
जंतृतीयं एषुस्थानेषुअन्यखेटाःसौम्येभ्योन्येपापग्रहाःप्रशस्ताःस्युः सर्वत्रैतत्प्रयोज्यंएतच्छ्लोकोक्तंसर्वत्रगर्भाधानादिकृत्येप्रयोज्यंसाधारणत्वात् किंकृत्वाप्रकर
णपठितांस्तद्विशेषानविदित्वा प्रथकृत्यप्रकरणपठितविशेषान्ज्ञात्वा ॥ २ ॥ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथगर्भाधानस्त्रीधर्मवृत्तेनाह भोकृतार्थिन्नृकृतासुदितःसन्स्वस्त्रींप्रतियाहि गच्छेत्यन्वयः कृतंअर्थयते असौकृतार्थीतस्यसंबोधनं भोकृतार्थिन् ऋतौरजोदर्श नादारभ्य षोडशरात्रयोर्ऋतुः तस्मिन्नुदुदर्षः संजातोयस्यसमुदितः एवंविधःसन्स्वस्त्रींप्रतिगच्छेत्यर्थः यतोत्रस्त्रीगर्भधारणंकरोति अत्रस्त्रीअपिहर्षिताप्रा प्या तथाचमनुः ऋतुःस्वाभाविकःस्त्रीणांरात्रयः षोडशस्मृताइति किंकृत्वा प्राङ्निद्यचतुष्कासमदिनविवरश्राद्धतत्पाक्दिनानित्यक्त्वा प्राच्यांनिशाच तुष्कंपूर्वरात्रिचतुष्टयं असमदिनंविषमदिनं विवरणादिरात्रितिथिप्रभादीनांसंधयः श्राद्धदिनंतत्पाक्दिनंतस्यश्राद्धस्यपूर्वदिनंएतानित्यक्त्वेत्यर्थः एवंमू लंत्यक्त्वा तथामूलमघांत्येत्यक्त्वामूलमघेप्रसिद्धेअंत्येरेवती एतानित्यक्त्वेत्यर्थः तथावस्रुकलिजनिप्राहानित्यक्त्वावसुरष्टमी कलिश्चतुर्दशीजनिप्रंजन्मनक्षत्रं अहो

स्वस्त्रींप्राङ्निद्यचतुष्कासमदिनविवरश्राद्धतत्पाक्दिनानित्यक्त्वामूलंमघांत्येवसुकलिजनिप्राहानिपर्वाणिचर्तौ ॥ याहीज्यार्के
दुलग्नेविषमभलवगेरुब्दलेभोकृतार्थिन्व्यस्तैरेतैरिहैवायुगहनिसुदितःकन्यकेच्छोस्त्रचंद्रे ॥ १॥ दिवाएतानित्यक्त्वेत्यर्थः तथापर्वाणिच्यक्त्वा पर्वाणिदर्शपौर्णमासिव्यतीपातवैधृतिसंक्रांतिमहापातादीनित्यक्त्वास्त्रियंप्रतिगच्छेत्यर्थः तथाचनारदः रजोदर्शनतोस्पृश्यानार्यादिनचतुष्टयं ॥ ततःशुद्धाः क्रिया स्वेताःसर्ववर्णेष्वयंविधिरिति वसिष्ठः उपप्लवेवैधृतिपातयोश्चविष्ट्यांदिवापारिघपूर्वभागेसंध्यासुसर्वास्वपिमातृपित्रोर्मृतेन्हिपत्नीगमनंविवर्ज्यं दिनेषुयुग्मेषुच व स्यमाणयोगैःकृतार्थास्त्वसतीमुपेयात् दिनेष्वयुग्मेषुच कन्यकार्थीहित्वाचगंडांस्तिथि लग्नभागान्ज्योतिषार्के अतोयुग्मनिशिस्वस्त्रींगच्छेत्तत्रापि सद्भिर्भी मघामूलां सपक्षांतमूलदर्शाष्टमी स्त्यजेदिति केःइज्यार्केंदुलग्नैःविषमभकुवर्गेः इज्योगुरुः अर्कःप्रसिद्धः इंदुश्चंद्रः लग्नंप्रसिद्धंएतैर्विषमभलवर्गेः भराशिः लवोनवांशः विषमराशि विषमनवांशस्थितैरित्यर्थः नकेवलंविषमभलवर्गैः अपितुउड्डलैः उवउत्कृष्टंवलंयेषांतानिनवांतैः अथकन्याकामिनोविशेषमाह भोकन्यकेच्छोइहैवअनंतरोक्तलक्षणेका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लेऽशुभगेहानिविषमदिनेसुदितः सम्यग्दीमतियाहिकैः एतैर्व्यस्तैः एतैरिज्यार्केंदुलग्नैः व्यस्तैरिति समभलवर्गैः समराशिसमांशस्थैः तथाचबृहज्जातके ओजर्क्षेपुरुषांशकेषुब
लिभिर्लग्नार्कगुर्विंदुभिः पुंजन्मप्रवदेत्समांशकगतैर्युग्मेषुतैर्योषितोद्भवमिति कस्मिन्सति शुक्लचंद्रेशोभनेचंद्रेसति गोचरेणचंद्रबलेसतीत्यर्थः शुक्लचंद्रेइतिअनन्यगतिकं विनास
र्वत्रयोज्यं पूर्ववल्लग्नबलं १ अथपुंसवनसीमंतोन्नयनेस्रग्धरयाआह पुंभेति पुंभेपुंनक्षत्रेपुंनक्षत्राणिचैतानि पुष्योहस्तःपुनर्वसुः अभिजिन्मोष्ठपाच्चैव अनुराधाश्वि
न्युत्तरेति प्रोष्ठपात्पूर्वाभाद्रपदा एषामन्यतमेपुंनक्षत्रेअर्केज्यारवारे रविगुरुभौमवारेविमिथुनविषमांगांशयोः अगंच अंशश्चअंगांशौ विगतौमिथुनंयाभ्यांतौविमिथु
नौतौचतौ अंगांशौचेतियातयोः मिथुनरहितेविषमलग्नेविषमनवांशेइत्यर्थः पुंसवंपुंसवनंसीमंताख्यंचसीमंतोन्नयनमपिसत्स्यात् नामैकदेशाग्रहणेनामग्रहणं कयोः

पुंभेर्केज्यारवारेविमिथुनविषमांगांशयोः पुंसवंस्यात्सीमंताख्यंचसत्स्वव्ययसुतगृहयोः पर्वरिक्तोनतिथ्यां ॥ मासेद्वित्रिप्रसंख्येप्रथमकमपरंतुर्यष
ष्ठाष्टमेषुप्रोक्तंपुंगर्भलग्नंग्रहबलमनयोर्योज्यमाद्यश्चपक्षः ॥२॥

सतोः स्वव्ययसुतग्रहयोः सतोः पापग्रह रहितयोः व्ययसुतभवनयोः सतोरित्यर्थः पर्वरिक्तोनति
थ्यांपूर्णिमा रिक्तातिथिरहिततिथ्यां मासेद्वित्रिप्रसंख्ये प्रथमकं पाठोन्त्याप्रथमकं पुंसवनंगर्भाधानात् द्वित्रिप्रसंख्येमासिद्वितीयेतृतीयेवामासिसत्स्यात् अपरंसीमंतोन्नयनं
तुर्यषष्ठाष्टमेषु गर्भाच्चतुर्यषष्ठाष्टमेषुमासेषुसत्स्यात् यत्पुंगर्भायलग्नबलमुक्तंइज्यार्केंदुलग्नैरित्यादिकं तदनयोः पुंसवनसीमंतोन्नयनयोर्योज्यं आद्यःपक्षः शुक्लपक्षश्चयोज्यः
नकृष्णः अत्रगर्भाद्यन्नाशनांतेषुगुरुशुक्रमौढ्यादिकंनचिंत्यमित्यग्रेवक्ष्यति लग्नबलंपूर्ववत् जातूकर्ण्यः द्वितीयेवातृतीयेवामासिपुंसवनंभवेत् व्यक्तेगर्भेभवेत्कार्यंसीमंतेन
सहाथवा नृसिंहः रिक्तांचपर्वनवमींत्यक्त्वापुंसवनेशुभाः हस्तशाते सीमंतोन्नयनंबुधैस्तुहिनगोःपुंन्नामधिष्ण्येस्थितेकुर्यात्पुंसवनंचसूर्यदिवसेभौमस्यजीवस्यवेत्यादि बृह
स्पतिः कुलीरंमिथुनंकन्यांहित्वाशेषाःशुभावहाइति नारदः चतुर्थेमासिषष्ठेवाप्यष्टमेवातदीश्वरे बलोपपन्नेदंपत्योश्चंद्रताराबलान्विते अरिक्तापर्वदिवसे कुजजीवार्क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वासरे तीक्ष्णमिश्रोग्रवर्ज्येषु पुलग्नेषु न्नवांशके शुद्धेष्टमे जन्मलग्नात्तयोर्लग्नेनैधने शुभगृहयुते दृष्टे पापखेटायुते नेक्षिते धंचेष्टिकैश्चतुर्भिर्वाइष्टैकेंद्रैर्द्विज्यपूर्वकैः स्त्रीणां
तु प्रथमे गर्भे सीमंतोन्नयनं शुभं शुभग्रहेषु धीधर्मकेंद्रेष्वरिभवत्रिषु पापेषु सत्सु चंद्रे त्यनिधनाद्यरिवर्जिते क्रूरग्रहणामेकोपि लग्नाद्दस्थात्मजाष्टगः सीमंतिनीं वा तद्ध
र्भं वा हंति न संशय इति २ ॥ अथ जातकर्मविधिं स्रग्धरावृत्तेनाह सूतौ प्रसूतौ जातायां जातं जातकर्म विदध्यात् कुर्यात् अथ कदाचित् सूतकमध्ये प्रसूतौ जातायां सत्यां स्मार्तकर्मपरि-
त्यागो राहोरन्यत्र सूतक इति शास्त्रेण जातकर्मणो वरोधे प्राप्ते तदपवादमाह जनिमरणाशौचके तु अयमर्थः कदाचिज्जातकमृतसूतकयोः प्रसूतिर्भवति तदा जातकर्मविपर्ययेसू
तकांतरदोषो नास्तीति भावः सूतकांतरे सत्यपि जाते पुत्रे पिता सचैलं स्नानं कुर्यादिति स्वस्वगृह्योक्तं कर्म कुर्यादित्यर्थः यतः पूर्वाशौचेनैव तस्य शुद्धिः पितुरिति कर्तुरुपलक्षणं वा

सूतौ जातं विदध्यादपि जनिमरणाशौचके त्वांतदंते क्षिप्रैर्ब्राह्मोत्तराभिश्चरमृदुभिरयोनामवर्णान्विदध्युः सूतेः सूर्याद्विंशाकृतिमितदिवसे जातमौर्वी
चरांगेरिक्ताष्टम्यारमंदान्व्ययगतखचरं प्रोह्य रात्रिं पराह्णं ३

तदंते पूर्वाशौचांते वा एतस्यांते वा क्षिप्रादिभिर्नक्षत्रैः कुर्यात् क्षिप्राणि अश्विनीहस्ताभिजित्पुष्याः
ब्राह्मं रोहिणी उत्तरास्तिस्रः चराणि श्रवणत्रयं पुनर्वसुः स्वात्यः मृदूनि अनुराधा रेवती मृगचित्राः एभिरित्यर्थः लग्नबलं पूर्ववत् उक्तं च तस्मिन् जन्ममुहूर्तेपि सूतकांते यथा वा-
शिशोः जातकर्म च कर्तव्यं पितृपूजनपूर्वकं क्षिप्रेश्चरैर्ध्रुवैर्मिश्रैर्द्वादशे प्रथमेन्हि वा केंद्रे गुरौ शुभे योगे कार्यं जातकर्म सनातनमिति प्रजापतिः सूतके तु समुत्पन्ने पुत्रजन्म य
दा भवेत् कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यतीति संवर्तः जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते तच्च शीतोदकेन कार्यं तत्र जाबालिः कुर्यान्नैमित्तिकं स्नानं शीता
द्भिः काम्यमेव चेति एतच्च रात्रावपि कार्यं तत्र वसिष्ठः पुत्रजन्मनि यज्ञे च तथा संक्रमणे रवेः राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा निशि तच्च उत्तराभिमुखं कार्यं तदुक्तं तेनैव
श्रुत्वा जातं पिता पुत्रं सचैलं स्नानमाचरेत् उत्तराभिमुखो भूत्वा नद्यां वा देवखातके इति रात्रौ उदकादिगमनाशक्तौ विशेषमाह सांख्यायनः दिवाहृतं तोयं कृत्वा स्वर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु. मा.
१

युनंतुनत् शांत्रिकानंतुसंमासेस्नाषादनलसन्निभाविति अथनामकर्माह अथोनामवर्णाविदध्युः सूतेः सूर्याष्टिविंशाकृतिमितादिवसोऽइति अथानंतरंवर्णाः ब्राह्मणादयः क्र
मेणसूतेः प्रसूतेः सकाशात् सूर्या १२ ष्टि १६ विंशा २० कृति २२ मितदिवसेद्वादशषोडशविंशाद्वाविंशमितदिवसेनामविदध्युः कुर्युरित्यर्थः अयमर्थः ब्राह्मणोद्वादशादिवसे
क्षत्रियः षोडशे वैश्योविंशतिमे शूद्रोद्वाविंशति मे दिवसे नामकुर्यादित्यर्थः तच्चोक्तं बृहस्पतिनाद्वादशेदिवसेवापिजन्मतोदिवसेशुभे षोडशेविंशतौचैवद्वाविंशेव
र्णतः क्रमादिति अत्रान्येपिविकल्पाः संतितत्रव्यासः नामधेयंदशम्यांतु केचिदिच्छंतिसूरयः द्वादशेन्थ्याहुरन्येतुमासेपूर्णेतथापरे अष्टादशेहनितथावदंत्यन्येमनीषि
णइति मासकालेपिविशेषमाह गर्गः व्यतीपातेचसंक्रांतौग्रहणेवैधृतावपि श्राद्धंविनाशुभंनैवमासकालेपिमानवः अमासंक्रांतिविष्ट्यादौमासकालेपिनाचरेदिति
यत्रकालनिरोधस्तत्रदोषोनास्ति यस्यांक्रियायांसर्वोक्तःकालोमासादिनैरपि तस्यान्नदोषोमूलत्वंवक्रुवाजीवशुक्रयोरिति अथकालातिक्रमेनक्षत्राण्याह जातभैर्वेति जा
तभैर्जातकर्मोक्तनक्षत्रैर्मैत्रैः क्षिप्रैरित्यादिभिर्वाकार्यं तदुक्तंनारदेन देशकालोपघाताद्यैः कालातिक्रमणंयदि अनस्तगेभृगावीज्येतत्कार्यंचोत्तरायणे चरस्थिरमृदुक्षिप्रन
क्षत्रेशुभवासरे चंद्रताराबलोपेतेदिवसेचशिशोःपितेति अथात्रत्याज्यविशेषमाह चरांगमितिचरांगंचरलग्नं रिक्ताष्टम्यारमंदान् रिक्ताश्चतुर्थीनवमीचतुर्दश्यः अष्ट
मीप्रसिद्धा आरोभौमवारः मंदःशनैश्चरः तान्त्यजतरवचरं खचरंव्ययभावगतं सौम्यंअसौम्यंवा राशिःप्रसिद्धा अपराह्णोदिनतृतीयांशः एतान्प्रोज्झ्यसंत्यक्त्वा लग्नबलंपू
र्ववत् तथाचबृहस्पतिः पूर्वाह्णःश्रेष्ठइत्युक्तोमध्याह्नोमध्यमःस्मृतः अपराह्णंचरात्रिंचवर्जयेन्नामकर्मणिइति नृसिंहः सायान्हेदुष्टयोगेचशनिभूमिजवारयोः रिक्तापर्वा
ष्टमीविष्टिः किंस्तुघ्नंचविशेषतः एतैर्दोषैर्युतेकालेरात्रावपिनकारयेत्इति बृहस्पतिः शुभवारेचषड्वर्गेशुभानांनामसंपदे राशयश्चस्थिराःश्रेष्ठाहिःस्वभावाःशुभैर्यु
ताः नृसिंहः लग्नाद्व्ययाष्टमेसर्वेनशुभानामकर्मणिइति केषान्नामकार्यमितिसंग्रहेउक्तं देवालयगजाश्वानांवृक्षाणांवापिकूपयोः सर्वोपकरणानांचचिन्हानांयोषि
षितांतृणां काव्यादीनांकवीनांचपश्वादीनांविशेषतः राजप्रसादसंज्ञानां नाम कर्मविशिष्यतइति ॥ ३ ॥

टी.
१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथपालकारोहणंभूम्युपवेशनंदुग्धपानंनिष्क्रमणंचातचतुष्टयमुक्तेकेनाह प्रसूतेःसकाशात् द्वादशेदिवसेपालकेरवट्वायांवा अर्भंबालकंन्यसेत्निदध्यात् उक्तकालाति

क्रमेध्रुवमृदुलघुभैर्वानक्षत्रैर्निदध्यात् लग्नबलंपूर्ववत् सूर्यभाच्चंद्रभंयावत्पंचपंचचतुर्दशा मध्येचसप्तवेयानिबालकस्यहितायवै पूर्वभागेतुरोगत्वंदक्षिणेमरणं

ध्रुवं पश्चिमेविकृतोबालोउत्तरेव्याधिसंभवः शेषेषुमध्यनक्षत्रेबालकस्यहितायवै तथाचोक्तंबृहस्पतिनास्वसंहितायां खट्वारोहस्तुकर्तव्योदशमेद्वादशेपिवा षोडशे

दिवसेवापिद्वाविंशेदिवसेपिवा तथाचोक्तंभविष्योत्तरे अष्टमीदिवसेपुण्येचंद्रताराबलान्विते मृदुध्रुवक्षिप्रभेतुमातावाकुलयोषितः शेषशायिनमाचित्यमाकुशीर्षविन्य

सेच्छिशुमिति भूम्युपवेशमाह सौम्येति सौम्योमृगः अश्विनीप्रसिद्धा इज्यःपुष्यः ध्रुवाणिपूर्वोक्तानि त्र्युत्तरारोहिण्यः इंद्रोज्येष्ठा एभिर्नक्षत्रैः शुभदिवसे

जन्माहात्द्वादशेन्हि ध्रुवमृदुलघुभैर्वान्यसेत्पालकेर्भंसौम्याश्वीज्यध्रुवेंदुर्गुविशुभदिवसेपंचमेमासिदध्यात् ॥ एकत्रिंशेदिनेवा अशननिगदितभैःकंबु

नायोज्यमर्भंव्यग्वाशास्यपयोथास्यगमवदुदितोनिष्क्रमोमासितुर्ये ॥ ४ ॥ रिक्तादिवर्जितेजन्मतः पंचमेमासिशुविभूम्यांअर्भंनिदध्यात् उपवेशयेदित्यर्थः

तथाचोक्तंब्रह्मपुराणे पंचमेचतथामासिभूमौतमुपवेशयेत् तत्रसर्वेग्रहाःशस्ताभौमोप्यत्रविशेषतः तिथिंविवर्जयेद्रिक्तांशस्तान्याःशृणुभानिमे उत्तरात्रितयंसौम्यं

पुष्यर्क्षंशक्रदैवतं प्राजापत्यंचहस्तंश्चशस्तमाश्विनमित्रभं वराहंपूजयेद्देवंपृथिवींचतथाद्विजान् भूभागंसुपलिप्याथतत्रकृत्वाथमंडलं वाद्यपुण्याहशब्देनभूमौ

तमुपवेशयेदिति उपवेशनमंत्रस्तत्रैवोक्तः रक्षैनंवसुधेदेविसदासर्वगतंशिशुं आयुःप्रमाणंसकलंनिक्षिपस्वहरिप्रियेइति दुग्धपानमाह एकत्रिंशेदिनइति एक

त्रिंशत्तमे दिवसे अर्भंबालकंकंबुकेनशंखेनपयःदुग्धंयोज्यंपाययेदित्यर्थः अत्रनृसिंहः एकत्रिंशाह्निनैवपयःशंखेनयोजयेदिति अथमातुःस्वल्पपयस्त्वेपक्षांत

रमाह वाअशननिगदितभैरिति अन्नप्राशननक्षत्रैर्वायोज्यंभैरित्युपलक्षणं अन्नप्राशनोक्तंअन्यदपिविचार्यंकिंलक्षणोअर्भंव्यग्वाशास्येविगतःअग्रुःराहुर्यस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साव्यसुः सत्वासौ आशाचतस्यां आस्यं सुखं यस्य स तथा तस्मिन् राहुवर्जितदिङ्मुखइत्यर्थः लग्नबलं पूर्ववत् व्यग्वाशास्येइत्युपलक्षणं तेन रुद्रयोगिन्यादिकमपिवर्ज्यं
तथाचोक्तं ज्योतिर्निबंधे योगिनीराहुरुद्रादिसुखं चैवविवर्जयेत् राहुलक्षणं गुरुभान्वोर्वसेत्प्राच्यामिंदौशक्रेचदक्षिणे कालराहुः कुजेमत्स्यकुउत्तरेबुधमंदयोः ल
क्षणांतरं इंद्रेवायौयमेरौद्रेतोयाग्निशशिराक्षसे यामार्धमुदयाद्राहुर्भ्रमत्येवंदिगष्टकेइति उदयात् सूर्योदयात् रुद्रलक्षणं हरिसोमवन्हिराक्षसयमवरुणानिलहरालयेष्वेवं
उदयादिभ्रमतिसदाघटिकारुद्रोमहालयइत्यादिहशिरिंद्रः अथनिष्क्रमणमाह अथास्यगमवदुदितोनिष्क्रमोमासितुर्ये तुर्येचतुर्थेमासि अस्यार्भकस्यनिष्क्रमोनिष्क्रमणं
गमवत् गमनवत् इतियावत् उदितः उक्तः पूर्वैः अत्रयात्राप्रकरणोक्तं सर्वंयोज्यमित्यर्थः निष्क्रमलक्षणं बृहस्पतिनोक्तं अथनिष्क्रमणंनामगृहात्प्रथमनिर्गमः अकृता
यांक्रियायांस्यादायुः श्रीनाशनंशिशोः इतियमः उपनिष्क्रमणंकुर्याच्चतुर्थेमासिसावनइति कारिकायां चतुर्थेमासिपुण्यर्क्षेशक्लेनिष्क्रमणंभवेत् स्नातंस्वलंकृतंचाभिहित :

मैत्रेः क्षिप्रेः स्थिरभचरभैर्व्यानिलांभः पकर्क्षैर्श्चैकाफापौषिनशनिकुजर्क्षांशवारानपास्य॥ ७ ॥

स्वस्त्ययनंशिशुमिति आदायगेहान्निर्गम्यगच्छेयुर्देवतालयं अभ्यर्च्यदेवतांसम्यगाशिषोवाचयेदथ कृत्वाप्रदक्षिणंगेहमानयंतिततः स्व कं मातृस्वसृगृहंगत्वामा
तुलादेर्गृहंनयेत् तदाशीर्वचनाद्येश्चदीर्घायुरभिनंदितः जयंतस्यमतेनायंलिखितः शिशुनिष्क्रमः स्वगृह्यानुसारंयोजयेत् अथकर्णवेधंमंदाक्रांतयाह मैत्रैः अनुरा
धारेवतीमृगचित्राभिः क्षिप्रैर्दस्रार्काभिजिदीज्यभैः स्थिरभचरभैः स्थिराणिउत्तरात्रयरोहिण्यः चराणिश्रवणत्रयपुनर्वसुस्वात्यः तैः कथंभूतैः स्थिरभचरभैः
र्व्यानिलांभः पर्क्षैः विगतानिअनिलांभः पर्क्षाणियेभ्यस्तानितथातैः अनिलंस्वातीअंभपः शततारकाआर्क्षैरोहिणी तद्रहितैरित्यर्थः चैकाफापौषुचैत्रकार्तिक
फाल्गुनपौषेष्वित्यर्थः पुंस्त्रीकर्णौपुरुष स्त्रियोः कर्णौप्रहनाकुशलेनसविधिययास्यात्तथादक्षवामादिवेध्यौ पुरुषस्यदक्षिणकर्णादि स्त्रियांवामकर्णादिवेध्यावित्यर्थः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्णवधसूत्रमाह बृहस्पतिः सौवर्णा राजपुत्रस्य राजती विप्रवैश्ययोः शूद्रस्य त्वायसी सूची मध्यमाष्टांगुलात्मिका कर्णवेधविधिस्तु गृह्यपरिशिष्टे उक्तः अथ कर्णवेधो वर्षे तृ-
तीये पंचमे वा पुष्येंदुहरिचित्रारेवतीषु पूर्वाण्हे प्राङ्मुखउपविश्य दक्षिणकर्णमभिमंत्रयते भद्रंकर्णेभिरिति सव्यं वक्ष्यंतीवेदिति कुमाराय मधुरं दत्वाथ भिंद्यात्ततो-
ब्राह्मणभोजनमिति किं कृत्वा इनशनिकुजदर्शांशवारानपास्य रविशनिकुजानां क्षाणि लग्नानि अंशान वांशाः वाराः प्रसिद्धास्तांस्त्यक्त्वेत्यर्थः पुनः किं कृत्वा रिक्तापर्वेश्वर
वसुतिथीनपास्य रिक्ताश्चतुर्थीनवमी चतुर्दश्यः पर्वणी पूर्णिमामावास्ये संक्रांतिश्च ईश्वरतिथिरेकादशी वसुरष्टमी एतानपास्य पुनः किं कृत्वा रात्रिसंध्ये अपास्य एवं पुनः
किं कृत्वा समाब्दमपास्य समवर्षं त्यक्त्वा विषमवर्षे कर्तव्यमित्यर्थः लग्नबलं भार्गवत् अत्र नृसिंहः वेध्यौ कर्णावदंतस्य विषमेब्देपि वा शिशोः शुक्लपक्षे शुभे वारे चैत्रपुष्यो-

रिक्तापर्वेश्वरवसुतिथीन्रात्रिसंध्ये समाब्दं पुंस्त्रीकर्णौ सविधिपटुनादस्रवामादिवेध्यौ ॥ ५ ॥

र्जफाल्गुने एकादश्यष्टमीपर्वरिक्तावर्ज्याः शुभावहाः शिष्टाश्च तिथयः सर्वाः कृष्णे चांत्यत्रिकं विना कर्णद्वयादिति क्षिप्रमृदुध्रुवैरुत्थायगैः शुभैः गुरौ लग्नेच केप्याहु-
रुत्तरार्क्षस्मृतिं व्यधादिति अगस्त्यः द्वयोश्च संध्ययोर्लग्ने न कुर्यात्कर्णवेधनं रात्रावपि तथा लग्ने नक्षत्र तिथिसंधिषु कर्णवेधं न कुर्वीत कुर्याच्चेच्छेदनं भवेदिति
बृहस्पतिः मंदार्कारांशवाराः स्युर्वर्ज्याः कर्णस्य वेधने गुरुशुक्रेंदुजेंदूनां पूज्या वारांशकोदया इति संग्रहे शातकुंभमयी सूची वेधने शुभमदा राजती वायसी वा
पि यथाविभवतः शुभा सुभूमौ मांगणे रम्ये शुचौ देशे बरे रवौ संस्थितं वेधयेत्कर्णौ स्त्रीपुंसो वामदक्षिणौ शकृत्सूत्रसमायुक्तताम्रसूच्याथ वेधयेत् वेधान्नूर्नीयनस्-
त्रेक्षालयेदुष्णवारिणेति देवलः कर्णरंध्रे रवेश्छाया न विशेदग्रजन्मनः तं दृष्ट्वा विलयं यांति पुण्यौघाश्च पुरातना इति ॥ ५ ॥ ७ ॥ ७ ॥ ७ ॥
७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथान्नप्राशनं वृत्तेनैकेनाह जन्मतः षष्ठेमासि अष्टमे वा मासे तु नरस्य अशनं अन्नप्राशनं निगदितं प्रोक्तं भीरोः कन्यायाः पंचमे सप्तमे वा मासे अशनं प्रोक्तं अत्र नंदाहरिव
सुरजनीरिक्तकाः उज्झति सुनयः नंदाः प्रतिपत्षष्ठ्येकादश्यः हरिर्द्वादशी वसुरष्टमी रजनी रात्रिः रिक्ताश्चतुर्थीनवमीचतुर्दश्यः ताः स्वर्क्षं जन्मनक्षत्रं एके आचार्या अत्र उज्झति त
यान्योक्तं जन्मर्क्षे धीक्षयं विद्यादिति जन्मर्क्षं तु पुंविवाहान्नप्राशनादिषु बहुभिर्गृह्यते तदग्रे वक्ष्यते पुनः कस्मिन् सदृक्काणांशाह्नि दृक्काणः द्रेष्काणः अंशो नवांशः अह्नो दिनं ए
षां समाहारः सदृक्काणांशाहः सतां ग्रहस्य दृक्काणांशाहः सदृक्काणांशाहः तस्मिन् कथंभूते सदृक्काणांशाह्नि अचांद्रे न विद्यते चांद्रदृक्काणो यस्मिन् तदचांद्रं तस्मिन् चंद्रस्य दृक्का
शाहानि निंद्यानि क्षीणश्चेत् पूर्णे तु न दोषः अन्येषां शुभग्रहाणां शुभानीत्यर्थः पुनः कस्मिन् ध्रुवमृदुचरक्षिप्रभे ध्रुवादीनि प्रसिद्धानि पूर्वमेवोक्तानि तत्रेत्यर्थः

मासे षष्ठेष्टमे तु निगदितमशनं पंचमे सप्तमे वा भीरोरुज्झितनंदाहरिवसुरजनीरिक्तकास्वर्क्षमेके सदृक्काणांशान्ह्यचांद्रे ध्रुवमृदुचरक्षिप्रभेजा
लिमीनोनांगे केंद्रत्रिकोणान्त्यमूर्तिषु विमलास्विंदुरिष्टोखिलांगे ॥ ६ ॥

पुनः कस्मिन् अजालिमीनोनांगे अजो मेषः अलिर्वृश्चिकः मीनः प्रसिद्धः एभ्योन्यलग्ने
मेषवृश्चिकमीनलग्नान्यन्नप्राशनेन शुभानीत्यर्थः कासु सतीषु केंद्रत्रिकोणान्त्यमूर्तिषु विमलासु सतीषु केंद्राणि प्रथमचतुर्थसप्तमदशमानि त्रिकोणे नवपंचमे अंत्यं द्वा
दशं मूर्तिरष्टमं परवल्लिंगं द्वंद्वतत्पुरुषयोः एतासु विमलासु पापग्रहरहितासु सतीषु पापग्रहोऽत्र अनिष्टकारीत्यर्थः इंदुश्चंद्रः अखिलः पूर्णः अंगे लग्ने इष्टः अन्न
प्राशने पूर्णः चंद्रो लग्ने शुभ इत्यर्थः अन्यलग्नबलं पूर्ववत् अत्र नारदः षष्ठे मास्यष्टमे वापि पुंसां स्त्रीणां तु पंचमे सप्तमे मासि वा कार्यं नवान्नप्राशनं शिशोः रिक्तादि
नक्षयं नंदां द्वादशीमष्टमीममां त्यक्त्वान्यतिथयः श्रेष्ठाः प्राशने शुभवासराः इति ज्योतिर्विवरणे जन्मर्क्षे श्रीक्षयं विंद्यात्कर्मर्क्षे चातिसौख्यकृत् आधानर्क्षे च
बालानां प्राशने रोगनाशनं वृद्धनारदः जीवसौम्यसितानां तु दृक्काणादिवसांशकाः बालान्नप्राशने शस्ता न चंद्रार्कार्किजासृजामिति अर्णवे गोखेटाकुंभस्तलाक

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible] काइति नारदः चरस्थिरमृदुक्षिप्रनक्षत्रेषुननैधनेदृतिरवौ कुजे गुरौ षष्ठीत्याह ६ ॥ ॥ अथैतेषुसंस्कारेषुगुरुशुक्रास्तादिदोषाभावः येषुदोषाः बालत्ववृद्धत्वप्रमाणंशास्त्रेशास्यमौढ्येकिंनकार्यमिति चतुष्टयंदृत्तेकेनाह गर्भाद्यन्नाशनांतेषुगर्भाधानादिअन्नप्राशनांतेषु कर्मसुगुरुसितयोर्बाल्यवार्धक्ये परंमौढ्यंगुरुशुक्रमूढत्वंनजह्यात् नत्यजेत् कस्माद्धेतोः कालस्यरोधात् यतःशास्त्रेगर्भाधानादिअन्नप्राशनानांकर्मणांकालनिरोधः कृतोस्तितस्माद्धेतोः तथाचमांडव्यः नित्ययानेगृहेजीर्णेप्राशनांतेषुसंस्कृत वधूप्रवेशमांगल्येनमौढ्यंगुरुशुक्रयोरिति हरिगुरुसिंहस्थितंबृहस्पतिं याम्यमयनंदक्षिणायनं ऊनाधिमासौ क्षयमासाधिमासौनत्यजेत् कालस्यरोधादित्येतत्पदंबुध्यावगंतव्यं तद्यथा प्रसूतिसमयएवजातकर्मविहितं तत्रकालनिरोधात् किमप्यस्तादिकंनचिंत्यं अन्नप्राशनंतुमासेषष्ठेष्टमेवेतिविकल्पेनमासद्वयेविहितं तत्रयस्मिन्मासेमौढ्यादिकंनस्यात्तत्रकर्तव्यं कालस्यसावकाशत्वात् तयोरपिमासयोर्यदिसिंहस्थगुर्वादिनिरोधःस्यात् सोप्यत्रनचिंतनीयः एवंगर्भाद्यन्नाशनांतेषुविचारणीयं अनन्यगतिकंकुर्यान्नित्यंनैमित्तिकंतथेति स्मरणात्संस्कारक्रमस्तुकात्यायनगृह्यकारिकायामुक्तः गर्भाधानंपुंसवनंसीमंतोन्नयनंततःजातकर्माभिधेयंचनिष्क्रमप्राशनेक्रमात् चूडोपनयनंवेदव्रतानांचचतुष्टयं गोदानमेवलोन्मो कौविवाहः षोडशक्रियाइति अनेनक्रमेणगर्भाद्यन्नाशनांतेषुमौढ्यादिकंबुध्यावलोकयेदित्यर्थः तथाचबृहस्पतिः मासप्रयुक्तकार्येषुमूढत्वंगुरुशुक्रयोः नदोषकृत्तदामासलक्षणोबलवानिति यमोपिगर्भेवा पुंसिके मृतेश्राद्धकर्मणिमासिके सपिंडीकरणेनित्ये

गर्भाद्यन्नाशनांतेषुनगुरुसितयोर्बाल्यवार्धक्येचमौढ्यंजह्यात्कालस्यरोधात्हरिगुरुमयनंयाम्यमूनाधिमासौ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाधिमासावर्जयेत् मृगर्क्षसीमंतजातकादीनि प्राशनांतानि चक्रमात् कर्तव्यानि नदोषोस्तिपंचाननगनेगुराविति कात्यायनस्मृतौ गर्भाधानादिका अन्नप्राशनांता
मलिम्लुचे आकर्णवेधाः कर्तव्यानान्या इत्याह भास्कर इति ॥ अस्तादिकं चूडादिषु वर्जनीयमित्याह एतच्चौलादिषु इज्ञादिति एतद्गुरुसितास्तादिकं चूडादिषु क
र्मसु उज्झेत् त्यजेत् अथ बालत्ववृद्धत्वप्रमाणमाह अथ गुरुसितयोरिति गुरुसितयोर्गुरुशुक्रयो र्बाल्यवार्धैबालत्व वृद्धत्वेनगाहे स साहे स साहं बाल्यं समा
हं वार्धक्यमिति बालत्वं वृद्धत्वं बहुविधमस्ति तत्र प्रथमः पक्षो बांगीकृतः अथ शारवेशास्य अस्ते वर्ज्यमाह अथो शारवेशमौढ्य इति शारवेशो वेदपतिर्वक्ष्यमाणः

एतच्चौलादिषूज्झेदथगुरुसितयोर्बाल्यवार्धेनगाहे चाथोशारवेशमौढ्येव्रतमपिनियमारंभमार्योनकुर्यात् ॥ ७ ॥

तस्य मौढ्ये अस्ते व्रतं मौंजीबंधं निगमारंभमपि आर्यः श्रेष्ठो न कुर्यात् तस्यास्ते व्रतादि कृते सति बटोर्मूर्खत्वात् ननु वेदारंभे मूर्खत्वं घटते वेदपति
त्वात् व्रते मूर्खत्वं किमुक्तं उच्यते व्रतबंधस्तु वेदाध्ययनार्थं क्रियते तस्मात्तत्रापि मूर्खत्वं घटते तथा च याज्ञवल्क्यः उपनीय गुरुः शिष्यं महा
व्याहृतिपूर्वकं वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पंच वा ग्रहणांतिकमित्येके केशांतश्चैव षोडशेति यज्ञानां तपसां वै
व शुभानां चैव कर्मणां वेद एव द्विजातीनां निःश्रेयसकरः परः तथा च कात्यायनगृह्यसूत्रे वेदं समाप्य स्नायाद्ब्रह्मचर्यं वाष्टाचत्वारिंशकं द्वादशकेप्येके गुरुणानुज्ञात इत्यादि ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथचौलसानण्यपद्यत्त्वयेनाह कात्यवणोरोति आश्वमस्लोकनान्वयः चौलं चूडाकरणंमाघादिपंचसुमासेषु अमधुषुचैत्ररहितेषु गदितंउक्तं तथाचोक्तंनारदेन मा
घादिपंचकेचौलंहित्वाक्षीणाविधुंसकफमिति द्वित्रिपंचोन्मितेब्दे द्वितीयेतृतीयेपंचमेवर्षे सा॰वासद्वा स्वकुलाचारतोवा उक्तंचकात्यायनगृह्ये सांवत्सरिकस्यचूडाकरणं
तृतीयेवाप्रतिहतेषोडशवर्षस्यकेशांतोयथामंगलंवासर्वेषामिति सांवत्सरीकस्य अतिक्रांतान्दस्येतिहरिहरमिश्रैर्व्याख्यानंकृतं तथाचषड्गुरुशिष्यः आद्येब्देकुर्वंते
केचित्पंचमेन्येद्वितीयके उपनीत्यासहैवेतिविकल्पः कुलधर्मतइति सगर्भायदिभवतिजननीत्यत्रनोकार्यमेतत् अत्रउक्तवर्षेषुद्वित्रिपंचाब्दकेषुजननीकुमारस्यमाता
यदिसगर्भाभवतिस्यात्तदाएतच्चौलंनोकार्यं पंचमाब्दादूर्ध्वंगर्भिण्यांसत्यामपिकार्यमित्यर्थसिद्धं अत्रनारदः सूनोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत् पंचाब्दात्प्राग

चौलंमाघादिपंचस्वमधुषुगदितंद्वित्रिपंचोन्मितेब्देस्वाचाराद्वासगर्भायदिभवतिजननीत्यत्रनोकार्यमेतत् साकंयत्रोपनीत्याक्रि
यतइह तदायंनिरोधोनहिस्याज्जत्वादंबार्तवेदोव्रतमुपयमनंचाविशुद्धेः शुभार्थी ॥८॥

योर्ध्वंतुगर्भिण्यामपिकारयेत् उपनयनेनसहक्रियमा
णोनदोषइत्याह साकंयत्रोपनीत्याक्रियतइह तदायन्निरोधोनहिस्यादिति यत्रउपनीत्यासाकंउपनयनेनसहक्रियतेतदाइहास्मिन्चौले अयमुक्तोनिरोधस्त्रैवमास
मातृगर्भलक्षणोनस्यैवस्यात् तदुक्तंतेनैव सहोपनीत्याकुर्याच्चेत्तदादोषोनविद्यतेइति अंबार्तवेनिषेधमाह जत्वादंबार्तवेदोव्रतमुपनयनंचाविशुद्धेःशुभार्थीइति
अंबार्तवेमातृरजसिअदः अनंतरोक्तंचौलमित्यर्थः व्रतंमौंजी उपयमनंविवाहः आविशुद्धेः शुद्धिपर्यंतंशुभार्थीनरः एतत्त्रयंजत्वात् नकुर्यादित्यर्थः तथाचमनु
स्मृतौ उद्वाहव्रतचूडासुमातायदिरजस्वला तदानमंगलंकार्यंशुद्धौकार्यंशुभेप्सुभिः अन्यमुहूर्तालाभेकारिकानिबंधेशांतिरुक्ता अलाभेसुमुहूर्तस्यरजोदोषेतु
संस्थिते श्रियंसंपूज्यतत्कुर्याद्गृहहत्याभयंकरी हैमींमाषमितांपद्मांश्रीसूक्तविधिनार्चयेत् मत्पुत्रंपायसंहुत्वाभिषिच्यशुभमाचरेत् सूतिकोदक्ययोःशुद्धोगांदद्या
द्धोमपूर्वकं मासेकर्मणिशुद्धिः स्यादितरस्मिन्नशस्यतीति उदक्यारजस्वला ॥८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथवर्णविशेषेणवारविशेषंतथानक्षत्राणिलग्नबलंचवृत्तेनेनाह वर्णैर्ब्राह्मणादिभिः यथाक्रमेणइनारार्किशनिषुचौलकर्मकार्यमित्यन्वयः इनःसूर्यःआरोभौमःआर्किः
शनिःशनिःप्रसिद्धः तेष्वित्यर्थः एतदुक्तंभवति विप्रेणरविवारे क्षत्रियेणभौमवारे वैश्येनशनिवारे शूद्रेणापिशनिवारेचौलकर्मव्यमित्यर्थः शूद्रस्यद्वादशसंस्कारा
उक्ताः वेदव्रतोपनयनंमहानाम्नीमहाव्रतं विनाद्वादशशूद्राणांसंस्कारानाममंत्रनइतिनिखिलैरिति निखिलैश्चतुर्भिर्वर्णैरविशेषेणज्ञत्रयेबुधत्रयेशुक्लसोमेशुक्ल
पक्षगतसोमवारेकार्यं कृष्णपक्षेसोमवारोतिनिंदितःक्षीणत्वात् अत्रनारदः अपर्वरिक्तातिथिषुशुक्रेज्येंदुवासरेइति बृहस्पतिः सोमवारःसितेपक्षेकृष्णप
क्षेतिगर्हितः बुधवारःशुभःप्रोक्तः पापग्रहयुतेबुधे पापग्रहाणांवारादौविप्राणांशुभदोरविः क्षत्रियाणांक्षमासूनुर्विड्शूद्राणांशनिःशुभदइति कैः ज्यंत्यश्व्यादित्यशाक्रें

कार्यंवर्णैरिनारार्किशनिषुनिखिलैर्ज्ञत्रयेशुक्लसोमेज्यंत्यश्व्यादित्यशाक्रेंदुभिरिनहरितस्त्रिभिश्चौलकर्म ॥ द्यूनेकोरार्किशुक्रागतकविनि
खिलामृत्युगामृत्युदास्युर्व्यब्जाःसंतोंत्यइष्टाश्च जगुरुहशशिनोरात्रिसंध्येचयुक्ताः ॥ ९ ॥

दुभिः अंत्याद्वृइतिज्यंत्सरेवत्यश्विन्योव्यादित्यंपुनर्वसुःपुष्योशा
क्रंज्येष्ठाइंदुर्मृगः तैःपुनःकैः इनहरितस्त्रिभिः इनोहस्तः हरिःश्रवणः ताभ्यांत्रिभिः हस्तात्त्रिभिः श्रवणात्त्रिभिरित्यर्थः तथाचनारदः दस्रादितीज्यचंद्रेंद्रपू
षाभानिशुभान्यतः चौलकर्मणिहस्तर्क्षात्त्रिणित्रीणिचविष्णुभादिति द्यूनेकोरार्किशुक्राः अत्रचौलेमृत्युदास्युः द्यूनेसप्तमे अर्कारार्किशुक्राः अर्कःसूर्यः आरोभौ
मः अर्कस्यापत्यमार्किः शनिःशुक्रःप्रसिद्धः एतेचत्वारोमृत्युदाइति चतुर्णांसमानंफलमुक्तं वसिष्ठेनात्रविशेषफलमुक्तं जामित्रेभास्करेक्षौरेमृत्युःस्याद्भूमिजेतथा
शुक्रेसौख्यविनाशःस्यान्मंदभाग्यंशनैश्चरइति अत्रचतुर्णामपिसामान्येनमृत्युफलमुक्तं तद्दारिद्र्यान्मरणंवरमितिन्यायेननदोषः गतकविर्निखिलामृत्युगामृत्युदाः
स्युः गतःकविः शुक्रोयेभ्यस्तेगतकवयः तेचतेनिखिलाश्चशुक्ररहिताः सर्वेमृत्युगाः अष्टमगामृत्युदास्युः अत्रबृहस्पतिः अष्टमस्थानगाः सर्वेनेष्टाःशुक्रविवर्जिताः—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शक्रकृत्कानधनेक्षौरसर्वसंपत्प्रदः शशीशशिरिति व्यब्जाः रतोत्यइष्टाः विगतः अब्जः चंद्रोयेभ्यस्तेव्यब्जाः एवंविधाःसंतोसद्गृहाः चंद्ररहिताः सद्ग्रहाः अंत्येद्वादशेइष्टाः शोभ
नाःस्युः नारदः चौलान्नप्राशनेशस्ताःसौम्यग्रंभव्ययोपगाइति अन्यच्चननेधनेपौर्णीतांषीषष्ठ्यष्टांत्यविवर्जितइतिनस्यैववचनं अन्यल्लग्नबलंपूर्ववत् त्यजगुरुशशिनोरा
त्रिसंध्येचरिक्ताःशुहःषष्ठीशशीपूर्णिमास्यष्टमन्यत् क्रूरवारंनिशांरिक्तांपर्वसंध्यांचजन्मभंसद्भिर्विवर्जयेदेतन्नारदस्यवचोयथेति ॥९॥ अथप्रसंगात्क्षौरनिर्णयंसा
र्द्धवृत्तेनाह भुक्तः कृतभोजनः अभ्यक्तः कृताभ्यंगः उपवासीप्रसिद्धः ईश्वरजनोराजसेवकः समर्थोवायुवतीस्त्रीसौभाग्यवती भार्गवयस्काः पंचाशद्वर्षपर्यंतंपूर्ववयः
योगीराजयोगीगीतादौप्रसिद्धः यात्रायुद्धोन्मुखाःयात्राप्रयाणंयुद्धंप्रसिद्धं तौप्रतियेउन्मुखाः प्रचलिताः यात्रोन्मुखायुद्धोन्मुखाश्चेत्यर्थः अस्त्यंबकोजीवसितृकः कु

भुक्ताभ्यक्तोपवासीश्वरजनयुवतिभार्गवयस्काश्चयोगीयात्रायुद्धोन्मुखायेकृतदिनविधयोऽस्त्यंबकास्तेनमुंड्याः ॥ सीमंतो-
र्ध्वंनपत्न्यानखकचलवनंदूरदेशप्रयाणंहृक्षच्छेदःसमुद्राप्लुतिमृतहरणेस्याहतेवश्यकार्यात् ॥ १०॥ ७ ॥ ७ ॥

तोदिनविधिः आन्हिकर्ये कृतदिनविधयः तेनमुंड्याः मुंडनार्हानभवंति अवश्यकार्यादृतेइदंकृत्तरश्लोकोक्तम त्रानुसंधेयं यत्रावश्यकमुंडनकारणंभवतितत्राव
श्यंमुंड्याःअथक्षौरनिषेधप्रसंगाद्गुर्विणीपतेर्निषेधंसापवादमाह सीमंतोर्ध्वमिति सीमंतोर्ध्वंसीमंतोन्नयनादूर्ध्वंपत्युः कृतसीमंतसंस्कारायाः पत्युर्भर्तुरवश्य
कार्यादृतेनखकचलवनादिकंनस्यात् नखकचलवनं नखकेशच्छेदनं अन्यत्स्पष्टं अवश्यकार्यादृतेनस्यादित्यनेन आवश्यकेनदोषइत्यर्थात्सिद्धम् यथापितृम
रणेक्षौरादि देशविप्लवेदेशांतरगमनइत्यादिविचारणयाआवश्यकेनदोषइत्यर्थः कृताग्न्याधानस्यमुंडनपक्षांगीकारेमुंडनमावश्यकंमासिमास्युपासन्निकस्यप
क्षेपक्षेग्निहोत्रिणइति ॥१० ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु॰ मा॰
१५

अथोक्तेभ्योन्येषांक्षौरार्थंनक्षत्रादिकमाह चौलोक्तभादौक्षौरंगदितंप्रोक्तं चौलार्थमुक्तश्चौलोक्तः सचासौभादिश्चतस्मिन्नक्षत्रतिथ्यादिकालेक्षौरंगदितंप्रोक्तं अथक्षौर
निमित्तान्याह रविक्षेत्रगंगाध्वराग्न्याधानेपित्रोर्विनाशइत्यादि रविक्षेत्रंभास्करक्षेत्रम् गंगाप्रसिद्धाअध्वरोयागः अग्न्याधानंअग्निहोत्रं तस्मिन्पित्रोर्विनाशोमरणंत
स्मिन् द्विजनृपकथनेब्राह्मणाज्ञायां राजाज्ञायांचसत्यां सर्वदाक्षौरंइष्टंस्यात् क्षौरेनक्षत्रादिनियमोनास्तीत्यर्थः तदुक्तंवृत्तशते कृत्वाप्यक्तानिर शनैरित्यादि रत्नमा
लायां आज्ञयानरपतेर्द्विजन्मनामित्यादि बृहस्पतिः राजकार्येनियुक्तानांनराणांभूपसेविनां श्मश्रुलोमनखच्छेदेनास्तिकालविशोधनं ज्योतिर्निबंधे राजयोगीपुरंध्री
चमातापित्रोश्चजीवतोः मुंडनंसर्वतीर्थेषुनकुर्याद्गुर्विणीपतिः स्मृत्यंतरे सिंधुस्नानंद्रुमच्छेदंवपनंप्रेतवाहनं विदेशगमनंचैवनकुर्याद्गुर्विणीपतिः क्षौरंनैमित्तिकं

क्षौरंचौलोक्तभादौगदितमथरविक्षेत्रगंगाध्वराग्न्याधानेपित्रोर्विनाशेद्विजनृपकथनेसर्वदाक्षौरमिष्टं ॥ मित्रत्र्यर्कादितीज्यांतिमहरितुरगेःपंच
मेब्देव्रतात्प्राक्विद्यारंभोक्तकालेक्षरविधिरघटेसौम्यसंज्ञेयनेर्के ॥ ११ ॥

कुर्यान्निषेधेसत्यपिध्रुवं पित्रोःप्रेतविधानंचनदोषस्तत्रविद्यते गंगायांभास्कर
क्षेत्रेमातापित्रोर्मृतेहनि आधानेसोमपानेचषट्सुक्षौरंविधीयते अंतर्वत्न्यांतुजायायांतीर्थेक्षौरंनकारयेत् प्रेतवाहादिकंचैवसीमंतोन्नयनादनु पंचाशद्दायनात्पूर्वं
क्षौरंनैमित्तिकंविना नकुर्यात्ततऊर्ध्वंतुस्वेच्छयावपनंचरेत्इति अथाक्षरारंभंवृत्तार्धेनाह मित्रत्र्यर्केति मित्रादिभिर्नक्षत्रैः जन्मतः पंचमेवर्षेव्रतात् व्रतबंधात्प्राक्प्र
थमंविद्यारंभोक्तकालेवक्ष्यमाणलक्षणे अक्षरविधिः प्रथमाक्षरारंभविधिः शुभःस्यादित्यध्याहारः कस्मिन्सति सौम्यसंज्ञेअयनेअर्केसति कथंभूतेसौम्यसंज्ञेअ
यने अघटे नविद्यतेघटोयस्मिन्तथा तस्मिन्कुंभरहितउत्तरायणेइत्यर्थः ब्रह्मतुल्येअयनलक्षणं कर्किमृगादिषट्केनेचायनेदक्षिणसौम्यायनेस्तइति मित्रमनुराधा
त्र्यर्कहस्तत्रयं अदितिःपुनर्वसुः इज्योज्येष्ठा अंतिमंरेवती हरिःश्रवणा तुरंगोःश्विनीशेषंप्रथममेवव्याख्यातं व्रतात्प्रागित्यनेनव्रतबंधादुपरिनिषेधोअर्थात्सिद्धः पंचमेवर्षे

टी॰
१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पठनंकृत्वाव्रतबंधाग्रंस्यात तथाचाहबृहस्पतिःजन्मनोद्वितीयजन्मनः पूर्वमारभेताक्षरान्सुधीरिति उक्तंचसंग्रहे ॥ उदग्यातेभास्वतिपंचमेऽब्दे प्राप्तेऽक्षरस्वीकरणं
शिशूनां ॥ सरस्वतींविघ्नविनायकंचगुरुंडोदुनाद्यैरभिपूज्यकुर्यादिति नृसिंहः अक्षरस्वीकृतिः प्रोक्ताप्राप्तेपंचमहायने उत्तरायणगेसूर्येकुंभमासंविवर्जयेदि
ति ॥ १ ॥ ॥ अथब्रह्मक्षत्रविशांमुख्यंगौणंचव्रतबंधकालंवृत्तेनाह विप्रादेरिति गर्भतः गर्भाधानाज्जन्मतोवाअष्टशिवरविमितेअब्देविप्रादेर्व्रतंस्यात्
विप्रस्याष्टमे क्षत्रियस्यशिवमिते एकादशेवर्षेस्यात् वैश्यस्यरविमितेद्वादशेवर्षेस्यात् अत्रस्वस्ववर्षेजीवेगुरौअनिष्टेशुभेसत्यपिव्रतंकार्यं क्व अनिमिष
रविमधौ अनिमिषेरविः अनिमिषरविः अनिमिषरविणाविशिष्टोमधुः अनिमिषरविमधुः तस्मिन्मीनस्थेरवौसतिचैत्रेव्रतंकर्तव्यमित्यर्थः अब्दस्यदार्ढ्या

विप्रादेर्गर्भतोऽब्देष्टशिवरविमितेजन्मतोवाव्रतंस्यादत्रानिष्टेपिजीवेनिमिषरविमधौकार्यमब्दस्यदार्ढ्यात् ॥ ७ ॥ ७ ॥ ७ ॥

त् वर्षबलात् तदुक्तंसंग्रहे शुद्धिर्नविद्यतेयस्यवर्षेमासेऽष्टमेयदि चैत्रेमीनगतेभानौतस्योपनयनंशुभं ॥ जन्मभाद्दुष्टगेसिंहेनीचेवाशत्रुभेगुरौ मौंजी
बंधः शुभः प्रोक्तश्चैत्रेमीनगतेरवौ अशुभेऽब्देग्रहाःसर्वेशुभगोचरगाअपि शांत्यभावाच्छुभंनैवयात्यब्दःकालमृत्युवदिति अथगौणकालमाह स्वाब्दादू
र्ध्वक्रमादिति स्वाब्दात्स्ववर्षादूर्ध्वक्रमात् आद्विगुणितशरदः द्विगुणिताचासौशरच्चद्विगुणितशरद्वर्षं तांमर्यादीकृत्येति अथतस्याःअब्दक्रमेणानिंद्यं एत
दुक्तंभवति स्वाब्दादूर्ध्वंद्विगुणितस्ववर्षपर्यंतंअब्दक्रमेणानिंद्यं तद्यथा ब्राह्मणस्याष्टमंवर्षंमुख्यंतद्द्विगुणितंषोडशं अष्टवर्षात्षोडशपर्यंतंब्राह्मणस्य
एकादशवर्षात् द्वाविंशपर्यंतंक्षत्रियस्य द्वादशवर्षाच्चतुर्विंशतिवर्षपर्यंतंवैश्यस्य अब्दक्रमेणोत्तरोत्तरंनिंद्यं मर्यादतऊर्ध्वंअनधिकारिणोभवंतितदुक्तं
संग्रहे नृपा १६ कृति २२ जिना २४ ब्दांतं नातिकालस्ततःपरं पतितःस्यादग्रजादेर्व्रात्यस्तोमोविशोधनमिति तथाचकात्यायनसूत्रे आषोडशाद्ब्राह्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णस्यानतीतः कालोभवत्याद्वाविंशाद्राजन्यस्याचतुर्विंशाद्वैश्यस्याऽतऊर्ध्वंपतितसावित्रीकाभवंतिनैनानुपनयेयुर्नाध्यापयेयुर्नयाजयेयुर्नचैभिर्व्यवहरेयुः का लातिक्रमेनियतवत्त्रिपुरुषंपतितसावित्रीकाणामपत्येसंस्कारोनाध्यापनंतेषांसंस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वाकाममधीयीरन्व्यवहार्याभवंतीतिवचनादिति अथस्वा ब्दात्भागपिअध्ययनोत्सुक्यादुपनयन कालमाह पंचाष्टंकाब्दतोवेति पंचमाष्टमनवमवर्षेभ्यः सकाशादेषांब्रह्मक्षत्रविशांक्रमेणपठनरुचितः वेदादिपठनरु च्यातद्व्रतंशस्तमाहुर्मुनयः उक्तंचसंग्रहे ब्रह्मवर्चसमूर्जश्चविद्यायुःश्रीर्यशःस्मरवं विमादेरुपनीतस्यपंचाष्टकाब्दतःफलं अब्देरसाख्येद्विजपुंगवानांमौं जीनिबंधोनशुभप्रदःस्यात् यदातुजीवःशुभगोचरस्थस्तदातुनीदैर्व्रतबंधइष्टः ॥१२॥ ॥अथात्रगुरुबलाबलंवृत्तेनाह शशीरिति राशेर्जन्मराशेः

स्वाब्दाद्दूर्ध्वंक्रमादाद्विगुणितशरदोनिंद्यमब्दक्रमेणपंचाष्टंकाब्दतोवाभपठनरुचितःशस्तमेषांतदाहुः ॥१२॥ राशेःषड्व्या
यस्वस्थोगुरुरिहशुभदःपूजयास्यात्तयापिभांत्योंबुस्थोष्टमोनोयदिनिजगृहगस्तुंगगोत्राप्तिशस्तः॥ एवंकन्यर्क्षतःस्या
दितितरगुणितोलब्धयेवातिकालेनिष्टोपीह्द्विरच्यौष्टमभवनगतःशोभनःस्याच्चिरर्च्यः ॥१३॥ सकाशात् षड्व्यायस्वस्थोगुरुः इहा

हास्मिन्व्रतबंधेपूजयाशुभदःस्यात् षट्षष्ठंत्रित्रितृतीयम् आद्यंजन्मराशिः स्वंदशमं एषुतिष्ठतीतितथा तयापिपूजयापि भांत्योद्वादशः अंबुश्चतुर्थः अष्ट मःनशुभदःस्यात् पूजयापिअशुभदःस्यादित्यर्थः सर्यदिनिजगृहगः स्वगृहगः धनुर्मीनगइत्यर्थः तुंगगोवायदिभवतितदाइह्दुष्टस्थानेषुवर्तमानःश स्तःस्यात् अस्यतुंगंकर्कटः तदुक्तंबृहज्जातके अजवृषभमृगांगनाकुलीराझषवणिजोचदिवाकरादितुंगाः दश १० शिखि ३ मनुयुक् २८ तिथीं १५द्रि यांशो ५ स्त्रिनवक २७ विंशतिभिश्चतेस्तनीचाइति अर्थदुक्तस्थानेभोन्यस्थानगः शुभदःस्यात् एवंकन्यर्क्षतःस्यात् कन्यर्क्षतः कन्याराशेः सकाशात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमुक्तंशुभाशुभः स्यात् अतितरगुणिनो वरस्य लब्ध्ये अतिकाले वा अनिष्टोपि गुरुर्द्दिशा चतुर्थोष्टमोरिहर्च्यः षट्त्र्याद्यस्वस्थस्य शास्त्रे या पूजोक्ता तत्प्रमाणतोद्दिर च्यः तेनर्द्धिगुणार्च्चनेन शोभनः स्यात् एवं सामान्येनोक्ता अष्टमस्य विशेषमाह अष्टमभवनगत स्त्रिरर्च्यः तेन शोभनः स्यात् अत्र बृहस्पतिः झषचाप कुलीरस्थो जीवोप्यशुभगोचरः अतिशोभनतां दद्याद्विवाहोपनयादिषु व्रते जन्मत्रिरवारिस्थो जीवोपीष्टोर्चनात्सकृत् शुभोतिकालोतु र्योष्टव्ययस्थोद्विगु णार्चनात् उद्वाहतत्वे कन्यर्क्षाद्विसुताद्यनायनवमे श्रेष्ठो गुरुश्चान्यथा पूज्योष्टांत्यसुरवेतिकाल इह तु भाङ्गोद्विरच्यः शुभः रिःफांबुत्रिधिनाप्रमेर्यादिग्रहैः श्रेष्ठोपि विद्धो यसन्वामाद्विद्ध इहेष्टदो न निधने वेधस्त्रिरर्च्यः शुभ इति ॥१३॥ ॥अथ गुरोर्वामवेधमाह॥ द्वीषायागांकसंस्थो गुरुः स्तदा शुभः स्या

द्वीषायागांकसंस्थो व्ययजलनिधनत्र्यम्बगैश्चेन्नविद्धः शस्तो निष्टोपि वामं शुभ इह खचरैर्वेधितो नोष्टमस्थः॥
शुक्लेमाघादिपंचस्विनशुभदिवसे प्राग्दलेन्होव्रतं सत्त्यक्त्वानध्यायरिक्तातिथिमुनिमदनाश्चंद्रभागं प्रदोषं॥१४॥

त् तदा कदा यदि व्ययजलनिधनत्र्यम्बगैः खचरैर्नोविद्धः स्यात् द्वि द्वितीयं इषुपंचमं आयएकादशं अगाः सप्तमं अंकाः नवमं एतत्संस्थो गुरुः व्ययं द्वादशं जलं चतुर्थं निधनं अष्टमं त्रितृतीयं अम्बंदशमं एतत्संस्थैः खचरैः यदि नोविद्धो भवति तदा शुभः स्यात् २।५।११।७।९।१२।४।८।३।१०। वेधि तश्चेदशुभ इत्यर्थः अनिष्टोपि व्ययजलनिधनत्र्यम्बगोपि वामं विद्धः सन् द्वीषायागांकसंस्थैः खचरैः वेधितः सन्नित्यर्थः इह अस्मिन्व्रतबंधे विवाहे वा शुभः नोष्टमस्थः अष्टमस्थो वेधितो न शुभदः स्यादित्यर्थः सोतिकालादो त्रिगुणार्च्चनेनैव शुभः स्यात् तथा च बृहस्पतिः रजस्वला यदा कन्या गुरुशुद्धिं न चिंतयेत् अष्टमेपि प्रकर्तव्यो विवाहस्त्रिगुणार्च्चनात् अथोपनयने मासादिमाह शुक्ल इति शुक्ले शुक्लपक्षे माघादि पंचमासेषु ज्येष्ठांत्येषु इनशुभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु·मा·
१६

टी·

दिवसे इनः सूर्यः शशः वर्धमानेंदुः गुरुबुधशुक्राः एषांदिवसः तस्मिन् अहः प्राग्दले दिवसस्य पूर्वार्धे व्रतमुपनयनं सत्शुभं स्यात् किंकृत्वा अनध्यायरिक्तातिथिमु
निमदनान् चंद्रमागंमदोषंसत्यक्त्वा अनध्यायाः वक्ष्यमाणाः रिक्तास्तिथयश्चतुर्थीनवमीचतुर्दश्यः मुनिः सप्तमी मदनस्त्रयोदशी एतान् चंद्रभागः कर्कांशः पापांशादि
कंपुरैवभिषेधितं मदोषानध्यायप्रकरणोक्तः तंत्यक्त्वा ॥ १४ ॥ ॥ अथव्रतबंधेनक्षत्राण्याह· स्पष्टं उक्तंच मघाचभरणीज्येष्ठाविशाखांचैवकृत्तिका नक्षत्रपं
चकंमार्जैर्नग्राह्यंव्रतबंधने कस्मिन्सति वेदेशोवेदपतौ ज्ञेबुधेबलाढ्येसतिस्वस्थानादिनाबलसमृद्धेसति तेकेगुरुसितकुजवित्संज्ञकाः क्रमाद्वेदपाः वेदाधिपतयः
स्युः गुरुः ऋग्वेदस्य शुक्रोयजुर्वेदस्य कुजः सामवेदस्यवित्बुधोथर्वणवेदस्य पतिरित्यर्थः गुरुर्बृहस्पतिवारः ऋग्वेदस्यब्राह्मणास्तेषांगुरुवारेव्रतबंधः कार्यइत्य

शस्तोद्यशाग्निशाक्रांतकपित्र्यरहितैः सर्वेषांमौंजिबंधो वेदेशेज्ञेबलाढ्येगुरुसितकुजवित्संज्ञकावेदपाः स्युः ॥ स्वर्क्षोच्चांशेषुसौ
म्याः क्षितिपतिरपिचेत्केंद्रकोणस्थितास्युर्वर्णीविद्यार्थवेत्तापशुगृहधनवानत्रमंदेंत्यसेवी ॥ १५ ॥

र्थः ॥ सितः शुक्रवारः शुक्रवारेयजुषांमौंजीबंधो
अतिबलिष्ठइति ॥ कुजः भौमवारः भौमवासरेसामगानांव्रतबंधनंअतिशोभनंस्यात् ॥ वित्बुधः बुधवारेअथर्वशाखाध्यायिनांद्विजानांमेखलाबंधोतिबलिष्ठः उ
क्तैरितेमध्यफलदाःस्यादित्यर्थः ॥ तत्प्रसंगेनवारफलमाह मौंजीबंधः क्रूरगुरुसितज्ञेषुश्रीशार्यदायीकर्तुर्भ्वायुर्धिश्च समपिकरोत्यंशुमान्मध्यमोत्र नीहारांशोभवतिजड
तापंचतात्सूनिपुत्रेच्छापाख्यनावपिचसुनयः कीर्तयंत्येवमाद्याइतिवर्णास्तृतीयेः भौमरविवारेव्रतबंधोनेष्टः नइष्टफलदः केचिन्मतेसंकटात्रविवारोग्राह्यः भौमवारः
सामगैर्ग्राह्यः अन्यैरपिसंकटाभ्यामाह्यइत्यर्थः अथव्रतबंधेग्रहबलं संग्रहे चंद्रक्रूरास्तनौनेष्टाः सर्वेरंध्रव्ययेकविः ॥ सितेंदुलग्नपाः षष्ठेमौंजीविद्यादिकर्मसु ॥ इं
दुक्रूरैस्तनौस्वांशोक्रूरैः षड्भेशागेविधौ षडष्टोनेशुभैर्व्येंताष्टगेमौंज्यादिकंशुभमिति अथव्रतबंधेलग्नभंगमाह व्ययाष्टषष्ठगः शुक्रोलग्नपेंदूषडष्टमौंजीवोष्ट

१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मस्तनीच्क्रूराबदाः प्राणापहारकाः अथवा रंध्रे स्थानगतः शुक्रोलग्नेशोवाषडष्टमः चंद्रोरंध्रारिलग्नस्योबटोः प्राणापहारकाइति लग्नगोचरमाह स्वर्क्षोच्चांशेषुसौ-
म्याइति सौम्याः स्वोच्चस्वभांशेषुवर्तमानाः श्रुतिपतिरपिवेदपतिरपिस्वोच्चस्वभांशेवर्तमानश्चेद्यदिकेंद्रकोणेस्थितास्युस्तदा वर्णीब्रह्मचारीवेदार्थवेत्तास्यात् नकेवलंवेदार्थवेत्तास्यात् अपि
तुपरक्ष्यगृहधनवान्स्यात् अत्रकेंद्रकोणेशनौमंदेसति अंत्यसेवीअंत्यजनसेवकः स्यात्तस्मात्केंद्रकोणेशनिर्नभवितव्यः उक्तंचसंग्रहे केंद्रस्थितैरिनाद्यैर्नृपसेवीविड्क्रियः
स्वहस्तिश्चवेदाभ्यासीयज्वाक्रतुकर्ताहीनसेवकोभवति ॥१५॥ ॥अथलग्नभंगानाह चंद्रइति चंद्रक्रूराः क्रूरग्रहाः बिलग्नेतनौ शशिसितततुपाः षष्ठगेहे शशी
चंद्रः सितः शुक्रः तनुपोलग्नपः षष्ठगेहे सितः शुक्रः अंत्येद्वादशस्थाने शेषंसर्वगमं सर्वेरंध्रेअष्टमस्थाने एतेभवसेकंबटुघ्नाः बटुमारकाभवंति क्वचक्वचित् अन्यल
ग्नाभावेतनुगः लग्नगइनोरविः श्रेष्ठःस्यात् उक्तंचमौंजीपटले शुभदोबलवान्भानुर्लग्नगोदशमस्तथा सर्वशास्त्राधिपोयस्मात्सर्वेषांव्रतबंधने सर्वशास्त्राधिपोभा

चंद्रक्रूराविलग्नेशशिसिततनुपाः षष्ठगेहेसितोंत्येसर्वेरंध्रेबटुघ्नाः क्वचतनुगइनः श्रेष्ठउच्चेंदुरेके ॥ विद्यांमौंज्युक्तकालेस्थिरचरहरिजच्युत्तरब्रा
ह्महीनेमौंज्याऊर्ध्वंगणेशांगिरमपिविधिवत्पूजयित्वारभेत ॥१६॥

नुः केचिदूचुर्महर्षयः तस्मात्तस्यांतराभावेलग्नस्योर्कः प्रशस्यते उच्चेंदुरेकइति एकेमुनयः
उच्चेंदुः उच्चस्थचंद्रः तनुगश्चश्रेष्ठइतिवदंति तद्वाक्यं चंद्रोदयेभिशस्तः स्यात्क्षयारोगीसितेतरे सितेपक्षेभवेद्यज्वास्वर्क्षेतुंगेविशेषतइति अस्यार्थः सितेतरेकृष्ण
पक्षे चंद्रोदयेचंद्रयुक्तलग्नेसतिव्रतीअभिशस्तः स्यात् क्षयारोगींचस्यात् अभिशस्तोनाममिथ्याभिशस्तः मिथ्याभिशंसी अनेनेदंपातकंकृतमितियंलोकामिथ्यावदंति
सोभिशस्तः क्षयरोगीस्यात्इति कृष्णपक्षेलग्नस्थचंद्रफलमुक्तं सितेपक्षेभवेद्यज्वेतिवाक्यंस्पष्टं अयंश्लोकः पुनःसंस्कारविषयइतिभाति यतः कृष्णपक्षेव्रतबंधे-
लग्नस्थचंद्रस्यफलमुक्तं तस्यदिवाअसंभवात् पुनःसंस्कारार्हस्यतुकर्मलोपभयात् रात्रावपिसंस्कारोविहितोनान्यस्य प्रथमव्रतबंधस्तुसर्वैर्ग्रंथकारैर्दिवैवपूर्वाण्हेवि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हितोनरात्रौ अतः कारणादिदंवचनं पुनःसंस्कारविषयंप्रतिभाति पुनःसंस्कारनिमित्तानि धर्मशास्त्रप्रसिद्धानि तादृशंवाक्यंरत्नमालायां त्रिषट्स्वगोर्कस्त्रिधनास्त कर्मगश्चंद्रस्त्रिषष्ठाः शनिराहुभौमाः सर्वेचलाभेत्रत्रिकोणकेंद्रगाः शशाशशास्तुव्रतबंधकालइति अत्रतृतीयस्यषष्ठस्यसूर्यस्यशभिगतलग्नेसंभवः नारदेनतुलग्नस्थचं द्रोनिंदितएव तद्वाक्यमेवं स्वोच्चसंस्थोपिशीतांशुर्व्रतिनोयदिलग्नगः तंकरोतिशिशुं निःस्वंसततंक्षयरोगिणमिति अन्यलग्नबलंपूर्ववत् अन्यच्चग्रंथांतरेपि स्फू र्जितकेंद्रगेभानौव्रतिनोवंशनाशनं कूजितकेंद्रगेभौमेशिष्याचार्यविनाशनं करोतिरुदितंकेंद्रेसंस्थेमंदेतुलागदाच्च लग्नात्केंद्रगतेराहौरंध्रेमातृविनाशनं उग्रकें द्रगतेकेतौव्रतीवित्तविनाशनं पंचदोषांतरेलग्नंशशदंचोपनायनमिति अथविद्यारंभंवृत्तार्धेनाह विद्यांमौंज्युक्तकालइति मौंज्याऊर्ध्वंमौंज्युक्तकालेविद्याम

केशांतंचौलवत्स्यान्नृपमितशरदीस्याहुरार्याव्रतोक्तेकालेमौंजीविमोकंगुरुबलमनयोर्नावलोक्यंसुधीभिः ॥

रभेत मौंज्यर्थमुक्तः मौंज्युक्तःसचासौकालश्चतस्मिन्विद्यांवेदंआरभेत मौंज्याऊर्ध्वमित्यनेनमौंज्याः प्रागनधिकारःसूचितः किंकृत्वा गणेशंगिरमपिसरस्व तीमपिविधिवद्विध्युक्तमार्गेणपूजयित्वा कथंभूतेमौंज्युक्तकालेस्थिरचरहरिजच्युत्तरब्राह्महीने स्थिरचरहरिजंस्थिरलग्नंचरलग्नंतिसृणामुत्तराणांसमाहार- स्त्र्युत्तरं ब्राह्मंरोहिणी एभिर्हीनेरहितेमौंज्यर्थमेतानिगर्हितानिविद्यारंभेअग्राह्याणीत्यर्थः जाड्यंस्थिरेव्यंगेलग्नेसुविद्याप्तिः चरेभ्रमइतिश्रवणात् ॥१८॥ ॥अथके शांतंमौंजीविमोक्षंचवृत्तार्धेनाह केशांतमिति केशांतकर्म नृपमितशरदिषोडशेवर्षेचौलवत्स्यादित्यार्याआहुः सर्वंचौलोक्तम त्राह्यमित्यर्थः व्रतोक्तेकालेमौंजीविमो क्षमाहुः स्पष्टं अनयोःकेशांतमौंजीविमोक्षयोः गुरुबलंसुधीभिर्नावलोक्यं सर्वत्रत्याज्यप्रकरणोदितंविलोक्यं अथशूद्राणांमौंज्यभावात् छुरिकाबंधंवृत्तार्धेनाह शूद्राणांमौंज्यभावात् तद्वदिततिथिभेमौंज्युक्ततिथिनक्षत्रे अनस्तभौमेज्यशुक्रे उदितेः भौमगुरुशुक्रैः व्यारेवारेआरोभौमः तद्रहितवारे लवेनवांशेयत्रकुत्रापिल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्नेभौमनवांशवर्जितइत्यर्थः उपयमाविहितमासीविवाहोक्तमासेविवाहोपयमोसमावित्यमरः छूरिकाबंधंकटिप्रदेशेछूरिकाबंधंमुनयः आहुः तथाच्चसंग्रहे शूद्राणांरा
जपुत्राणांमौंज्यभावेस्त्रबंधनं मौंजीभावोक्ततिथ्यादौकार्यंभौमदिनंविना तथाचनारदः छूरिकाबंधनंवक्ष्येनृपाणांप्राक्करग्रहात् विवाहोक्तेषुमासेषुशुक्लपक्षेप्यन
स्तगे जीवशुक्रेचभूपुत्रेचंद्रताराबलान्विते मौंजीबंधर्क्षतिथिषुकुजवर्जितवासरे तेषांनवांशकेकर्तुरष्टमोदयवर्जिते शुद्धेष्टमेविधौलग्नेषडष्टांत्यविवर्जिते धन-
त्रिकोणकेंद्रस्थैः शुभैस्त्र्यायारिगैः परैःछूरिकाबंधनंकार्यमर्चयित्वासुरान्पितॄन् अर्चयेछूरिकांसम्यक्देवतानांचसन्निधौ ततःसुलग्नेबध्नीयात्कट्यांलक्षणसं

शूद्राणांमौंज्यभावात्तदुदिततिथिभेनस्तभौमेज्यशुक्रैर्व्यारेवारेलवेमास्युपयमविहितेछूरि
काबंधमाहुः॥ ७ ॥ ७ ॥इतिमुहूर्तमार्तंडेसंस्कारप्रकरणंसमाप्तं॥ ॥

युतां तस्यास्तुलक्षणंवक्ष्येयदुक्तंब्रह्मणापुरा संमितंछूरिकायामंविस्तारेणैवताडयेत् भाजितंगजसंख्येभ्यअंगुलान्परिकल्पयेत् शेषंचैवफलंवक्ष्येध्वजाये
धनवान्भवेत् धूम्रायेमरणंसिंहेजयःश्वायेनिरोगिता धनलाभोवृषेस्यांतदुःखीभवतिगर्दभे गजायेस्यांतसंप्रीतिर्ध्वांक्षेवित्तविनाशनमिति सर्वत्रत्या
ज्यप्रकरणोक्तंविलोक्यं अस्मिन्प्रकरणे कर्णवेधवृत्तंविनासर्वाणिस्रग्धरावृत्तानि २० इतिस्वोक्तमुहूर्तमार्तंडटीकायां मार्तंडवल्लभायांगर्भाधा
नादिसंस्कारप्रकरणंसमाप्तं॥ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ विवाहप्रकरणं विवक्षुस्तावत् घटितगुणविचारं द्वादशभिर्वृत्तैराह शुद्धामिति अतःपरं अत्र ग्रंथे वृत्तानि सर्वाणि शार्दूलविक्रीडितानि वरः गोत्रकुलादिभिः शुद्धां कांतां कमनीयां कन्यां उद्वहेत् चकाराद्वरोपि एवंविधोभाव्यः गोत्रशुद्धिर्ग्रंथांतरात् ज्ञातव्या कुलमपि पंचमीसप्तमीनिर्णयमपि एतद्द्वयं ग्रंथांतराज्ज्ञात्वा अन्यदत्रावलोकयेत् अथ यथोत्तरं बलिष्ठं घटितक्रममाह वर्णइति वर्णः१ वश्यं २ भं३ योनिः ४ खेचराः ५ गणाः ६ कूटं ७ नाडी ८ क्रमाद्भिन्नाः यथोत्तरं बलिनः स्युः अष्टौ दूर्ध्वं अष्टादशाधिकं गुणैक्यं यथोत्तरं स्याच्छुभं तत्रादौ वर्णलक्षणमाह झषात् मीनात् सकाशात् द्विभसुरवाः ब्राह्मणादयो वर्णाः

शुद्धां गोत्रकुलादिभिर्गुणयुतां कांतां वरश्चोद्वहेद्वर्णो वश्यभयोनिखेचरगणाः कूटं च नाडी क्रमात् ॥ ॥
वर्णाद्या बलिनो यथोत्तरमहीं दूर्ध्वं गुणैक्यं शुभं वर्णा द्विभसुरवा झषादिह वरो वर्णोत्तमः स्याच्छुभः ॥१॥ ॥

पुनर्गणनया ज्ञेयाः तद्यथा मीनो ब्राह्मणः मेषः क्षत्रियः वृषो वैश्यः मिथुनः शूद्रः पुनः कर्को ब्राह्मणः सिंहः क्षत्रिय इत्यादि उक्तं च मीनालिकर्कटा विप्रा नृपा सिंहाजधन्विनः कन्यानक्रवृषा वैश्याः शूद्रा युग्मघटा तुला इति इहास्मिन् राशिमेलने वर्णोत्तमो वरः शुभः स्यात् कन्यापेक्षया वर्णोत्तमो वरः शुभः स्यात् नान्यथेत्यर्थः सिद्धं ॥१॥ ७ ७ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथवृत्तार्धेनवश्यमाह ॥ नुभक्ष्याइति ॥ नुः नृराशिः मनुष्यराशेः जलजाजलचराभक्ष्याः तस्यैवविहरयः सर्वेवश्याः विगतः हरिः सिंहोयेभ्यः तेविहरयः सिंहर
हिताः सर्वेवश्याइत्यर्थः हरेः सिंहस्यविकौर्प्याविश्याः कौर्प्योवृश्चिकः विगतः कौर्प्येयेभ्यस्तेविकौर्प्याः सिंहस्यवृश्चिकरहिताः सर्वेराशयोवश्याइत्यर्थः ॥ अस्या
नंतरोक्तस्यहरेः अलिर्वृश्चिकोनशुभः वैरीत्यर्थः नुः मनुष्यराशेः अब्जाहरयोनेष्टाः स्फुः अब्जाः जलजाः हरिः सिंहः एतेनेष्टाः मेलनंनकर्तव्यमित्यर्थः ॥ अन्य
ज्जनात् अन्यत् वश्यभक्ष्यादिकंजनाज्ज्ञेयम् ॥ तद्यथा ॥ मनुष्यस्य गौर्वश्याभवति अत्रपरस्परंमित्रत्वंचदृश्यते तस्मादनयोर्मेलनंशुभंस्यात् इदमेवम्ले
च्छजातीयवधूवरयोर्नशुभम् म्लेच्छानांगौर्भक्ष्यं इत्येवंलोकप्रचारतोविचारणीयमित्यर्थः राशिस्वरूपंबृहज्जातकवशादवगंतव्यं बृहज्जातके मत्स्यौघ

नुर्भक्ष्याजलजावशाविहरयोवश्याविकौर्प्याहरेरस्यालिर्नशुभोनुर ब्जाहरयोनेष्टाः स्फुरन्यज्जनात् ॥ भेगण्येंकहृतेमिथस्त्र्यगशराः
शेषंनसच्चाश्विभादश्वेभाव्यहिभोगिनःश्ववृषशुङ्मेषाखुशुक्द्युंदुराः ॥ २ ॥

टीनृमिथुनंसगदंसवीणंचापीनरोश्वजघनोमकरोमृगास्यः
तौलीससस्यदहनाप्लवगाचकन्याशेषाःस्वनामसदृशाःस्वचराश्चसर्वे ॥ अथभयोनी द्वावपिवृत्तेनैकेनाह ॥ भेगण्येति मिथः परस्परं वधूवरयो र्भेनक्षत्रे वधून
क्षत्राद्वरनक्षत्रंगण्यं वरनक्षत्रात्कन्यानक्षत्रंगण्यं उभेअपिअंकहृते नवभिर्भाजितेकार्ये शेषंचत्र्यगशराः त्रिसप्तपंचभवंतितदानसत्स्यात् नशोभनंस्यात्
अथयोनिमाह अश्विभादिति अश्विभात्सकाशाद्भानांनक्षत्राणां अश्वादयोयोनयोभवंति अश्वोःश्विन्याः इभोहस्ती भरण्याः अविर्मेषः कृत्तिकायाः अ
हिः सर्पोरोहिण्याः भोगीसर्पः मृगस्य श्वा श्वानःआर्द्रायाः वृषं उंदुरं शुनक्तीतिवृष शुक् मार्जारः पुनर्वसोः मेषः प्रसिद्धःपुष्यस्य आखुशुक् मार्जार आश्लेषा
याः द्युंदुरो द्वौउंदुरो मघापूर्वाफल्गुन्योः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गौरुत्तराफल्गुन्याः काली महिषीहस्तस्य पशुर्भुक्व्याघ्रश्चित्रायाः महिषीस्वात्याः पशुर्द्विद्व्याघ्रौ विशाखायाः द्वौ मृगौ अनुराधाज्येष्ठयोः श्वा मूलस्य कपिर्वानरः पूर्वाषाढायाः द्वौ बभ्रू उत्तराषाढाभिजितोः बभ्रूनकुलौ कपिर्वानरः श्रवणस्य सिंहो धनिष्ठायाः वाजी अश्वः शततारकायाः हरिः सिंहः पूर्वाभाद्रपदायाः गौरुत्तराभाद्रपदायाः नागो हस्ती रेवत्याः इति योनिमभिधाय योनिवैरमाह सिंहेभमिति सिंहश्च इभश्च सिंहेभं सिंहगजं महिषाश्वं ओतुरवनकं मार्जारोंदुरं श्वैणं श्वानमृगं कीशाविं वानरमेषं गोव्याघ्रं बभ्रुफणिः नकुलसर्पं इति वैरं भीरुवरयोः वधूवरयोः प्रेष्येशयोः प्रेष्यः सेवकः इश स्वामी एतयोश्च त्यजेत् वर्जयेत् ॥ ३ ॥ अथ ग्रहाणां वैरावैरं विवक्षुस्तावद्राशिनाथानाह भेशा इति क्रियान्मेषात्सकाशात् भानां राशीनामीशाः भेशाः एते क्रमेण

गोः कालीपशुभुङ्महिष्यथ पशुर्द्विद्वौ मृगौ श्वा कपिर्द्वौ बभ्रू कपिसिंहवाजिहरिगोनागाः क्रमाद्योनयः ॥ सिंहेभं महिषाश्वमोतुरवनकं श्वैणं च कीशाविगोव्याघ्रं बभ्रुफणीति भीरुवरयोः प्रेष्येशयोश्च त्यजेत् ॥ ३ ॥ भेशा मंशुबुचंरबुशुमगुशाः शौगुः क्रियात्सूरवेर्मित्राणीज्यकुजेंदवः शनिसितौ शत्रू विधोर्नौ रिपुः ॥ मित्रे सूर्यविदौ कुजस्य विदरिः सूर्येंदुजीवा हिता ज्ञस्यार्कास्फुजितौ हितौ विधुररिः सूरेः सितज्ञावरी ॥ ४ ॥

स्फुः मं मंगलो मेषस्य शुक्रः वृषभस्येत्यादि स्पष्टं रवेः सूर्यस्य ईज्यकुजेंदवो मित्राणि ईज्यो गुरुः कुजो भौमः इंदुश्चंद्रः एते मित्राणि सुहृदः शनिसितौ शत्रू शनिः प्रसिद्धः सितः शुक्रः एतौ शत्रू वैरिणौ अर्थादन्ये उदासीनाः ॥ विधोर्नौ रिपुः विधोश्चंद्रस्य रिपुर्नास्ति सूर्यबुधौ मित्रे अन्ये सर्वे उदासीनाः कुजस्य भौमस्य वित् बुधः अरिः सूर्येंदुजीवाः हिताः मित्राणि अन्यौ समौ ज्ञस्य बुधस्य अर्कास्फुजितौ रविशुक्रौ हितौ मित्रे विधुश्चंद्रः अरिः वैरी अन्ये समाः सूरेः गुरोः सितज्ञौ शुक्रबुधौ अरी वैरिणौ ४ अर्ककुजेंदवः रविभौमचंद्राः मित्राणि अन्ये समाः भृगुभुवः भृगोर्भवतीति भृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुरुः तस्य भृगुसुवः शुक्रस्य रवींदू सूर्यचंद्रौ शत्रू वैरिणौ मंदज्ञौ शनिबुधौ हितौ मित्रे अन्येसमाः शनेः कुजेंदुरवयः अरयः वैरिणः सितज्ञौ मित्रे अन्येसमाः अथगणमाह पूर्वार्द्रांतकमिति पूर्वास्तिस्रः आर्द्रा प्रसिद्धा अंतकं भरणी कः रोहिणी उत्तरास्तिस्रः एवं नक्षत्रनवकं नरि भवति नृगणमित्यर्थः अर्कोहस्तः अंत्यं रेवती अदितिः पुनर्वसुः ईज्यः पुष्यः अनिलं स्वाती इंदुर्मृगः श्रुतिः श्रवणः अश्विनी प्र० मैत्रं अनुराधा एतन्नक्षत्रनवकं सुरे देवे भवति देवगणमित्यर्थः अन्यत् उर्वरितं कृत्तिका आश्लेषा मघा चित्रा विशाखा ज्येष्ठा धनिष्ठा मूलं शततारका एतन्नक्षत्रनवकं असुरे भवति रक्षोगणमित्यर्थः दैत्यैर्नृ

मित्राण्यर्ककुजेंदवोऽथ भृगुजस्यारी रवींदू हितौ मंदज्ञौ च शनेः कुजेंदुरवयो नेष्टाः सितज्ञौ हितौ ॥ पूर्वार्द्रांतककोत्तरं नरि सुरे ऽर्कांत्यादितीज्यानिलेंदुश्रुत्यश्विनिमित्रमन्यदसुरे दैत्यैर्नृणां स्यान्मृतिः ॥ ५ ॥ स्याद्देवासुरयोः कलिर्नृसुरयोर्मध्यं स्वयोः सौहृदं नैःस्वं द्विव्ययके षडष्टसु विपद्वैपुत्र्यमर्थांकके ॥ शेषेः र्थाविविधा विभैकचरणे भिन्नर्क्षराश्येककं भिन्नांघ्र्येकभमेतयोर्गणखगौ नाडीं नृदूरं न च ॥ ६ ॥

णां मृतिर्भवति ५ देवासुरयोर्देवदैत्ययोः कलिः स्यात् नृसुरयोर्नृदेवयोर्मध्यं स्यात् स्वयोर्मेलैसौहृदं स्यात् अथकूटमाह नैःस्वमिति द्विव्ययके द्विर्द्वादशे नैःस्वं निःस्वस्य भावो नैःस्वं निर्धनं स्यात् षडष्टसु विपत् मरणं स्यात् वैपुत्र्यमर्थांकके अर्थांकके पंचमनवमे वैपुत्र्यं अनपत्यं स्यात् शेषे उर्वरिते तृतीयैकादशे चतुर्थदशमे उभयसप्तमे एकर्क्षे विविधार्थाः धनपुत्रैश्वर्यादयः स्युः कथंभूते शेषे विभैकचरणे विगतं भैकचरणं नक्षत्रैकचरणं यस्मात्तथा तस्मिन्नक्षत्रचरणे कूटे अनिष्टं फलं श्रूयते [illegible]राशौ [illegible]मोद्वाहएकमांशे मृतिप्रदइति एकर्क्षस्यचत्वारो भेदाः एकराशिर्भिन्नर्क्षं एकर्क्षंभिन्नराशिकं एकराशिनक्षत्रभिन्नचरणं एकराशिनक्षत्रचरण[illegible]मितिचत्वारो भेदाः तत्र एकराशिनक्षत्रचरणं निंदितं विभैकचरणइति अथशुभे भकूटे यद्भिन्नर्क्षराश्येककं राश्येकत्वं यच्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिन्नांघ्रैकभं एतयोर्द्वयोर्गणो वर्गोनाडीनृदूरंचन अत्रकिमपिनावलोक्यंशुभमित्यर्थः नृदूरंवक्ष्यमाणं भिन्नांघ्र्येकभमित्यत्रभेदद्वयमागतंभवति एकर्क्षभिन्न राशिकं अपरंएकराशिनक्षत्रो भिन्नचरणं तस्मात्एकराशिनक्षत्रचरणंत्यक्त्वा त्रिषुभेदेषुगणाधिकंनचिंतयेत् तत्रगणादिदोषेसत्यपिशुभंस्यादित्यर्थः उक्तं चबृहस्पतिना एकराशौपृथग्धिष्ण्येपृथक्राशौतथैकभे गणनाडीनृदूरंचग्रहवैरंनचिंतयेत् कालनिर्णये दंपत्योरेकनक्षत्रेभिन्नपादेशुभावहं दंपत्योरेक पादेतुवर्षांतेमरणंध्रुवमिति॥६॥ अथग्राह्यषट्काष्टकंद्विर्द्वादशंचाह षट्काष्टेसति समभंकर्ककन्यादिचेद्यदिषष्ठसहितंस्यात्तदाशोभनंस्यात् ग्राह्यंस्यादि त्यर्थः तद्यथा वृषःसमभंतस्मात्सकाशात्षष्ठेनतुलाधरेणसहितंयदिभवतितदाग्राह्यंस्यादित्यर्थः तत्स्वामिनोर्मैत्रीभावात् समभंअष्टमेनसमंनग्राह्यं एव

षट्काष्टेसमभंचषष्ठसहितंचेच्छोभनंस्यात्समंभंद्विर्द्वादशकेद्वितीयसहितंश्रेष्ठंस्त्रियायुग्घरिः॥ मूलेंद्राकभपाशयजैकचरणादित्यार्य मेशाश्विभैर्याम्येंद्वीज्यभमित्रभाग्यवसूभत्वाष्ट्रांबुहिर्बुध्न्यभैः॥७॥ अन्यैर्नाड्यइहैकनाडिनवकेस्यात्तांद्विभेचेन्मृतिः

मेवग्राह्याग्राह्यंविलो कयेत् अथग्राह्यंद्विर्द्वादशंचाह द्विर्द्वादशकेसमभंद्वितीयसहितंयदाभवतितदाश्रेष्ठंशोभनंस्यात् विपरीतंअसत् तत्रसिंहेविशेषमाह स्त्रियायुग्घरिरिति विष मोपिसिंहः स्त्रियाकन्ययायुक्युक्तःश्रेष्ठः अथनाडीमाह मूलेति अत्रश्लोके तृतीयांतैस्त्रिभिःपादैस्तिस्रोनाड्यःसूचिताः मूलंप्रसिद्धं इंद्रोज्येष्ठा अर्कभंह स्तः पाशी शततारका अजैकचरणंपूर्वाभाद्रपदा आदित्यंपुनर्वसुः अर्यमाउत्तराफल्गुनी ईशाआर्द्रा अश्विभंअश्विनी एभिर्नक्षत्रनवकैरेकनाडीभवति या म्यंभरणी इंदुर्मृगः ईज्यभंपुष्यः मित्रंअनुराधा भाग्यंपूर्वाफल्गुनी वसुभंधनिष्ठा त्वाष्ट्रंचित्रा अंबुपूर्वाषाढा अहिर्बुध्न्यंउत्तराभाद्रपदा एभिर्नक्षत्रनवकै रेकनाडीभवति ७ अन्यैरुर्वरितैर्नवभिरेकनाडी एवंतिस्रोनाड्योभवंति इहविवाहविषये यदाएकनाडीनवकेद्विभे द्वयोर्वधूवरयोर्भिन्नक्षत्रेचेत्स्यात्तांतदामृतिर्मरणंस्यात्

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथगौतम्यादिदक्षिणेदेशेक्षत्रियादीनांच अन्यवध्व लाभेगतिमाह गोदादक्षिणतः गोदागौतमीतस्याः दक्षिणतः दक्षिणेदेशे सर्वेष्ववर्णेषु नृपसुरवेक्षत्रियादौ
सर्वदेशस्येक्कचित् अन्यकन्यकायाः अलाभेसति पार्श्वैकनाडीहिता शुभास्यान्नमध्यनाडी उक्तंचरत्नकोशे अग्रनाडीव्यधेभर्तामध्यनाडीव्यधेद्वयं पृष्ठनाडी
व्यधेकन्याम्रियतेनात्रसंशयः समासन्नेव्यधेशीघ्रंदूरव्यधेचिरेणतु वेधांतरप्रमाणेननवर्षैर्दुष्टंप्रजायतइति ब्राह्मणविषयम् जठरेनिर्धनत्वंचगर्भेमरणमेवच
पृष्ठेदौर्भाग्यमाप्नोतितस्मात्तांपरिवर्जयेदितिक्षत्रियादिविषयम् ज्योतिःप्रकाशे निधनंमध्यनाड्यांचदंपत्योर्नैवपार्श्वयोः नाड्योरिति अस्यव्यवस्यातन्त्रैवो-
क्ता करग्रहेपृष्ठनाड्यौनर्निंद्ये इतियदुक्तः अथसर्ववर्णैकनाड्यांह्यपवादः वसिष्ठेनोक्तः वन्हिप्रजारौद्रदितिश्वमेन अर्यम्णहस्तेत्वनलाग्निशाक्रं विश्वेशवि-

गोदादक्षिणतः क्वचिन्नृपसुरवेपार्श्वैकनाडीहिता ॥ मैत्र्याद्विव्ययमर्थनंदमपिसत्षट्काष्टकंवश्यतः षड्भिः स्त्रीनृगणावरोस्त्रपग
णः सत्कूटमैत्र्योस्तदा ॥ ८ ॥ रक्षस्त्रीनृपुमान्यदावशसुरवेः षड्भिर्युतंशोभनंस्त्रीभान्नानिकटेनृदूरमशुभंखेटोडुमैत्र्योःशुभम् ॥

ष्योर्वरुणौजपादाएकाधिपत्येनहिनाडिदोषइति ऐकाधिपत्येएतदेवएकस्वामिनोऐकाधिपत्यंन तत्क्षत्रियादिविषयं गौतमीयाम्यतस्तथेति अथपूर्वोक्तानां
द्विर्द्वादशादीनांशुभत्वमाह मैत्र्येति मैत्र्यांगृहमैत्र्यांद्विव्ययंद्विर्द्वादशं अर्थनंदं पंचमनवमंसत्शुभंस्यात् वश्यादिषड्भिः षट्काष्टकंशुभंस्यात् वश्यभयोनि
खेचरनाडीभिः षडष्टकंशुभंस्यादित्यर्थः अथयदास्त्रीनृगणावरोस्त्रपगणो रक्षोगणः स्यात्तदातन्मेलनंसत् कूटमैत्र्योः सत्योः शुभंस्यात् ८ अथयदा रक्ष-
स्त्री रक्षोगणस्त्री नृपुमान्[illegible] पुरुषः स्यात् तदावशसुरवेः षड्भिः वश्यभयोनिखेचरकूटनाडीत्येतैः षड्भिर्युतंतन्मेलनंशुभंस्यात् अथनृदूरंसापवादमाह
स्त्रीभादिति स्त्रीनक्षत्रा[illegible]इतिनृनक्षत्रंयदिनिकटेसमीपेभवतितदानृदूरंसापवादंस्यात् कथंभूतंनृदूरं अशुभंअशुभफलदं इदंनृदूरंखेटोडुमैत्र्योः
सत्योःशुभंस्यात् उडुमैत्रीनक्षत्रमैत्रीयोनिमैत्रीतियावत् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथसंकटेदुष्टकूटादोदानमाह द्यर्केति द्यर्केद्विर्द्वादशेताम्रस्त्रवर्णादिदत्वाउद्वहेत् अष्टरिपुकेषडष्टकेगोयुग्मंगोमिथुनंदत्वाउद्वहेत् अर्थांकिके पंचमन
वकेरौप्यंकांस्यंदत्वोद्वहेत् अथैकनाड्यांदानमाह एकनाडियुजिगोस्वर्णादिदत्वोद्वहेत् एकनाडीयोगेगोस्वर्णान्नवस्त्राणिबहूनिदत्वोद्वहेत् तथा
च राजमार्तंडे षडष्टकेगोमिथुनंप्रदद्यात्कांस्यंसरौप्यंनवपंचमेच नाड्यांतुधेन्वन्नस्त्रवर्णवस्त्रंद्विर्द्वादशेब्राह्मणतर्पणंच उद्वाहवत्वे ताम्रंहेमधनव्यये
रजतयुक्तांस्यंशरांकेवृषंगांदद्याच्चषडष्टकेद्विजभुजिस्वर्णंचनाडीयुताविति ९ अथगुणविचारंत्रिभिर्वृत्तैराह तत्रादौवर्णगुणविचारमाह भूर्वर्णैक्य
इति भूरित्यादि वर्णैक्यवरोत्तमेभूरेकोगुणोज्ञेयः वर्णयोरैक्यंयस्मिन् घटितेतद्वर्णैक्यं. वरउत्तमोयस्मिन्तद्वरोत्तमंच उभयत्रापिएकेकोगुणोज्ञेयः

द्यर्केताम्रस्त्रवर्णमष्टरिपुकेगोयुग्ममर्थांकके रौप्यंकांस्यमथैकनाडियुजिगोस्वर्णादिदत्वोद्वहेत् ॥ ९ ॥
भूर्वर्णैक्यवरोत्तमेथवशाभक्ष्येर्धंद्वयंमित्रयोः स्ववैराशनकेधरारिवशकेथ्योसद्भयोरग्नयः ॥ ॥

अर्थाद्धीनवरेगुणाभावः उक्तंचज्योतिर्निबंधे एकोगुणःसदृग्वर्णेतथावर्णोत्तमेवरे हीनवर्णेगुणःशून्यंकेप्याहुःसदृशोदलमित्यादि अथवश्यगुण
विचारमाह वशाभक्ष्येअर्धएकस्यार्धंगुणः वशाभक्ष्यं यथामनुष्याणांजलजावशाभक्ष्याश्चतत्रअर्धगुणोग्राह्यः एतत्तुद्विजादौज्ञेयम् द्विजादयस्तुक
दाचिच्छूद्रे पाठीनजातीयमत्स्यभक्ष्याभवंति नसर्वेषां तस्माद्द्धूवरजातिंविचार्ययोजनीयम् हीनजातौशून्यम् यतः स्ववैराशनकेइत्यस्मिन्नेवश्लो
केउक्तत्वात् एवमेवसिंहस्यसर्वेवश्याःभक्ष्याश्चभवंति तत्रमनुष्याःवैरिभक्ष्यं वृश्चिकस्तुवैरी अन्येवशाभक्ष्यं अथमित्रयोःपरस्परंसुहृदोः द्वयंगु
णद्वयंज्ञेयम् तत्रविचारः स्वजातौमित्रत्वंप्रकटं मनुष्याणांमेषवृषाश्वमृगैःसहमित्रत्वं तत्रहीनजातीयानांपशवोवशाभक्ष्यं तत्रार्धगुणः अन्यत्रद्वयम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथअरिवशके धराएकोगुणः आवश्यकं यथामनुष्याणां वृश्चिकः सिंहवृश्चिकयोर्नित्यंवैरं वृश्चिकदष्टः सिंहोमरणमाप्नोतीति लोकेप्रसिद्धं तस्मादत्रगुणाभावः म
यमंवशाभक्षणे अन्यज्जनादित्युक्तम् तस्मात्सद्बुद्धिभिर्विचार्यवक्तव्यं ममात्रवश्यविचारणे बुद्धिरेवंस्फुरिता अत्रयद्गुरुक्तंतत्बुधैःशोधनीयम् ननुवश्यभक्ष
णेकोप्यौनवश्याहरेरित्येवोक्तं त्वयाकथमुक्तं सिंहस्यमनुष्यावैरिभक्ष्यमिति सत्यं तच्छ्लोकोक्तलक्षणंसर्वसामान्यमस्ति अतएवोक्तंग्रंथकर्त्रा अन्यज्जनादि
ति सिंहस्तुनरगजादिप्रतापिमारणेतत्फलकः अन्येषांमारणेउदासीनः असदृशत्वात् उक्तंचवैरभक्ष्येगुणाभावोद्वयोःसख्येगुणद्वयं वशवैरेगुणश्चैकोव
शभक्ष्येगुणार्धकमिति अथताराशुणविचारमाह सद्वयोः उभयतः सत्तारयोःसतोः अग्नयः त्रयोगुणाः एतदुक्तंभवति भेगण्यंकत्रतेइत्यनेनप्रकारेण
उभयतोपियदिसत्तारेभवतस्तदात्रयोगुणाइत्यर्थः मिश्रेतच्छकलमिति मिश्रेएकतःशुभातारा एकतःअशुभा एवंविधेमिश्रेसतितच्छकलंतेषांत्रयाणांश

मिश्रेतच्छकलंत्वथातिसृत्दोवेदास्त्रयोमित्रयोरेकः स्याद्द्विषतोःस्वभावगुणयोर्द्वौरिवंमहद्वैरिणोः ॥ १० ॥

कलंतच्छकलंसार्धैकोगुणइत्यर्थः अन्यथागुणाभावइत्यर्थोस्तिद्धं उक्तंच एकतोलभ्यतेताराशुभाचेवाशुभान्यतः तदासार्धोगुणश्चैकस्ताराशद्वौमित्र
स्त्रयः उभयोर्नशुभातारानदाशून्यंसमादिशेत् अथयोनिगुणविचारमाह अतिसृत्दोवेदाश्चत्वारोगुणाः मित्रयोस्त्रयः द्विषतोर्वैरिणोरेकः स्वभाव
गुणयोर्द्वौ महद्वैरिणोःशंशून्यंगुणःस्यात् एवंपंचप्रकारेणयोनिगुणाः अस्यविवेकः अष्टाविंशतिनक्षत्राणामश्वादयः सर्वाश्चतुर्दशयोनयः तत्र
सिंहेभंमहिषाश्वमित्यादियत् ...तन्महद्वैरं तत्रापिमहद्वैरेमहिषाश्वंवानरमेषकं एतद्द्वयंउदासीनंस्वभावगुणंपरस्परघाताभावात् अथैकयोनिषु
अतिमित्रत्वंज्ञेयं एकयो... श्वापिगजयोःश्वानयोः मार्जारयोर्व्याघ्रयोः सिंहयोः एकयोनित्वेपिनमित्रत्वं परस्परकलहकारणात् एतद्द्वयमपंच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कंस्वभावगुणम् एतद्युग्मपंचकं ... ममहद्वैरस्थं महिषाश्वं वानरमेषं एतद्द्वयमित्येतद्युग्मसमकंस्वभावगुणं व्याघ्रस्तसर्पौ दुरनकुलेषु उदासीनः सिंहोप्येवमेवउ
दासीनः तथाएतौव्याघ्रसिंहौअश्वेषांवैरिणौ सर्पमार्जारयोर्वैरं श्वमेषयोर्मैत्रं गोमहिष्योर्मैत्रंहि उंदुरसर्पयोर्वैरं एवंशत्रुमित्रआदिकंउदासीनत्वंचविचार्य उक्त
वद्गुणाःज्ञातव्याः औदासिन्येस्वभावगुणवद्गुणग्रहणं उक्तानानांगुणायद्यपिनोक्तास्तथापिस्वभावगुणेमहिषाश्वेमेषवानरेच औदासिन्यंदृश्यते तस्मादेतद्व
यंउदासीनेगुणग्रहणंकर्तव्यमित्यर्थोज्ञायते उक्तंच महावैरेचवैरेचस्वभावेचयथाक्रमम् मैत्रेचैवातिमैत्रेचरवंदुद्विश्रिचतुर्गुणाइति १० अथरवेचरगुण
विचारमाह एकेशोइति एकःईशोयस्मिन्तदेकेशं उभयत्रमित्रेयस्मिन्तदुभयमित्रं एकेशंचउभयमित्रंचएकेशोभयमित्रे तयोःशरमिताःपंचगुणाग्राह्याः उ

एकेशोभयमित्रयोःशरमिताअर्धसमारातिकेचत्वारःसममित्रकेरिपुहितेभूमिर्द्युदासेत्रयः॥ना
देवोमनुजावधूरिहरसास्तद्वैपरीत्येशराःषट्साम्येस्वपपूरुषःस्वरवधूरत्रैककोन्यत्ररवम्॥११॥

भयत्रापिपंचपंचग्राह्याइत्यर्थः अर्धसमारातिके समःउदासीनः अरातिःशत्रुः एवंयस्मिन्मेलेतत्समारातिकं तत्र अर्धएकस्यार्धगुणः एवंसममित्रकेचत्वारोगुणाः
स्युः रिपुहिते अरिस्तत्हदिभूमिरेकः द्युदासेत्रयः द्वौउदासौयस्मिन्तत्रत्रयोगुणाग्राह्याः अनुक्तेगुणाभावः उक्तंच यत्रैकाधिपतित्वेचमित्रत्वेगुणपंचकम् च
त्वारःसममित्रेचद्वयोःसाम्येत्रयोगुणाः मित्रवैरेगुणश्चैकःसमवैरेगुणार्धकम् परस्परंरवेटवैरेगुणशून्यंसमादिशेदिति अथगणगुणविचारमाह वसिष्ठः
सद्भकूटंयोनिश्चद्विर्ग्रहसरव्यंगुणत्रयं यश्चैकतमसद्भावेकन्यारक्षोगणाःशुभाः मनुष्यगणजाकन्यानक्षत्रसगणोनरः मिथस्तत्रतोविवाहौस्तः केचिदेवंजगुर्बु
धाइति नादेवइति यत्र नानरोदेवः देवगणः वधूर्मनुजामनुष्यगणाभवति इहरसाःषट्गुणाग्राह्याः तद्वैपरीत्ये तयोर्वैपरीत्यंतद्वैपरीत्यं तस्मिन्शरमिताः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचगुणाग्राह्याः एतदुक्तंभवति यत्रवरोदेवगणः वधूर्मनुष्यगणा अत्रपंचगुणाग्राह्याइत्यर्थः षट्साम्येगणसाम्येषट्गुणाग्राह्याः यत्र अत्रपपूरुषः दैत्यगणः पुरुषः
स्त्रवधूः देवगणास्त्रीभवति अत्रैकः एकोगुणोग्राह्यः अन्यच्च उक्तादन्यत्ररवंशून्यंगुणोग्राह्यःस्यात् ११ अथकूटेगुणविचारमाह दुःकूटइति दुःकूटेद्विर्द्वाद
शादौसतियदियोनिमैत्रं अबलादूरंस्त्रीदूरंस्यात् तदांभोधयश्चत्वारोगुणाग्राह्याः नोचेद्यदियोनिमैत्रमबलादूरंनस्यात्तदारवंशून्यंगुणःस्यात् अनयोर्योनिमै
त्रस्त्रीदूरयोर्मध्येयत्रएकंस्यात् इहसूरेकोगुणः भांघ्यैक्यकेनक्षत्रैकचरणेरवंशून्यंगुणोग्राह्यः अथसत्कूटेसति यदिवरदूरताभारिपुता भवेरंयोनिवैरंचस्या
त्तदा षट्गुणाग्राह्याः भिन्नराश्यैकभे पंच भिन्नराशिश्वएकभंच अत्रपंचगुणाग्राह्याः उर्वरितेसत्कूटेगिरयः सप्तगुणाग्राह्याः अथनाडीभेदेगुणविचार

दुःकूटेयदियोनिमैत्रमबलादूरंतदांभोधयोनोचेत्खंत्वनयोर्यदैकमिहसूभांघ्यैक्यकेरवंगुणः॥सत्कूटेवरदूरताभारिपुताषड्भिन्नराश्यैकभेपंचा
न्यत्रसत्कूटकेचगिरयोःथोनाडिभेदेगजाः॥१२॥ ॥इतिघटितं॥ ॥स्त्रीणामष्टमवर्षतस्त्रिषुनृणांतीर्णव्रतानामयुक्षब्देष्वत्रचरा
धमाघयुगयोर्मार्गेविवाहःशुभः॥ सह अथोनाडीति नाडिभेदेगजाअष्टौगुणाग्राह्याः अनुक्तेगुणाभावः इतिमुहूर्तमार्तंडेघटितं १२ अथस्त्री
णांविवाहकालमाह स्त्रीणामिति स्त्रीणामष्टमवर्षतःसकाशात् त्रिषुवर्षेषुविवाहःशुभःस्यात् अष्टमनवमदशमेषुशुभःस्यादित्यर्थः तथाचसंवर्तः अष्टव
र्षाभवेद्गौरीनववर्षाचरोहिणी दशवर्षाभवेत्कन्याह्यादशेवृषलीमता गौरीदानान्नागलोकंवैकुंठंरोहिणींददन् कन्यादानाद्ब्रह्मलोकंरौरवंतुरजस्वलेति रजस्वले
तिवृषलीपर्यायः तथाचकारिकायामुक्तं षडब्दमध्येनोद्वाह्याकन्यावर्षद्वयंयतः सोमोभुंक्तेततस्तद्वद्गंधर्वश्चतथानलइति अस्यवाक्यस्यसहायिनोश्रुति
रपि सोमःप्रथमोविविदेगंधर्वविविदउत्तरः सोमोददद्गंधर्वायगंधर्वोददद्ग्नये इत्यंता नन्वस्यविरोधोब्रह्मपुराणेगौतमीमाहात्म्येभानुतीर्थवर्णनेविप्रभानुसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वादेदृश्यते वसिष्ठरुवाच चतु[illegible]ष्टवर्षादूर्ध्वंयावन्नदशमात्ययः तावद्विवाहःकन्यायाःपित्राकार्यःप्रयत्नतइति सत्यं अत्रपुराणवाक्यंशूद्रादिविषयंन श्रौतस्मा
र्तब्राह्मणादिविषयं इत्यविरोधः [illegible]समवर्षेविषमत्वान्नारदादिभिः स्त्रीविवाहेनांगीकृतं तस्मात्सर्ववर्णानामविरुद्धमेवोक्तंस्त्रीणामष्टमवर्षतस्त्रिष्विति॥ क
थितकालादूर्ध्वंकदाचिद्दूरालाभानिमित्तादौसमवर्षेषुद्वादश[illegible]र्दशषोडशेषुविवाहोग्रंथांतरेउक्तः कालनिर्णयदीपिकाविवरणेस्वयंवरार्थकालद्वयमुक्तं जी
वत्पितृकायाऋतौवर्षत्रयानंतरंस्वयंवर[illegible]लः अदात्[illegible]कायाअपि ऋतौवर्षत्रयानंतरंस्वयंवरकालः अदातृकायाइत्येतत्सर्ववर्णसाधारणं कन्याप्रदास्तत्रैवो-
क्ताः पितापितामहोभ्रातामाताबंधुर्यदानाहि ऋतौवर्षत्रयादूर्ध्वंकन्याकुर्यात्स्वयंवरमिति बौधायनोप्याह वर्षाणित्रीण्यृतुमतीकांक्षेतपितृशासनं तत-
श्चतुर्थेवर्षेतुविंदेतसदृशंपतिमिति अथपुंसांविवाहकालमाह नृणामिति नृणांतीर्णव्रतानांकृतव्रतविसर्गाणां अयुक्ष्वब्देषुविषमेष्वब्देषु वर्षेषुविवा

ज्येष्ठंपूर्वजयोस्त्यजेद्धिमरुचिंद्रेज्योनखेटान्वितंयन्मासादिजनुर्भवंप्रथमकेगर्भेत्यजेन्नानुजे १३

हः शुभः स्यात् नुर्विशेषेउक्तवर्षेषुकर्तव्यइत्याह अत्रराधमाघयुगयोः अत्रविषमवर्षेषु राधोवैशाखः माघः प्रसिद्धः अनयोर्युगेयुगुले राधयुगं
माघयुगं वैशाखज्येष्ठौमाघफाल्गुनावित्यर्थः मार्गेमार्गशीर्षेविवाहः शुभः स्यात् एतेपंचमासाः बहुसंमताः एषुज्येष्ठंज्येष्ठमासं पूर्वजयोः प्रथ
मजातयोः द्वयोस्त्यजेत् अर्थादेकतरेज्येष्ठेसतिनत्यजेत् तथाचनारदः नज्येष्ठेज्येष्ठयोःकार्यंनृनार्योःपाणिपीडनं तयोरेकतरेज्येष्ठेज्येष्ठमासे
पिकारयेदिति दोषांतरमाह हिमरुचिंचंद्रंद्रेज्योनखेटान्वितं बुधगुरुरहितान्यग्रहयुक्तंपापग्रहशुक्राणांअन्यतमयुक्तंत्यजेत् अनिष्टफलश्रवणात्
उक्तंविवाहवृंदावने अशुभाशुक्रसखः सखनत्यसूनिति सर्वशुभकर्मसाधारणोऽयंदोषः मासाद्यंजनिसंभवमिति त्याज्यप्रकरणोक्तंयत्तस्यविशेष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्णयमाह यन्मासादिजनुर्भवं प्रथमकेगर्भेत्सजेन्मानुजे स्पष्टार्थं अत्रनारदः नजन्ममासेजन्मर्क्षेनजन्मदिवसेपिच आद्यगर्भस्तस्याद्यदुहितुर्वाकरग्रहइ
ति १३ अथविवाहनक्षत्राण्याह मूलांत्यार्केति मूलंप्रसिद्धं अंत्यंरेवती अर्कोहस्तः मघाप्रसिद्धा स्थिराणिरोहिणीत्र्युत्तराः इंदुर्मृगः अनिलःस्वा ती एभिः
सहितंमैत्रं अनुराधा विवाहेशुभंशुभफलमित्यर्थः अथएतेषूक्तेषुनिंद्यमाह पापत्यक्तंअसत् अनिंदुशुक्र चंद्रशुक्रभुक्तंनशुभं एतदुक्तंभवति पापग्रहत्यक्तंनक्ष
त्रंचंद्रशुक्ररहितंनशुभंस्यात् उक्तंचसंहितापदीपे राहुभुक्तंत्रिभिर्भागैः शुद्धंषड्भिर्ग्रहोपगं चतुर्भिःशनिभोगेतुदुष्टद्वाभ्यांकुजेनचेति खलयुतंपापग्रहयुक्तं
भोग्यंचविद्धंचनशुभंस्यात् अथवेधमाह विश्वेंद्वोः उत्तराषाढाभिजितोः यममित्रयोः भरण्यनुराधयोः हिकभयोः कस्य भेकभे इ कभे हिकभे रोहिण्यभिजितो त

मूलांत्यार्कमघास्थिरेंद्वनिलयुङ्मैत्रंविवाहेशुभंपापत्यक्तमनिंदुशुक्रखलयुतंभोग्यंचविद्धंनभं ॥ विश्वेंद्वोर्यममित्रयोर्हिकभयोः पैत्र्यर्क्षहर्योर्
मिथोंत्यार्यम्णोः पुनरस्त्रपोर्वरुणभ स्वात्योरुभाहस्तयोः ॥१४॥ वेधोयंकरपीडनेनिगदितोनान्येषुतेषुस्मृतोवेधः सप्तशलाकके शिवदिशः
कार्शानवाद्यैर्युते ॥ यो पैत्र्यर्क्षहर्योः मघाश्रवणयोः मिथः परस्परं अंत्यार्यम्णोः रेवत्युत्तराफल्गुन्योः पुनरस्त्रपोः पुनर्वसुमूलयोः वरुणभस्वात्योः
उभाहस्तयोः उत्तराभाद्रपदाहस्तयोः मिथःपरस्परं वेधः स्यात् इत्युत्तरश्लोकेनान्वयः १४ अथकर्मविशेषेणवेधनिर्णयमाह वेधोयमिति अयंवेधःकरपी
डने विवाहे पूर्वमुनिभिर्निगदितः नान्येषुअन्येषुकर्मसुवधानोक्त इत्यर्थः तेषुविवाहान्यकर्मसु सप्तशलाकके स्मृतः किंभूते सप्तशलाकके चक्रे शिवदि-
शः ईशान्याःसकाशात् कार्शानवाद्यैर्युते कृशानुः देवतायस्येतिकार्शानवं कृत्तिकासाआद्यायेषांतानितैर्युते ईशान्यादिप्रदक्षिणंकृत्तिकादिनक्षत्र
युक्तमित्यर्थः विवाहादन्येसु कर्मसु सप्तशलाकाचक्रेवेधो विलोकनीयइति

अथपादवेधमाह वेधोंत्या[illegible]योरिति अंत्यादिमयोः चतुर्थप्रथमयोः द्वितीयतृतीययोः अंघ्र्योश्चरणयोः मिथःपरस्परंवेधःस्यात् अथास्यनिर्णयमाह स
त्खवर्गैःशुभग्रहैः येनऋक्षेविद्धे[illegible]तिचरणंत्यजेत् खलखगैः पापग्रहैः विद्धेसतिसर्वनक्षत्रंत्यजेदित्यर्थः इहास्मिन्पापविद्धेक्वचिदन्यमुहूर्ताभावेसति अं
घ्रिंचरणंविद्धंत्यजेदित्यर्थः उक्तंच मांडव्येन धिष्ण्यंसौम्यग्रहैर्विद्धंपादमात्रंपरित्यजेत्॥ क्रूरैस्तुसकलंत्याज्यमितिवेधविनिश्चयइतिवैद्यनाथः वेधमाद्यंतयोरं-
घ्र्योरन्योन्यंद्वितृतीययोः क्रूरैरपित्यजे[illegible]त्पादंकेचिद्गुरुर्महर्षयइति १५ अथवेधभंगमाह लग्नेशइति लग्नस्वामिनिभवर्गेएकादशगेसति वेधस्यदोषोनास्तीति
एकोभंगः अथवाशशिनिसत्दृष्टेसतिद्वितीयोभंगः वाइत्यथवा शुभेशुभग्रहेचंद्रवर्जितेअंगगेलग्नगेसति तृतीयोभंगः शुभस्यहोरायांचेतिचतुर्थोभंगः ए

वेधोंत्यादिमयोर्द्विकत्रिमितयोरंघ्र्योर्मिथःसद्ग्रहैर्विद्धेभेचरणंत्यजेत्खलखगैःसर्वंत्विहांघ्रिंक्वचित्॥१५॥क्षेपकः॥ भाग्यार्द्रोपितृयाम्य
भेःश्विहरिभेविश्वेंदुभेःत्वार्यमेपुष्यैंद्रेद्विकभेस्मरारिजलभेचित्राजपादेमिथः॥ मूलर्क्षादितिभेद्विदैवबसुभेसार्पानुराधेव्यधोहिर्बुध्न्या
र्कभयोश्चपाश्यनिलयोःसप्ताह्वचक्रेस्मृतः॥१॥ लग्नेशेभवर्गेऽथवाशशिनिसत्दृष्टेशुभेवांगगेहोरायांचशुभस्यवाव्यधभयंनास्तीतिपूर्वे
जगुः॥ पामन्यतमेसतिव्यधभयंनास्तीतिपूर्वेमुनयोजगुः आहुः तथाचवसिष्ठः लग्नेशुभःसौम्ययुतेक्षितोवालग्नाधिनाथोभवगस्तथावा कालाख्यहो
राचयदाशुभस्य भवेद्विदोषस्यतथाविभंगः इत्युद्वाहतत्त्वेऽपि सद्युक्दृक्तनुगेशुभेव्यधभयंनोवायगेलग्नगेहोरायांचशुभस्यवाशशिनिसत्दृष्टेपिचार्यैरु
डोः इति अथलत्तामाह भौमादिति भौमात्सकाशात्खेटाग्रहोराद्वंतः क्रमात्र्यासृतीत्यादिभंनक्षत्रंअग्रतोलत्तयाहंति तत्र भौमस्तृतीयं बुधःआकृति
द्वाविंशतिमितं गुरुःषष्ठं शुक्रः जिनमितंचतुर्विंशं शनिरष्टमं राहुर्नखमितंविंशंलत्तयाहंति अर्कःसूर्यः अर्कमितंद्वादशं शशीपूर्णचंद्रमाः मुनिमितंसप्तमं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्रतोलत्तयाहंति तत्हतंनक्षत्रंमागधेमागधदेशेनसत् नशंभंस्यात् उक्तंच सत्यसूरिणा लत्तांमागधकेदेशेपातंकौशलकेतथा एकार्गलंतुकाश्मीरेवेधंसर्व
त्रवर्जयेत् १६ अथदोषांतरमाह षण्मासमिति षण्मासंषण्मासपर्यंतंग्रहणोडुग्रहणनक्षत्रंचंद्रतनुगं चंद्रगतंलग्नगतंचत्याज्यं चंद्रगतमितियस्मिन्दिनेचंद्रम
सायुक्तंभवति तच्चंद्रगतंदिननक्षत्रमितियावत् तनुगंयथा अश्विन्यांग्रहणेजातेसत्र्यंशत्रयोदशभागांतरमेषलग्नेसति अश्विनीलग्नस्थास्यात् एवंभरण्या
द्यपिग्रहणोडुइत्यनेनैवअन्यान्यप्युत्पातदुष्टानि त्याज्यानिविद्धर्क्षंविद्धनक्षत्रं जन्मर्क्षंजन्मनक्षत्रंएतेउभेतनुगेत्याज्ये भंचलग्नंचभलग्ने जन्मनिभलग्नेजन्म
भलग्नेनएवजन्मभलग्नके जन्मराशिजन्मनक्षत्रेतनुगेत्याज्ये जन्मभेजन्मनक्षत्रेशुभकर्मपरित्यजेत् यद्यासर्वगुणैर्युक्तंतदातत्त्याज्यमेवचेति लग्नांतर्गतन-

भौमाद्याक्रांतिषट्[illegible]जिनाष्टनखभंहंत्यग्रतोलत्तयारवेटोर्कोऽर्कभितंशशीसुनिमितंपूर्णोनसन्मागधे ॥१६॥ षण्मासंग्रहणोडुचंद्रतनुगंविद्ध-
र्क्षंजन्मर्क्षकेत्याज्यंजन्मभलग्नकेतनुगतेसूर्यान्मनूडुत्यजेत् ॥ त्याज्याःसंक्रमणेरवींदुकुजसौम्यानांरदद्व्यंकदृङ्नाड्यो ब्ध्यष्टगुरोःशनेः
रवतिथयःशुक्रस्यषण्णाडिकाः ॥१७॥ पाग॥ दंतद्व्यंकदृशोर्कतोयुगगजास्तर्काःखबाणेंदवोनाडीःसंक्रमणेत्यजेद्दिविषदांमायोरवेर्दूषिताः

क्षत्रज्ञानायस्वकल्पितसूत्रं नवम्यंतन[illegible]दासैकंस्या[illegible]रकंतनौ अर्कर्क्षमिति अर्कनक्षत्रात्सूर्यनक्षत्रान्मनुडुचतुर्दशनक्षत्रंत्यजेत् अथसूर्यादीनांराशिसंक्रमणे-
त्याज्यघटिकाआह त्याज्याइति रविचंद्रकुजसौम्यगुरुशुक्रमंदानांसंक्रमणेक्रमेण रदद्व्यंकदृङ्नाड्यस्त्याज्याः तद्यथा रविसंक्रमणेरदनाड्योद्वात्रिंशद्घ
टिकावर्ज्याः संक्रमणकालात्[illegible]षोडशघटिकाः परतःषोडशघटिकाः एवंद्वात्रिंशद्घटिकास्त्याज्याइत्यर्थः तथाच चंद्रसंक्रमणेद्वेनाड्यौ भौमसंक्रमणे
नवघटिकाः बुधसंक्रमणे[illegible]टकत्याज्ये गुरोःसंक्रमणेअब्ध्यष्टौ चतुरशीतिघटिकाः शनेःसंक्रमणेरवतिथयः पंचाशदधिकशतघटिकाः शुक्रस्यषट्नाडि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारस्त्याज्याइत्यर्थः १७ अथ[illegible]दोषमाह षडिति ऋतुसंधितः वसंतादिऋतुप्रवृत्तेः षड्षष्टीषड्भिरधिका षष्टिः ६६ घटीनां षट्षष्टीत्याज्येत्यर्थः ऋतु प्रवृत्तिलक्षणं रत्नमालायां मृग[illegible]दिराशिद्वय भानुभोगात् षड्ऋतवः स्युः शिशिरो वसंतः ग्रीष्मश्च वर्षा च शरच्च तद्वद्धेमंतनामा कथितोऽत्र षष्ठ इति तिथिभ युक्संधौ तिथिनक्षत्रयोगानां संधौ द्विनाड्यौ पृथक् [illegible]टिके त्याज्ये अथ पूर्वमुक्तं ग्रहजनिभ्रांतोद्भवं सूतकमिति तत्र ग्रहणसूतकलक्षणमाह ग्रहादि ति ग्रहात् ग्रहणतः सकाशात् उपरि[illegible]पादैस्तु चरणैः ग्रहपादैः त्रिवेदषड्भिभान् ३।४।६।८ दिवसान् त्यजेत् एतदुक्तं भवति पादैकमात्रग्रहणे त्रीन् दिव सान् त्यजेत् अर्धग्रहणे चतुरो दिवसान् त्यजेत् त्रिपादग्रहणे षट् दिवसान् त्यजेत् सर्वग्रहणे अष्टदिवसान् त्यजेत् प्राग्ग्रहणात्प्राक्प्रथमतः अर्धिता

षट्षष्टीऋतुसंधितस्तिथिभयुक्संधौ द्विनाड्यौ ग्रहात्तत्पादैर्दिवसांस्त्रिवेदषड्भिभान्प्रागर्धितान्संत्यजेत्॥ उत्पाते त्र्यहमुद्भमं च शि खिनो राकाष्टमी प्राग्दले विद्भ्रांत्येकतरुद्वयोरबकुले कृष्णो निरेके त्विह॥१८॥ न्त्रिवेदादीन् दिवसान् त्यजेत् एतदुक्तं भवति पादग्रहणे त्रयाणामर्धं तद्यथा पादग्रहणे ग्रहणात्पूर्वं सार्धैकदिवसं नवति ९० घटिकास्त्याज्याः अर्धग्रहणे चतुर्णामर्धं द्वौ दिवसौ पादत्रयग्रहणे षण्णामर्धं त्रीन् सर्वग्रहणे अष्टाना मर्धं चतुरो दिवसान् ग्रहणात्पूर्वं त्यजेत् उपरागे ग्रहो राहुग्रस्ते त्विंदौ च पूष्णि चेत्यमरः तथा चोक्तं शार्ङ्गीयविवाहपटले सर्वग्रासे दिनान्यष्टौ शुभकार्येषु वर्जयेत्॥ त्रिभागोने षट् दिवसानर्धग्रासे चतुर्दिनम् चतुर्थांशे त्रिरात्रं तु ग्रहणे चंद्रसूर्ययोरिति अत्राप्यंतराले नुपातो ज्ञेयः तथा चार्ष्टिषेणः ग्रहणात्त्रिदिनं पूर्वं परतो दिनस प्तकमिति सर्वग्रहणविषयं ज्योतिःप्रकाशेपि खग्रासे सर्वपादोनखंडार्धाल्पे तु वासराः गजाश्वेष्वब्धिरामा ज्ञाने ष्टाः स्युः प्राग्दले ग्रहे इति अथोत्पातवर्जका लमाह उत्पाते त्र्यहमिति उत्पाते भूकंपनिर्घातमहोल्कानिपातादिके त्र्यहं अह्निमितानामन्हां समाहारः त्र्यहं समाहमित्यर्थः उत्पाते जाते सति समाहं शुभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मणित्यजेदित्यर्थः दोषांतरमाह उद्गमंचशिखिनः शिखिनः केतोः उद्गमंउदयंत्यजेत् यावत्केतूदयस्तावत् मंगलंनकुर्यादित्यर्थः तथाचार्ष्टिषेणः परंसमाहमुत्पातेत्यजे
त्केतूदयेशश्रभमिति भद्राकालमाह राकाष्टमीप्राग्दलेविष्टिस्यात् राकापूर्णिमा अष्टमीप्रसिद्धा अनयोस्तिथ्योः प्राग्दले पूर्वार्धेविष्टिर्विष्टिःस्यात् रुतरुद्रयोः प्रांत्येकृ
तंचतुर्थी रुद्रएकादशी अनयोःप्रांत्येदलेविष्टिस्यात् एतद्भद्राचतुष्टयंअबहुलेशुक्लपक्षेस्यात् कृष्णेनिरेकेष्विह उक्तेषुतिथिषुनिरेकेषुएकरहितेषु कृष्णेकृष्णपक्षे
विष्टिस्यात् भद्रापवादः शार्ङ्गीयविवाहपटले दूषितः अतः कारणादत्रनोक्तं अथगंडांतलक्षणमाह सार्पेति सार्पं आश्लेषा ऐंद्रीज्येष्ठा अंतिमभंरेवती एषामं
तः तस्मात्कालात्प्राक्परं पूर्वापरतः अब्धिघटिकंगंडांतंस्यात् अब्धयश्चतस्रोघटिकायस्मिन्नित्यब्धिघटिकं चतुर्घटिकमित्यर्थः एतदुक्तंभवति उक्तनक्षत्रांतात्

सार्पेंद्रांतिमभांततोब्धिघटिकं पूर्णांततोब्ध्यर्धकं कीटांत्यालिविरामतः कुघटिकंगंडांतमूर्ध्वाधरं ॥ सावैन्द्रव्यहगाख्ययोगविरतौ भांतत्रचंडायुधंदु
र्योगेदिनभाच्चसाभिजिदयुग्मेर्कस्तदेकार्गलः ॥ १९ ॥

पूर्वतोघटिकाद्वयंपरतोघटिकाद्वयं एवंघटिकाचतुष्टयंनक्षत्रगंडांतं अथतिथिगंडांतमाह पूर्णांत
तोब्ध्यर्धकं पूर्णापंचमीदशमीपूर्णिमा[illegible]सामंततः अब्ध्यर्धकंघटिकंगंडांतंपूर्वापरतःस्यात् अथलग्नगंडांतमाह कीटांत्यालिविरामतः कुघटिकं कीटःक
र्कटकः अंत्योमीनः अलिर्वृश्चिकः एषांविरामोऽवसानं तस्मात्कुघटिकंएकघटिकं प्रागर्धघटिकापरतोऽर्धघटिका एवमेकघटिकंलग्नगंडांतंस्यात् अथचं-
डायुधमाह सावैंति सासाध्ययोगः वैवैधृतिः शूशूलः व्यव्यतीपातः हहर्षणः गंगंडः एतदाख्ययोगानां विरतिरवसानं तत्र यद्भंनक्षत्रंतस्मिन्चंडायुधंस्यात् चं
डंप्रचंडंमहत् एवंविधमायु[illegible]त् आयुधंघातकंस्यात् तस्मात्तन्नक्षत्रंवर्ज्यमित्यर्थः अथैकार्गलमाह दुर्योगेदिनभादिति विष्कंभातिगंडशूलगंडव्याघातव
ज्रव्यतीपातपरिघवैधृत[illegible]वदुर्योगाः एषामन्यतमेसतिदिनभादिदिननक्षत्रादि साभिजिदयुग्मे अभिजितासह अयुग्मे विषमनक्षत्रेयदाःर्कःसूर्योभव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति तदाएकार्गलः स्यात् [illegible]र्गला शुभावरोधिनी यस्मिन्नित्येकार्गलः शुभफलावरोधकइत्यर्थः १९ अथवारदोषमाह सूर्यादिति सूर्यात्सकाशाद्वारेषु क्रमेण निगमादिकं यामदलं यामार्धं [illegible]ञ्झंति त्यजंति सुनयइतिशेषः निगममितं रवौ अद्रिमितं सोमे अश्विनौ द्वौ तन्मितं भौमे इषवः पंच तन्मितं बुधे नागाष्टौ तन्मितं गुरौ त्रिमितं शुक्रे षट्भूमि[illegible]शनौ एतद्यामदलं दिवैव [illegible]ञ्झंति नरात्रौ अथकुलिकादीनाह इनादौसूर्यादौ वारे दिवा इंद्रादिकं षोडशांशं दिनमानस्य षोडशांशो ग्राह्यः तेनगण्यास्ते षोडश[illegible]ग्राह्या इत्यर्थः तं कुलिकमुञ्झंति अपरे तिथ्यंशं पंचदशांशं कुलिकमुञ्झंति तन्निशि तद्रात्रौ व्येकं एकरहितं इंद्रादिकं षोडशांशं पंचदशांशमुञ्झंति तद्यथा [illegible]दिवा इंद्रमितं चतुर्दशं तद्रात्रौ त्रयोदश सोमे दिवाद्वादशं तद्रात्रौ एकादशमित्यादि अथतैरेवइंद्रादिभिर्मुहूर्तैः अमरेज्य

सूर्याद्यामदलं दिवैव निगमाद्यश्वीषुनागत्रिषट्संख्याकं कुलिकं दिवेंद्ररविदिङ्नागर्तुवेदद्विकं ॥ व्येकं तन्निशि षोडशांशमपरे तिथ्यंशमुज्झंति तैः कालकंटकमैनिघंटममरेज्यज्ञास्फुजिद्भ्यः क्रमात् ॥२०॥ शक्रेंद्वीज्ययमेषु गोकरविभूतुल्या मुहूर्ता दिवा दुष्टाः स्युः कुजनिश्यगोयइतरे संत्यर्धयामादिषु ॥

ज्ञास्फुजिद्भ्यः सकाशात् क्रमात् कालं कंटकं ऐनिघंटं इनस्यापत्यं पुमानैनिर्यमः तस्यघंटोयमघंटइत्यर्थः तमुञ्झंति एतदुक्तंभवति अमरेज्योगुरुः तस्मात्सकाशात् वारेषु तैरेव इंद्रादिभिर्मुहूर्तैः कालवेलामुञ्झंति ज्ञात् बुधात्तैरेवेंद्रादिभिः कंटकं आस्फुजिच्छुक्रः तस्मात्सकाशात् तैरेवेंद्रादिभिर्मुहूर्तैः ऐनिघंटं यमघंटमुञ्झंति २० अथमुहूर्तानाह शक्रेति शक्रः प्रसिद्धः इंदुश्चंद्रः ईज्योगुरुः यमः शनिः एषु क्रमेण गोकरविभूतुल्या मुहूर्ता दिवा दुष्टाः स्युः दुर्मुहूर्ता इत्यर्थः कुजनिश्यगः कुजनिशि अगः सप्तमो मुहूर्तो दुर्मुहूर्तः ग्रंथांतरे अर्यम्णोऽर्के तुहिनकिरणे राक्षसब्राह्मसंज्ञावित्यादि बहवो दुर्मुहूर्ता उक्ताः अत्र स्वल्पाउक्तास्तेषां परिहारमाह यइतरे मुहूर्ता ग्रंथांतरे पठितास्ते सर्वे अर्धयामादिषु संति अतो ऽस्माभिर्नोक्ताः यतः अर्धयामादीनां त्यागेते पित्यक्ताः स्युः किं ग्रंथविस्तरेणेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावः एतत्तुरूक्ज्ञाज्ञास्यंनि यथारवौ चतुर्दशोमुहूर्तोदुर्मुहूर्तः तत्रकुलिकोऽपिचतुर्दशोमुहूर्तः तयोरेकत्रसद्भावइत्यन्येतिविचारगम्याः नन्वेवंचेत्तर्हिपूर्वैर्व्यर्थप
ठितं मैवंतैरुत्त्वनधिकाधिकदोषविवक्षयोक्तमितिनदोषः अथपातसंभवकालमाह प्रेक्ष्यइति संप्रतिसांप्रतं वृद्धितुर्यचरणे वृद्धियोगस्यचतुर्थचरणे तथाब्र-
ह्महितीये ब्रह्मयोगस्यद्वितीयचरणे अपमःक्रांतिः पातोविलोक्यः ब्रह्मसिद्धांताद्युक्तप्रकारेणविलोक्यइत्यर्थः अथमृत्यंसर्वत्रवर्जयेदित्यक्तत्वात् मृत्युयो
गमाह सूर्याद्याइति सूर्याद्याःसूर्यादयः क्रमेणअन्वादिभिर्नक्षत्रैः सह मृत्युदाःस्युः अनु अनुराधा विश्वेउत्तराषाढा पाशीशततारका यमलौअश्वि-
नी इंदुर्मृगः अहिराश्लेषा अर्कभंहस्तः एतदुक्तंभवति अर्कः अनुराधयासहयुक्तोमृत्युदः सोमउत्तराषाढया भौमःशततारकया बुधःअश्विन्या गु

प्रेक्ष्यःसंप्रतिवृद्धितुर्यचरणेब्रह्महितीयेपमः सूर्याद्याअनुविश्वपाशियमलेंदुह्यर्कभैर्मृत्युदाः॥ २१॥ पंचाश ५० ज्जिन २४ खाग्नय ३०
श्चरवरूना ४० आखंडला १४ मूर्छना २१ स्त्रिंश ३० द्विश २० रदाः ३२ खराम ३० नख २० धृत्ये १८ काश्विनौ २१ विंशतिः २० ॥ शक्रं १४ द्रौ
१४ दश १० वासवा १४ रस शरः ५६ सिद्धा २४ नखा २० शा १० दिशो १० धृत्य १८ ष्टी १६ जिन २४ खाग्नयो ३० श्वितइमाभ्योःग्रेःब्धि ४
नाड्योविषं॥ २२॥ रुर्मृगेण श[illegible]ः आश्लेषया शनिर्हस्तेनसहितोमृत्युदःस्यादित्यर्थः मृत्युयोगापवादमाह विरुद्धयोगास्तिथिवारजातानक्षत्रयोग
प्रभवाश्चयत्र हूणेषुवंगेषुखशेषुवर्ज्याः सर्वेषुदेशेषुनत[illegible]इनिरत्नमालायां २१ अथविषघटिकाआह पंचाशदिति अश्विनः अश्विन्याःसकाशा
त् नक्षत्रेषुइभाभ्यः पंचाशज्जि[illegible]त्यादिभ्योघटिकाभ्योऽग्रेपरतोऽब्धिनाड्यश्चतुर्नाड्योविषंस्यात् एतदुक्तंभवति अश्विन्यांपंचाशद्घटिकाभ्योनंतरंच
तुर्नाड्योविषं एवमन्यत्र [illegible]कन्यासएवव्याख्यानम् २२ श्रीमद्गोपीमानसरंजनायवासुदेवायनमोऽस्तु श्री ६ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथैषां नक्षत्रध्रुवकाणां स्पष्टीक[illegible] नक्षत्रस्येति नक्षत्रस्यगतैष्ययोगेनगुणितः स्वस्वध्रुवः पंचाशज्जिनादिषष्टिहृत्स्पष्टः स्यात् अतऊर्ध्वंस्पष्टध्रुवानंतरं अब्धिघटिकाश्चतुर्नाड्योविषं स्यात् एत[illegible]क्तप्रकारेण कृताः सत्यः स्पष्टाः स्युः एतदुक्तंभवति ध्रुवश्चतुर्नाड्योः पिनक्षत्रस्यगतैष्ययोगगुणिताः कार्याः षष्टिहृताः कार्याःताः स्पष्टाः स्युः स्पष्टानंतरंचतुर्नाड्योविषघ[illegible]व्याज्ञेयाः अथविषघ[illegible]पवादमाह चंद्रइति चंद्रः सौम्यभगः शुभग्रहराशिगः सन् विषभयंहंति अथवाशुभसुहृद्दृष्टः शुभश्चासौसुहृच्च तेनदृष्टः सन् विषभयंह[illegible]ति अथवा[illegible]र्गांशागः स्वनवांशेवर्तमानः सन् विषभयंहंतिवा इत्यथवा कोणास्ताम्त्रसुखगोपिचंद्रोविषभयंहंति कोणेपंचमनवमे अस्तंसप्तमं अम्बंदशमं सुखंच[illegible] एतत्स्थानगोपिचंद्रो विषभयंहंतीत्यर्थः अत्रास्मिन्कोणादिस्थानेसांगेसलग्नेवर्तमानः अंगपोलग्नपोविषभयं

नक्षत्रस्यगतैष्ययोगगुणितः स्वस्वध्रुवः षष्टिहृत्स्पष्टः स्यादतऊर्ध्वमब्धिघटिकाः स्पष्टाः स्युरेवंकृताः ॥ चंद्रः सौम्यभगोऽथवाशुभसुहृद्दृष्टोऽथवार्गांशगः कोणास्ताम्त्रसुखेषु वाविषभयंहंतीहसांगेऽगपः ॥ २३ ॥ लग्नेचंद्रखलारिपौशशिसितौसर्वेद्यूनेखेबुधोऽज्ञोऽंत्येगुःसुखगोऽष्टमाःकुजशुभाः शुक्रस्तृतीयः शुभे ॥

हंतीत्यर्थः एवंपंचभंगाःसंति ननुसप्तमखेटोपिविवाहेनिंदितः कथमत्रचंद्रोगृहीतः सत्यमिदंवाक्यंसर्वकर्मसाधारणं तत्स्यान्निंदितंस्थानंवर्जयित्वा अन्यत्रग्राह्यः तथाचबृहस्पतिः चंद्रोविषघटीदोषंहंतिकेंद्रत्रिकोणगः लग्नंविनाशुभैर्दृष्टः केंद्रेवालग्नपस्तथा फलप्रदीपे विषनाड्युत्थितंदोषंहंतिसौम्यर्क्षगः शशी मित्रदृष्टोऽथवास्वीयवर्गस्थोलग्नपोपिच २३ अथविवाहलग्नेइष्टानिष्टग्रहानाह लग्नइति चंद्रश्चखलाश्चतेचंद्रखलाः लग्नेवर्तमानाः शुभेशोकायभवंति तथारिपौषष्ठेशशिसितौचंद्रशुक्रौ तथा सर्वेद्यूने सर्वेक्रूरसौम्याद्यूनेसप्तमे तथा खेदशमेबुधः तथा अज्ञश्चंद्रोंत्येद्वादशे अगुः राहुः सुखगश्चतुर्थगः नविद्यंतेगावः किरणायस्येत्यगुः राहुः राहुस्तमोऽगुरसुरश्चेति बृहज्जातकेराहुनामानि तथाअष्टमाः कुजशुभाः कुजश्चशुभाश्चते तथा शुक्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तृतीयइतिसपष्टार्थः एतेप्रत्येकंउक्तस्थानगाः शत्रवेशोकायभवंति अथेष्टानाह लाभेएकादशेसर्वखगाः तथा शुभाः सौम्यग्रहाः अखिलगाः निद्यंविनासर्वस्था नगाः तथा खलाः क्रूराः व्ययष्टारिगाः तृतीयाष्टषष्ठगाः तत्र अष्टमे भौमोनिंदितः तंविनापापा अष्टमगाग्राह्याः चंद्रस्त्र्यंबुधने तृतीयेचतुर्थेद्वितीयेचचंद्रः एतेप्र- त्येकंउक्तस्थानगाः श्रियेलक्ष्म्यैभवंति श्रीकारकाइत्यर्थः एवंशुभाशुभग्रहानुक्त्वा तत्रविशेषमाह अंशेति अंशाभदृक्केंद्र् अष्टारिगःसन् मृत्यवेस्यात् अंशो नवांशः भंलग्नं दृक्कोदृक्काणः एषामीट्स्वामी नवांशस्वामी लग्नस्वामी दृक्काणस्वामी एतेप्रत्येकंअष्टषष्ठगाः मृत्यवेमृत्युक्लेशलवो भवंतीत्यर्थः २५ अथकति चिद्दोषाणामपवादमाह तत्रप्रथमंभृगुषष्ठापवादमाह कन्याइति कन्याप्रसिद्धा शुक्रस्यनीचं तौक्षिकोधनुर्धरः शत्रुगेहंपूर्वोक्तम् भृगुभुवःशत्रूरवींदूइति

लाभेसर्वखगाःशुभाअखिलगास्त्र्यष्टारिगाःस्युःखलाश्चंद्रस्त्र्यंबुधनेश्रियेंशाभदृक्केंद्र्स्यान्मृत्यवेःष्टारिगः॥२५॥ कन्यातौक्षिकशत्रुराशि गभृगुःषष्ठोपिनोभंगकृद्भौमोमृत्युगतोपिशत्रुशशिनोर्गेहस्थितोवार्कगः॥

तत्ररवेर्गृहंसिंहः इंदोर्गृहंकर्कटः एषांकन्यादीनां अन्यतमगेहगतो भृगुः षष्ठोःपिनोभंगकृत्स्यात् लग्नभंगकरोनभ[illegible]त्यर्थः तथाच कश्यपः नीचगेतत्तुरीयेवाशत्रुक्षेत्रगतोःपिवा भृगुषष्ठाव्हयोदोषोनास्तितत्रनसंशयः अथकुजा ष्टमदोषापवादमाह भौमोमृत्युगतोपि[illegible]अष्टमगतोः[illegible] शत्रुशशिनोर्गेहस्थितोपियदिभवति वाइत्यथवा अर्कगः अस्तंगतोपियदिभवतितदानोभंगकृत्स्यात् अस्यशत्रुर्बुधः कुजस्यविदरिरि[illegible]मारुक्तः तस्यगृहंकन्[illegible]मिथुनंच शशिगृहंकर्कटकः तदस्यनीचं एषामन्यतमस्थः अस्तंगतोवा अष्टमगतोपिवालग्नभंग करोनभवतीत्यर्थः अस्तगइतिप[illegible]सएवार्थः तथाच कश्यपः अस्तगेनीचगेभौमेशत्रुक्षेत्रगतेपिवा कुजाष्टमोद्भवोदोषोनकिंचिदपिविद्यतइति अथद्वाद- शषष्ठचंद्रापवादमाह शुक्ले[illegible] शुक्लपक्षे अंत्यारिविधुः द्वादशः षष्ठोवाचंद्रः स्ववर्गहगितः वर्गाश्चहदशाश्चवर्गदशाः शोभनानांवर्गदशाः स्ववर्गदशाःइतःमासः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्ववर्गदृग्गितः शुभवर्गंशुभदः [illegible] इत्यर्थः एवंविधोविधुःशुभदःस्यात् कस्मिन्सति ईज्ये गुरौ शुक्रेवा तनौलग्नेसति कथंभूतेगुरौ स्वोजोयुजि स्वतरांओजःस्वोजः उत्कृष्टबलं तेनयुनक्तीतिस्वो[जो]युक् तस्मिन्स्वोजोयुजि अतिबलिष्ठेसतीत्यर्थः शुक्रस्याप्येतद्विशेषणं एतदुक्तंभवति बलिष्ठेगुरौशुक्रेवालग्नस्थेसति शुक्लपक्षेचंद्रमाः शुभवर्गदृष्टिसहितोयदि भवतितदा द्वादशभ[ावस्थो]ऽपि शुभदइति भंगकरोनस्यात् अन्यथान मुहूर्तदर्पणे कवौगुरौवाबलिनिस्थितेतननौशुभेनदृष्टः-शुभवर्गगःशशी विवर्धमानःशुभकृ[द]नाशुभंकरो[ऽ]स्तितिष्वन्नपिरिःफयोरिति अथसग्रहचंद्रदोषापवादमाह सग्रहः ग्रहेणग्रहाभ्यांग्रहैर्वासहवर्तमानः सग्रहः बुधगुरुवर्ज्यं अन्यग्रहयुक्तइत्यर्थः यत[ः] [illegible]र्युक्तं हिमकृ चिंद्रेज्योनरवेटान्वितमिति एवंविधोविधुःसग्रहः केंद्रनिजवर्गेज्येक्षितः सन्शुभदः स्यात् केंद्रंप्रसिद्धं

शुक्लेंत्यारिविधुःस्ववर्गदृग्गितःस्वोजोयुजीज्येतनौशुक्रेवाशुभदोःथकंटकनिजांशेज्येक्षितःसग्रहः॥२६॥
दोषाणांशतमिंदुजःशतयुगंशुक्रोगुरुर्घातयेल्लक्षंकंटककोणगोंगमिनचंद्रोजस्विपातादिकान् ॥ ॥

निजवर्गोनिजांशाः तत्रवर्तमानईज्यः केंद्रनिजवर्गेज्यः तेनईक्षितः अवलोकितः सग्रहः चंद्रमाः शुभदः भंगकरोनस्यादित्यर्थः उक्तंच गुरुः स्वकीयवर्गस्थोबलवान्कंटकाश्रितः पश्यन्स ग्रहशीतांशुंतद्दोषंविलयंनयेदिति २६ अथसामान्यदोषापवादमाह दोषाणामिति कंटककोणगः केंद्रत्रिकोणगः इंदुजोबुधः दोषाणांशतंघातयेत् तत् १।४।५।७।९।१० स्थः शुक्रः दोषाणांशतयुगं द्विशतंघातयेत् तत्स्थः १।४।५।७।९।१० बृहस्पतिः दोषाणांलक्षंघातयेत् अपवादांतरमाह अंगंलग्नं इनचंद्रोजस्विपातादिकान्घातयेत् इनचंद्रयोः सूर्यचंद्रयोः ओजोबलमस्यास्तीति इनचंद्रौजस्वि एवंविधंलग्नंपातादिकान्घातयेत् उक्तंचवसिष्ठेन एकार्गलोपग्रहपातलत्ताजामित्रकर्तर्युदयादिदोषाः नश्यंतिचंद्रार्कबलोपपन्नेलग्नेयथाः कीप्फदर्येधकाराइति॥ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथदोषापवादभंगमाह भंगाइति येभंगाः दोषभंगाः विबलाः गतबलानिर्बलास्तेत्रदोषभंगविषयेसफलानभवंति दोषभंगसमर्थानभवंतीत्यर्थः तस्माद्दोषभं
गकृतांबलंविचार्यदोषभंगमादिशेत् इतिभावः उक्तंच सामान्येनोदितादोषाभंगास्तेषांतुतद्विदैः यदितेबलहीनाःस्युः प्रध्वंसाभावतांययुरिति अथभावस्फु
ष्टिमाह संध्यंशतुल्योफलइति संध्यंशतुल्यः संधिभागसमानोग्रहः अफलःस्यात् सदसत्फलदोनभवति भावांशतुल्योग्रहः अखिलफलःस्यात् संपू
र्णफलदोभवति अर्थान्मध्येअनुपातात्फलंवेद्यं विशेषफलमाह संध्यूर्ध्वगःस्यात्परइति संध्यूर्ध्वगः संध्यंशाधिकः परःस्यात्परभावफलदःस्यादित्यर्थः २७
संध्यंशतुल्यइत्याद्युक्तं तत्रकेतेसंधयः केतेभावाइत्यपेक्षायांतत्संधानंकिंचित्स्थूलमेकेनवृत्तेनाह भागाःस्फुरिति नतनाडिकारसहृताभागाःस्फुः नतसा-

भंगायेविबलानतेत्रसफलाः संध्यंशतुल्योफलः स्याद्भावांशसमोग्रहोऽखिलफलः संध्यूर्ध्वगःस्यात्परः ॥ २७॥ भागाःस्फुर्नतनाडिकारस
हतास्तद्धीनयुक्प्राक्परेसूर्यः खंसरसंस्कृखंकथितवल्लग्नंसषड्भमदः॥ धनंजातकपद्धतावुक्तं रात्रेःशेषमितंयुतंदिनदलेनाह्नोगतंशेषकंवि

श्लेष्यंखलुपूर्वपश्चिमनतमिति एतद्[illegible]वति सूर्येष्टलग्नाभ्यांइष्टकालंसाधयित्वा नतंचसाधयित्वातदिष्टकालभवंनतं षड्गुणंसद्भागाःस्फुरित्यर्थः
प्राक्पश्चिमेनतेनक्रमेणतन्यूनयुक्सूर्यः तैर्भा[illegible]र्न्यूनयुक् पूर्वनतेसतिन्यूनः पश्चिमनतेसतियुक्युक्तः तात्कालिकःसूर्यःखंस्यात् दशमभावःस्या
दित्यर्थः तथा खंदशमभावं[illegible]रसंषड्राशियुक्तंसत् [illegible]खंचतुर्थभावःस्यात् कथितवल्लग्नंज्ञेयं तल्लग्नंसषड्ंषड्राशियुक्तंसत्मदःसप्तमभावःस्या
त् एवंभावचतुष्टयंसाधयि[illegible]त्वा अंतर्भावसाधनमाह व्यस्ताप्तारिलवइति विगतःअस्तःअस्तभावोयस्मात्तत् व्यस्तं तच्चनत् अप्तंभंचव्यस्ताभं
सप्तमभावरहितदशमभा[illegible]इत्यर्थः तस्यत्रिलवोराशयादिकोग्राह्यः अथदृक्च्युतः द्विपतितः कार्यः एतौउभौकेबलत्रिलवदृक् च्युतत्रिलवौ पृथक्पृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थक् कुटमौसंतौ पृथक् [illegible]यकलग्नेअंबुनिचयोज्यौ अयमर्थः कुम्भः त्रिलवोलग्नेयोजितः सन् द्वितीयभावोभवति टमोलग्नेयोजितः सन् तृतीयभावो भवति अथटक्च्युतः त्रिल[illegible] कुम्भः अंबुनिपूर्वसाधितेचतुर्थभावेयोजितः सन् पंचमभावोभवति तत्रैव टमोंबुनियोजितः षष्ठभावोभवति तेषडनंतरसा धिताभावाः सषट्षड्राशिसहि[illegible]ताः कार्याः तेतुसप्तमा[illegible]द्याः रूपंसषड्भंमदइतियावत् तेतुलग्नसुखालग्नादयोभावाः स्फुः अथसंधिसाधनमाह संधिर्द्वि योगोर्धकइति द्वयोर्भावयोर्योगः [illegible]र्धितः संधि[illegible]स्यादितिस्पष्टं अथपाठांतरस्यव्याख्या व्यस्तेति सप्तमभावरहितस्यदशमभावस्य अखिलवः षड्भा गोराश्यादिकः सपृथक् भूच्युतः एक[illegible]तः इमौउभौ भूयः वारंवारं अंगपातालयोः प्रथमचतुर्थभावयोः क्षेप्यौ तनुतः लग्नात्ससंधयः संधिसहिताः षड्भावाः

व्यस्ताम्भस्त्रिलवोः थटक्च्युतउभौयोज्यौकुटमौपृथग्लग्नेचांबुनितेसषट्तनुसुखाः संधिर्द्वियोगोर्धकः ॥२८॥ पाठांतरं ॥ व्यस्ताम्भाखिलवो थभूच्युतइमौभूयोंगपातालयोः क्षेप्यौषट्तनुतः ससंधयइमेषड्भान्विताः स्युः परे ॥ ॥इंदोर्बाहरिजाद्व्ययस्वगतयोः स्यात्क्रूरयोः कर्तरीस्वे वक्र्यंत्यऋजुर्महत्यथगुरौरिःफेशुभेवालनौ ॥

स्युः इमेभावाः षड्भावान्विताः संतः परेससंधयोभावाः स्युः एवंभावसंधिसाधनंकृत्वा संध्यंशतुल्योफलइ ति प्रागुक्तंग्रहफलंविचार्य अंतरेअनुपातः भावसंध्यंतरेणासंसंधिखेटांतरात्फलमितिजातकपद्धतेः एतत्स्थूलभावानयनं सूक्ष्मंतुजातकपद्धतावगंतव्यं २८ अथकर्तरीदोषलक्षणंसापवादमाह इंदोर्वेति इंदोश्चंद्रात्सकाशात् वाइत्यथवा हरिजाल्लग्नात्सकाशाद्व्यय १२ स्व २ गतयोः व्ययंद्वादशं स्वंद्वितीयंतदुभयत्र गतयोः क्रूरयोः पापग्रहयोः सतोः कर्तरीस्यात् अथमहाकर्तरीलक्षणमाह स्वेति स्वेद्वितीयेस्थितः क्रूरः यदिवक्रीस्यात् अंत्येद्वादशेस्थितः क्रूरः ऋजुःमा र्गगामीस्यात् तदामहतीकर्तरीस्यात् उक्तंच लग्नाभिसुखयोः पापग्रहयोर्ऋजुवक्रयोः साकर्तरीतिविज्ञेयादंपत्योर्गलकर्तरीति एवंकर्तरीलक्षणमुक्त्वातद्भंग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माह गुरौरिःफे मांत्ये द्वादशेसति साकर्तरीनस्यादेवेत्येको भंगः वाइत्यथवा क्रमेग्रहे बुधगुरुशुक्राणामन्यतमे तनौलग्नेसतिसानेतिद्वितीयो भंगः स्वेद्वितीयेः जे चंद्रेस
तिसानेतितृतीयोभंगः वाइत्यथवा सौम्यखगे द्वितीयेसतिसानेतिचतुर्थोभंगः वाइत्यथवा केंद्रकोणेषु केंद्र १।४।७।१० त्रिकोणेषु ५।९ भृगुविदीज्यैः तैः सद्भिः का
लाद्येतिसमभ्यर्थेन्तृतीया साकर्तरीनस्यादेवेतिपंचमोभंगः वाइत्यथवा कर्तरिकारकौक्रूरौद्विविचरौनीचस्थितौयदास्यात्तांतदासानस्यादेवेतिषष्ठोभंगः हिःअवधा
रणे २९ अथपंचकदोषंसापवादमाह॰ लग्नमिति लग्नंइष्टलग्नं सेततिथि इताचासौतिथिश्चइततिथिः गततिथिः तयासहवर्तमानंसेततिथिग्रहैर्हृत नवभक्तंकार्यं
इभहग्वेदर्तुभूशेषकैः इभाष्टौ हशौद्वे वेदाश्चत्वारः ऋतवःषट् भूरेकः एतन्मितैःशेषकैः कृत्वाक्रमेणरोगाग्नीनहरात्ययाःस्युः रोगःप्रसिद्धः अग्निःप्र॰ इनो

स्वेजेसौम्यखगेपिवागुरुभृगुज्ञैः केंद्रकोणेषुवाचेत्स्तःकर्तरिकारकौद्विविचरौनीचस्थितौसानहि ॥२९॥ लग्नंसेततिथिग्रहैर्हृदिभहग्वेदर्तुभू
शेषकैरोगाग्नीनहरात्ययास्त्यजरुजंराज्यर्कभौमौजीषुच ॥ अग्निंभौमगृहद्युषुद्युशनिसेवेंदुष्विनंहारमीज्यारेतिष्वपरंविवाहसितविल्संध्यासु
हीनेतनौ ॥३०॥

राजा राजाधि[illegible]तिः स्वामीनायःपरिवृढःप्रभुः ईश्वरोधिपुरीशानो भर्तेंद्रइनईशितेतिधनंजयः हरश्चोरः अत्ययोमृत्युः एतेपंच
काःस्युरित्यर्थः एतदुक्तंभवति लग्नं[illegible]क्रमात[illegible]दिगततिथियुक्तंकृत्वा नवभिर्हृत्वा अष्टशेषेरोगः द्विशेषेऽग्निः चतुःशेषेराजा षट्शेषेचोरः एकशेषेमृ
त्युः अथैतेकुत्रवर्ज्याइत्याह [illegible]ज्यर्कभौजीषु रुजंत्यज [illegible]रात्रौ अर्केआदित्यवारे भौज्यां रुजंरोगंत्यज भौमगृहद्युषु अग्निंत्यज भौमः भौमवारः गृहं प॰
द्युः दिवा एषु अग्निंअग्निपंचकं[illegible] द्युशनिसेवेंदुषु इनंत्यज द्युर्दिवा शनिःशनिवारः सेवास्वामिसेवनं इंदुःसोमवारः एषुइनंराजानंराजपंचकंत्यज ईज्यारेतिषुहारंत्य
ज चौरंत्यज इज्योगुरुवारः [illegible]रः भौमवारः इतिर्गतिर्यात्रेतियावत् आसुचौरंत्यजेत्यर्थः विवाहसितविल्संध्यासु अपरंउर्वरितंमृत्युमित्यर्थः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विवाहः प्रसिद्धः सिनः शक्र [illegible] वित्तबुधवारः संध्यासंध्याकालः आसन्नमृत्युंत्यज अस्यापवादमाह कस्मिन्सति तनौलग्नेहीनेहीनबलेसति बलिष्ठेलग्नेसतिएषां किमपिनबाधइत्यर्थः तथाच [illegible]नि:प्रकाशे रोगंचोरंत्यजेद्रात्रौ इत्यादि तत्रापियत्रलग्नंबेइ लाद्यंतन्निष्फलमिति बलंजातकाद्ज्ञेयं लघुजातके अधिप युतोदृष्टोवाबुधगुरुनिरीक्षितश्च[illegible]राशिः सभवतिबल[illegible]यदासुक्तदृष्टोपिवाशेषैरित्यादि ३० अथभनवांशयोः शुद्धिंसापवादमाह जन्मर्क्षेति जन्मर्क्षोदयतः जन्मराशिजन्मलग्नाभ्यांसकाशान्मृतीय[illegible]ष्टमभवने[illegible]यौ तदधिपौतयोर्मृत्युभवनयोः स्वामिनौ येचतद्गाः मृत्युभवनगताःस्युः तेषांअंशोनवांशः अंगगोलग्नगतः चपरंतेषांभंराशिः अंगंलग्नगतंसत्तद[illegible]शुभिश्चयेन अंतकृत्मरणकृत्स्यात् तदाकदाचेद्यदितत्स्वामिमित्रैकतानस्यात् तयोर्जन्ममृत्युभवनयोः स्वामिनौन-

जन्मर्क्षोदयतोमृतीतदधिपौतद्गाश्चयेतल्लवास्तद्भंचांगगमंतकृत्वलुनचेत्तत्स्वामिमित्रैकता ॥शस्तोंशोधटभोरुयुग्मधनुषांविज्ञास्तभांशो तथाचंद्रासुण्ययुतौमृतिंवितनुतोदैन्यंचहीनौजसः ॥३१॥ स्वामिनौ तयोः अथवाःयमर्थः तयोर्जन्मनिधनभयोः स्वामिनौतत्स्वामिनौ तयोर्यदिमित्रैकतानस्यात् मित्रंचएकश्चमित्रैकौ मित्रैकयोर्भावोमित्रैकता साचेन्नस्यात् अनेनसर्वस्योक्तस्यसार्थकताभवति यदितयोर्भिन्नतास्यात् अथवाएकतास्यात्तदाना यंदोषइत्यर्थसिद्धम् वसिष्ठः यस्याष्टलग्नेतदधीश्वरेवाराशौतदीशैःयविलग्नगेवा समृत्युमाप्नोतियथामनोजरूस्त्रिनेत्रभालांबकवन्हिनेवेति अन्यच्च जन्मर्क्षजन्मलग्नाभ्यांलग्नेशावष्टमौचयौ विलग्नसंस्थितानेतांस्तद्राश्यंशानपित्यजेदिति चूडामणौ लग्नंव्यलिष्टषंत्याज्यमष्टमंसर्वकर्मसु तत्राप्येकेशतास्त्येवतत स्तन्नैवदोषकृत् नदोषोष्टमलग्नस्ययदिजन्मेशरंध्रपौ सुहृदौचेत्तदाकार्यमंगलंमुनयोविदुरिति चतुर्थद्वादशाभवनयोर्दोषोनात्रोक्तः यतश्चतुर्थद्वादशंल-ग्नंशस्तं यदिगुणान्वितमितिपूर्वाचार्यमतंहृदिधृत्वा सगुण मेवांगीकृतं तत्पुरस्ताद्वक्ष्यति नचतत्तुपंचेष्टरवेदानितां तनुंलग्नं इष्टाश्चतेरवेदाश्च इष्टरवेदाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचचतेइष्टखेटाश्चपंचेष्टखेटाः इष्टग्रहैः पंचभिःशुभदैः इष्टैरूनितंहीनंलग्नंचेद्देद्वर्गोनितमिति सगुणस्यैवांगीकारात् किंव्यर्थविस्तरेणेतिभावः अंशशुद्धिमाह
शस्तोंशाइति धटभीरुयुग्मधनुषांअंशाःशस्तःस्यात् धटस्तुला भीरुःकन्या युग्मंमिथुनं धनुःप्रसिद्धं एषामंशोनवांशःशस्तः प्रशस्तःस्यात् तत्रापिविशेषमा
ह विज्ञास्तभांशाविति विगतःज्ञोबुधोयेभ्यस्तेविज्ञाः तेचतेअस्ताश्च तेषांभांशौ राशिनवांशौ मृतिंवितनुतः अर्थादस्तमितस्यापिबुधस्यभांशौदोषकरौनभव
तः तथा चंद्रात्पुण्ययुतौ चंद्रेणपापग्रहेणवायुक्तौभांशौ मृतिंमरणंवितनुतः कुरुतः वधूवरयोरितिशेषः हीनौजसोर्निर्बलस्यभांशौदैन्यंदीनतांवितनुतः ३१
अथविशेषांतरमाह वर्गोत्तमइति वर्गोत्तमतः वर्गोत्तमेनविना अंतिमलवंचरमंनवांशंनोदद्यात् यल्लग्नंसएवनवांशोवर्गोत्तमं तथाचरर्क्षेचरलग्नेचरलवंचरन

नोवर्गोत्तमतोविनांतिमलवंदद्याच्चरर्क्षेचरंचंद्रेतौलिमृगास्यगेनचतनुंपंचेष्टखेटोनितां ॥ मेषादिष्वजनक्रतौलिककुलीराद्यानवांशाः-
क्रमादिष्टात्पूर्वनवांशकाद्दशहतास्त्र्याप्ताल्लवाद्यातनुः ॥३२॥

वांशंनोदद्यात् कस्मिन्सति चंद्रेतौलिमृगास्यगेतुलामकरगेसति एतच्चरभ
ययोगंनोदद्यादित्यर्थः अत्रचरचतुष्टय[illegible]तोचंद्रेतौलिमृगास्यगेइत्येवोक्तं तन्मेषकर्कटयोर्विवाहनक्षत्राभावात् तथातनुंलग्नंपंचेष्टखेटोनितांनोदद्या
त् यत्रलग्नेपंचइष्टग्रहाःनभवंति तल्लग्नंनदेयमित्यर्थः अथेष्टनवांशाल्लग्नसाधनमाह तत्रतावन्मेषादिषु आद्यांशानाह मेषादिष्विति मेषादिषुअजनक्र
तौलिककुलीराद्यानवांशाःक्रमे[illegible]क्ताः तद्यथा मेषेअजाद्याःमेषाद्याः वृषेनक्राद्याःमकराद्याः मिथुनेतौलिकाद्याःतुलाद्याः कर्कटेकुलीराद्याःकर्कटा-
द्याः एवंपुनःसिंहेमेषाद्याः क[illegible]यायांमकराद्याः तुलायांतुलाद्याः वृश्चिकेकर्काद्याः पुनर्धनुषिमेषाद्याः मकरेमकराद्याः कुंभेतुलाद्याः मीनेकर्काद्यानवां-
शाउक्ताइत्यर्थः इष्टाद[illegible]पूर्वनवांशकाःगतांशाःदशाहताःदशगुणिताःत्र्याप्ताः त्रिभिर्हृताः लवाद्याभागाद्याः तनुःलग्नंस्यात् अत्रोदाहरणं इष्ट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लग्नंमेषः तत्रमेषादिका अंश[illegible]भवर्ग्गेनेष्टांशः कन्यासआद्याल्पष्टः पूर्वांशकाः पंच एतेदशाहताः ५० भ्यासाः लवादिलब्धं १६।४० इष्टलग्नसहितंराश्यादि १६।४०। ३२ अथोदयास्तशुद्धिमाह [illegible]ांशाविति लग्नांशौलग्ननवांशौ स्वपद्दग्युतौ स्वस्वपतिनादृष्टौयुतौवासंतौ नृस्त्रखदौवरस्यस्त्रखदौस्यातां वाइत्यथवा अन्योन्यपाद्ध्येक्षितौ अन्योन्यपतिनाआढ्यौईक्षितौवासंतौनृस्त्रखदौस्यातां इत्युदयशुद्धिमुक्त्वाअस्तशुद्धिमाह ताभ्यांसप्तमकौनयैवेति ताभ्यांलग्नांशाभ्यांसकाशात्स सप्तमकौसप्तमलग्नतदंशौ तथैवेति पूर्ववत्स्वपद्दग्युतौयुवतःकन्यायाः स्त्रखदौस्यातां वाइत्यथवा तौसप्तमलग्नसप्तमांशकौ अन्योन्यपाद्ध्येक्षितौयुवतेःस्त्रखदौस्यातां नोचेत् एवंचेन्नस्यात् तदातयो[illegible]स्यातांक्रमेण अथेष्टकालेहोरासाधनमाह द्विघ्नेइति अर्कोनविलग्नकेद्विघ्नेकृतेसति द्युपतेःसकाशात् होरेशा

लग्नांशौस्वपदृग्युतौनृस्त्रखदौवान्योन्यपाद्येक्षितौताभ्यांससमकौतथैवयुवतेर्नोचेत्तयोर्मृत्युदौ॥ द्विघ्नेर्कोनविलग्नकेरविसितज्ञेंद्वार्किजीवासृजोहोरेशाद्युपतेः खलेऽन्हिखलजानेष्टा शुभेमध्यमा॥३३॥ लग्नेंद्वोःस्मरगेशुभाशुभखगेस्तश्चाधिमृत्यूततोऽंगोनात्कुतमौर्विकालवरवयमैर्लब्धंयदाद्यीषवः॥ भवंति तेषांगणनाक्रममाह तेकेहोरेशाः रविसितज्ञेंद्वार्किजीवासृजः रविःप्रसिद्धः सितःशुक्रः ज्ञोबुधः इंदुश्चंद्रः आर्किःशनिः जीवोगुरुः असृङ्मंगलः खलेऽन्हिपापवारे खलजाहोरानेष्टा शुभेमध्यमास्यात् अर्थाच्छुभहोराशुभवारेशुभतरा पापवारेमध्यमास्यात् अत्रोदाहरणं गुरुवारे इष्टार्काः १।२५।८ इष्टलग्नं ४।१०।० इदंअर्कोनं २।१४।५२ इदंद्विघ्नं ४।२९।४४ ऊर्ध्वांकसमानागताहोराश्चतस्रः वर्तमानापंचमीहोरा सागणनाक्रमेणद्युपतेर्गुरोःसकाशाद्गणनीया जीवासृजादिगणनयाबुधहोरावर्तमाना ३३ अथलग्नेंद्वोःपरजामित्रगग्रहज्ञानार्थंउपायमाह तावत्तस्यफलमाह लग्नेंद्वोरिति लग्नेंद्वोःस्मरगेसप्तमगेशुभाशुभखगेसतितदा आधिमृत्यूस्तः शुभेसति आधिर्मनस्तापोऽस्ति अशुभेसतिमृत्युरस्ति तदाकदा यदाततःस्मरगात्ग्रहात् अजांगोनात् चंद्रलग्नौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नात् चंद्रात्सप्तमस्थचंद्रोनलग्नात्सप्तमस्थोलग्नोनइत्यर्थः तस्मात्कृतमौर्विकात्कृतकलिकात्स्वरवयमैर्हिंशत्यालब्धं अव्धोषवः चतुःपंचाशत्स्यात् तदेव आधिमृत्यूक्तः अन्यथानेत्यर्थः अत्रोदाहरणं पूर्वकल्पितमिदंलग्नं ४।१०।० तत्सप्तमगोयंकश्चित् १०।११।७ अयंलग्नोनः ६।१।७ अयंकृतमौर्विकः १०८।७ अस्मात्स्वरवयमैः २०० लब्धं ५४ अथास्यभंगमाह सन्निति सन्सद्ग्रहस्त्विष्टोच्चनिजांशभेवर्तमानः अस्तंसप्तमभवनं अखिलंपूर्णंयदिपश्येत्तदातज्जामित्रंनस्यात् शोभनश्चासौइष्टश्चस्विष्टः शुभमित्रंस्विष्टश्च उच्चंचनिजश्च स्विष्टोच्चनिजाः अंशाश्चभंचअंशाभं स्विष्टोच्चनिजानांअंशाभं स्विष्टोच्चनिजांशाभं तस्मिन्स्विष्टोच्चनिजांशभे स्विष्टस्यशुभमित्रस्यअंशेनवांशेभेराशौवावर्तमानः अथवाउच्चस्यांशेभेवावर्तमानः अथवानिजस्यस्वस्यअंशेभेवावर्तमानः अस्तमखिलंपश्येत्तदा

सन्स्विष्टोच्चनिजांशभेस्तमखिलंपश्येदरिच्यायगेसूर्येवास्वजलाद्यकोणगशुभोवाज्जंमपश्येन्नतद्॥३४॥ व्यभंकोणमवायुरैनिगुरुभूपुत्राःक्रमात्पूर्णयादृष्ट्यान्येचरणोत्तरंचसकलाःपश्यंतिपूर्णंद्यूनं॥

तन्नेतिषड्भंगाः वाइत्यथवा अर्केरवौअरिव्यायगेसतिषष्ठतृतीयैकादशगेसति तन्नेतित्रयोभंगाः वाइत्यथवा स्वजलाद्यकोणगा[illegible]भः अब्जंचंद्रमसंपूर्णंयथास्यात्तथाइक्षेत्पश्येत् तदातन्नस्वंदशमंजलंचतुर्थं आद्यंलग्नंकोणेनवपंचमे एषामन्यतमगतोंन्यतमःशुभग्रहश्चंद्रमसंनिरिवलदृष्ट्याय[illegible]पश्येत्त[illegible]जामित्रंनस्यादित्यर्थः एतेपंचभंगाःसर्वेमिलिताश्चतुर्दशभंगाःसंपद्यंते ३४ अथदृष्टिलक्षणमाह व्यभमिति व्यभंतृतीयदशमंकोणंनवपंचमं अवायुश्चतुर्थाष्टमं एतद्ध[illegible]क्रमेणएनिगुरुभूपुत्राः शनिगुरुभौमाः पूर्णयादृष्ट्यापश्यंति ऐनिः शनिः व्यभं ३।१० गुरुः कोणं ९।५ भूपुत्रः अवायुः ४।८ एतेपूर्णया[illegible]दृष्ट्यापश्यंति तथाचैतत्क्रमत्रयं अन्येग्रहाश्चरणोत्तरंयथास्यात्तथापश्यंति तद्यथा व्यभं ३।१० एकपाददृष्ट्यापश्यंति कोणं ९।५ द्विपाददृष्ट्या अवायु[illegible]त्रिपाददृष्ट्यापश्यंति सकलाग्रहाः द्यूनंसप्तमंपूर्णंपश्यंति

५ ७ ५ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु॰ मा॰
३२

अथषड्वर्गसाधनंविवक्षुस्ता[illegible]नामान्याह भंहोरेति भंगृहं होराराश्यर्धं त्रिलवोद्रेक्काणः नवांशकः प्रसिद्धः इनांशोद्वादशांशः त्रिंशदंशः प्रसिद्धः क्रमादेतेव
र्गाः प्रोक्ताः शुभजः शुभग्रहजोवर्गः सन्शुभः प्रोक्तः परैराचार्यैः क्रूरदोमित्रस्यवर्गःसन् प्रोक्तः अब्धिवर्गोनकंअंगंचतुर्थवर्गोनंलग्नंसत्प्रोक्तं ३५ अथैषां
साधनमाह प्रोक्तमिति यस्यग्रहस्ययद्गृहंतत्प्राक्प्रोक्तं[illegible]शामंशुबुधमित्यादि अथहोरासाधनमाह ओजभेविषमराशौ अर्कशशिनोर्होरे क्रमेणभवतः प्र
थमपंचदशभागेषुअर्कस्यहोरा अपरपंचदशभागेषुशशिनः चंद्रस्यहोरास्यात् अथसमराशौअब्जार्कयोर्होरे क्रमेणभवतः प्रथमंपंचदशभागेषुअब्जस्यचं
द्रस्यहोरा अपरपंचदशभागेषुअर्कस्यहो[illegible]स्यात् अथद्रेक्काणसाधनमाह द्रेक्केडिति द्रेक्कोद्रेक्काणः त्रिविधोदशदशभागात्मकः तस्यईद्दूईशः प्राक्सुत

भंहोरात्रिलवोनवांशकइनांशास्त्रिंशदंशःक्रमाद्वर्गाःसन्शुभजः परैस्तुक्रूरदोनाब्ध्यूनवर्गाननुः ॥ ३५ ॥ प्रोक्तंप्राग्गृहमोजभेर्कशशिनोर्होरेस
मेब्जार्कयोर्द्रेक्केट्प्राक्सुतधर्मपोनवलवः प्रोक्तःस्वतोर्कांशकः ॥ शुक्रज्ञेज्ययमास्रजांशशरसुनीभार्थेषवोयुग्मभेत्रिंशांशाविषमेतएवगदिता
व्यस्ताश्चषड्वर्गकाः ॥ ३६ ॥

धर्मपोज्ञेयः प्राक्लग्नं सुतःपंचमंधर्मोनवमं तान्पातीतिप्राक्सुतधर्मपः एतदुक्तंभवति प्रथमद्रेक्काणस्वामीलग्नपतिः द्वि
तीयद्रेक्काणस्वामीपंचमपतिः तृतीयद्रेक्काणस्वामीनवमपतिः स्यादितिनवमलवः प्रोक्तः प्रागेवशास्त्रोंऽशइत्यादि अथद्वादशांशसाधनं स्वतोर्कांशकः स्व-
स्मादितिस्वतः लग्नतइत्यर्थः अर्कांशकोद्वादशांशोज्ञेयः तद्यथा राशिभागाः त्रिंशत् ३० एतेद्वादशभिर्विभाजिताः लब्धंसार्धभागद्वयं २।३० इदंद्वाद-
शांशमानंतदेवंगणनीयं सार्धभागद्वयंलग्नस्यद्वादशांशः तावदेवतत्पुरस्थस्येति लग्नस्योत्पन्नभागावसानपर्यंतंगणयेत् यस्मिन्राशौविश्रामः तत्स्वामी
द्वादशांशनायःस्यात् अथत्रिंशांशसाधनमाह शुक्रेति शुक्रःप्रसिद्धः ज्ञोबुधः ईज्योगुरुः यमःशनिः अस्रक्मंगलः एषांपंचानांक्रमेणशरसुनीभार्थेषवः

टी॰
३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्युः शराः पंच मुनयः सप्त इभाः अष्टौ अर्थाः पंच इषवः पंचभागाः शकाद्यादीनांस्फः एतत्क्रमभोसमराशौज्ञेयं एतदपिलग्नोत्पन्नभागावसानपर्यंतंगणयेत् यत्र विश्रांतिः सत्रिंशांशनाथः विषमेराशौतएवगदितायुग्माः भागाश्चव्यस्ताविलोमाज्ञेयाः इतिषड्वर्गोनिरूपितः॥अथइष्टकालसाधनंविवक्षुस्तावत्सूर्यसाधनमाह सं क्रांत्यंतरइति अंतः अंतरालंतत्र अहानिदिनानिसंक्रांत्योः अंतरहानि संक्रांत्यंतरहानितैः हृतः भाजितः एवंविधोदिनगणः संक्रांतेः सकाशात् इष्टदिनसमूहः तस्मात्यदाप्तंलब्धं सभपूर्वोराशिभागकलादिकोरविःस्यात् किंभूतःरविः मेषात्सकाशात् यातभयुक् गतराशियुक् सूर्यभुक्तराशियुगित्यर्थः सतात्कालि कोरविःस्यादित्यर्थः अत्रोदाहरणं तुलावृश्चिकसंक्रांत्योरंतरदिनानि २९।५४।० तथातुलासंक्रांतेः इष्टदिनगणः ५।६।० अस्मादिनगणात्संक्रांत्यंतरहोभिर्ल

संक्रांत्यंतरहोद्धृताद्दिनगणादाप्तंभपूर्वोरविर्मेषाद्यातभयुग्युतोयनलवैःरात्रौसषड्भः सच ॥ तद्भोग्यांशानिजोदयाहृ
तिवियत्त्र्यामंतयालग्नतोभुक्तांशाकलितेनयुग्विवरगैः कालस्फुटोभोदयैः ॥ ३७ ॥ ॥ श्रीमल्लक्ष्मी ॥

ब्धंराश्यादि ०।५।७।१ अयंतात्कालिकःसूर्यः [illegible]नलवैः युतः कार्यः अयनांशाः ग्रंथांतरेप्रसिद्धाः खनाब्ध्यब्धूनितेशाके षष्ट्याप्ताअयनांशकाइति सअयनलवयुतोरविः रात्रौ रात्रीष्टकालसाधनविषयेसषड्भः कार्यः षड्राशियुक्तः कार्यः तद्भोग्यांशंनिजोदयाहतिः खरामाप्तंकालः स्यात् तस्यसायनांशस्यरवेः भोग्यांशाः तद्भोग्यांशा श्चनिजोदयाश्चतेषामाहतिः गुणनं तस्याः सकाशात् खरामाः त्रिंशतालब्धं ससूर्यस्य भोग्यकालः स्यात् निजोदयाः स्वदेशीयराश्युदयाः तेब्रह्मतुल्यादिभ्यो वगंतव्याः कथंभूतःकालः तथैवांगतोयुक्तांशाकलितेनयुक् तथैवसूर्यस्यभोग्यकालसाधनरीत्या अंगतः लग्नात् भुक्तांशाकलितेन भुक्तांशैः भुक्तभागैः आ कलितेनकालेनयुक्युक्तः [illegible]दुक्तंभवति इष्टलग्नंअयनलवयुतंकृत्वा तद्भुक्तांशैः निजोदयागुणनीयाः त्रिंशताभाज्याः लब्धंलग्नभुक्तकालः तेनकालेनसरविर्भु-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कः काले युक्तः कार्य इत्यर्थः पुनः कथंभूतः विवरगैः भोदयैः युक् विवरं सूर्यलग्नांतरालं तत्र गतैर्भोदयैः राश्युदयैः युक् युक्तः सपलमयः कालः स्फुटः स्पष्टः इष्ट कालः स्यात् षष्टिभक्ते घटिकात्मकः स्यादित्यवगंतव्यम् ३७ अथेष्टकालसाधने विशेषमाह लग्नार्काविति लग्नार्कौ लग्नसूर्यौ यादि एकभेस्त स्तदा अंशवि वरात् लग्नार्कयोर्भागांतरात् स्वीयोदयघ्नात् निजराश्युदयगुणितात् यावियत्र्याप्तिः त्रिंशतालब्धिः सकालः स्यात् इष्टकालः स्यात् तत्रापि विशेषमाह इना त्तनुरिति इनात्सूर्यात्तनुर्लग्नं यदि तनुः लघुः स्यात्तर्हि सोइष्टकालः सूर्योदयात्प्राक् पूर्वस्यात् सोपि षष्ट्या भक्तो घटिकात्मकः स्यादित्यवगंतव्यं अथज्ञातंका लं यंत्रैर्विना साधितुं नशक्यते अतोयंत्रा[illegible]मध्ये सुख्यस्य घटीयंत्रस्य स्थापनकालमाह कुंडेति अंभः परिपूरिते उदकपूर्णकुंडे पात्रे घटिका मज्जनक्ष

लग्नार्कौ यदि चैकभेंऽशविवरात्स्वीयोदयघ्नाद्धियत्र्याप्तिः काल इनात्तनुर्यदि तनुः सूर्योदयात्प्रागसौ
कुंडेंऽभः परिपूरिते स्फुघटिकामर्धोदयास्तेन्यसेत्कृत्वाग्नित्रयवायुगानशुभदा पूर्णाग्निपंचस्वथ ॥३८॥

मे कुंडग्रहणं उत्तानपात्रव्युदासार्थं तस्मात्कुंडरूपपात्रे उदकपूरिते स्फुघटिकां षष्टिपलस्फुट्वां न्यसेत् निक्षिपेत् कस्मिन्सति अर्धोदयास्ते जाते सति सूर्यस्य अर्धो दये अर्धास्ते च जाते सति किंकृत्वा स्कृत्वा प्रार्थयित्वा प्रार्थनाग्रंथांतरे उक्ता यंत्राणां मुख्यरूपासि ब्रह्मणा निर्मिते घटि दंपत्योः शुभकालासिद्धेतवे भव शोभन इति प्रतिष्ठितायां घटिकायां तद्गमनफलमाह साप्रतिष्ठिता घटी अग्नित्रयवायुगानशुभदा स्यात् अग्नित्रयं आग्नेयादि प्रदक्षिणक्रमेण दिशात्रयं वायुर्वायव्यदिशा इ तिदिक्चतुष्टयं प्रतिगतानशुभदा अर्थादन्यदिग्गता तत्रैव स्थिता वा शुभदा स्यात् तथाचोक्तं ग्रंथांतरे संस्कृत्यैवं घटी तोये यां दिशां प्रतिगच्छति पूर्वाशादि फलं कुर्यात्स्थिता मध्ये धनप्रदा सौभाग्यं निर्धनं नार्या अपमृत्युरुजान्विता भर्तृप्रिया च वेश्या च मान्या वित्तसुतान्वितेति एवं गमनफलमुक्त्वा पूर्णताफलमाह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्णाग्निपंचस्वथेति अग्निपंचसु आग्नेयादिपंचसु दिक्षु पूर्णा घटी न शुभदा स्यात् अर्थादन्यदिक्षु पूर्णा शुभा स्यात् उक्तंच उत्तरेशान्यपूर्वासु घटीपूर्णा शुभप्रदा दिक्षु शेषासु कन्यायामग्नौ वैधव्यदायिनीति ३८ अथ गोधूललग्नमाह गोधूलमिति गोधूलं लग्नं सर्वकालस्थं पदजादिके हीनजातौ शुभकरं प्रोक्तं न पूर्ववर्णानां कु पंचांगशुद्धौ विवाहोक्तपंचांगे अत्र पंचांगशुद्धिर्मुख्या तत्र कालप्रमाणं विशेषणद्वारेणाह कथंभूतं गोधूलं अर्धास्तात्सकाशात्प्राक्परतोऽर्धघटिकं अर्धघटिका यस्मिन्नित्यर्धघटिकं प्राक्पंचदशपलानि परतः पंचदशपलानि एवमर्धघटिकमित्यर्थः अत्र त्याज्यमाह इहास्मिन् गोधूललग्ने षष्ठाष्टगमिंदुं चंद्रं जह्यात् त्यजेत् पुनः किं जह्यादित्याह सो-ग्रांगमिति सोग्रांगं उग्रग्रहसहितं लग्नं कुजं भौमं अष्टमं गुरुयमाहः गुरुशनिदिनं पातं महापातं सिद्धांतगम्यं अर्कभ्रमं सूर्यसंक्रांतिं जह्यात् अन्ये दोषानत्याज्याद्

गोधूलं पदजादिके शुभकरं पंचांगशुद्धौ रवेरर्धास्तात्परपूर्वतोऽर्धघटिकं तत्रेंदुमष्टारिगं ॥ सोग्रांगं कुजमष्टमं गुरुयमाहः पातमर्कभ्रमं जह्याद्विप्रसु
रेवेतिसंकटइदं सद्यौवनाद्ये क्वचित् ॥ ३९ ॥

त्यर्थः अत्र गुरुयमाहस्त्यक्तं तद्दोषोपलंभात् गुरुदिने सूर्यास्तात्प्राक् यामार्धं परतो यमघंटः शनिदिने अस्तमयात् प्राक्परतश्च कुलिकौ उक्तंच मार्तंडोदयतः [illegible]सादिनपतेर्यामार्धनाथाग्रहा मार्तंडात्मज भोग उत्तरलवस्तज्ज्ञैः शुभे कर्मणि त्याज्योसौ कुलिको यः सूर्यदिवसादानेश्च शा-क्रार्कदिग्वसवंगाब्धियमैः स्मृतः कुरहितैर[illegible]त्तु तिथ्यंशाकैरिति त्याज्योसौ कुलिक इत्यनेन शनौ अस्तात्प्राक् कुलिको भवति इनादौ कुलिकं दिवेत्यादिव्येकं तन्निशीनि न्यायेन अस्तात्परतोपि कुलिको भवति इति हेतोर्गुरुशनिवारौ निंदितौ अथ विप्रादीनामपि क्वचित्कार्यविशेषेण गोरजप्रवृत्तिमाह विप्रसुरवेतिसंकटइदं सद्यौवनाद्ये क्वचिदिति यौवनाद्ये अतिसंकटे प्राप्ते सति क्वचित् लग्नशुद्ध्यभावे इदं गोधूलं विप्रसुरवे विप्रप्रभृतिवर्णत्रये सत् शुभं स्यात् अन्यथा नेत्यर्थः सिद्धं तदुक्तं ज्योतिर्निबंधे घटीलग्नं यदा नास्ति तदा गोधूलिकं स्मृतमिति शूद्रादीनां बुधाः प्राहुर्न द्विजानां कदाचन लग्नशुद्धिर्यदा न स्याद्यौवने समुपस्थिते तदा वै सर्ववर्णानां लग्नं गोधूलिकं शुभमि
ति ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु॰भा॰
३४

अथोद्वाहवेदिकालक्षणमाह वेदीति प्राक्प्रवणा पूर्वनिम्ना चतुर्वरकरा चतुर्भिर्वरकरैः प्रमिता वरोवैवाह्यः हस्तोच्छ्रिता हस्तप्रमाणेनोन्नता इयमग्र्यस्यब्राह्मणस्यप्रो
क्ता सावेदीदोर्जादेः क्षत्रियादेः क्रमेणद्वित्रियुगांगुलैरपचिताहीना क्षत्रियस्यद्व्यंगुलन्यूना वैश्यस्यत्र्यंगुलोना शूद्रस्यचतुरंगुलोना साचकार्येत्याह बहिर्वामतइति
गृहाद्बहिर्वामभागे अंगुलप्रमाणंमार्कंडेयपुराणेउक्तं परमाणुः परंसूक्ष्मंत्रसरेणुर्महीरजः वालाग्रंचैवलिक्षाचयूकाचाथयवोदरं क्रमादष्टगुणानाहुर्यवानामष्टतो
गुलं षडंगुलंपदंतच्चवितस्तिर्द्विपदंस्मृता द्विवितस्तीतथाहस्तोमार्कंडेयमुनीरितइति आगमांतरेपि कर्तुर्दक्षिणहस्तस्यमध्यमांगुलिपर्वणः मध्यमादैर्घ्यमाने
नमात्रांगुलमितीरितमिति अन्यत्रोक्तं [illegible]पौरुषायामंविभज्यदशधापुनः एकंद्वादशधाभागंकृत्वातेष्वेकमंगुलं देहलब्धांगुलंनामजानीयात्तस्यतत्तु

वेदीप्राक्प्रवणाचतुर्वरकराहस्तोच्छ्रिताग्र्यस्यदोर्जादेर्द्वित्रियुगांगुलैरपचितासोक्ताबहिर्वामतः ॥
यस्यांगंयदद्दोंगिनोगदितभेकुर्यादिहंदोर्बलंनालोक्यंतुविवाहतस्त्र्यरिनवान्हिप्राङ्नकुर्यादिदं ॥४०॥

नः महामानांगुलिरितिमात्रांगुलिरिहोदिता प्रासादादीनितेनैवकुर्यान्मानांतरेणवा वेदिकादीनिशिबिकारथादीनांविधिः पुनरित्यादि अत्रवरकरग्रहणं तस्यहोमकर्तृत्वा
त् ननुकन्यायाअपिलाजाहुतौकर्तृत्वमस्ति तत्करप्रमाणंकिन्नोक्तं सत्यमल्पावकाशस्थलेकन्याकरप्रमाणमप्यंगीक्रियते तथाचोक्तंदेवयजनदीपिकायां स्वल्पावकाश
निलयेहीनंमानंसमाश्रयेदिति अथनानाविधकर्मणां अंगंकस्मिन्नक्षत्रेकर्तव्यमित्याह यस्यांगमिति यस्यकर्मणः यत् अंगं अदइदं अंगंअंगिनोमुख्यस्यगदितभे
उक्तनक्षत्रेकुर्यात् इहास्मिन्नंगभूतेकर्मणिइंदोर्बलंनावलोक्यंनविचारणीयं तत्रविशेषमाह विवाहतः विवाहदिनात्प्राक् त्र्यरिनवान्हि तृतीयषष्ठनवमे न्हिइदं-
अंगंविवाहांगंनकुर्यात् विवाहांगानियथा दलनंकंडनंचैवव्यंजनंमोदकानिच यवारमंडपोवेदिकुंकुमंवर्णकंतथेति ४० ७ ७

टी॰

३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथक्रमप्राप्तंवधूप्रवेशमाह लग्नादिति लग्नाद्विवाहतःसकाशात्‌अष्टिदिनांततः षोडशदिनमध्येसमसुनीष्वंकेषु घस्त्रेषुसमाः समसंख्याकाः सुनिः सप्तमः इषुःपंचमः
अंकोनवमः एषुघस्त्रेषुदिवसेषु ॥ अतोर्ध्वंषोडशदिनादूर्ध्वंअयुग्घस्त्रेविषमदिने मास्यपिविषमेहायनेवर्षेवधूसंप्रवेशंजगुरूचुः एतदुक्तंभवति षोडशदिनमध्येसमादि
षुदिनेषुकर्तव्यः षोडशदिनातिक्रमेमासपर्यंतंविषमदिनेवधूप्रवेशःकार्यः प्रथममासातिक्रमेवर्षपर्यंतंविषमेमासिकर्तव्यस्तदाविषमदिननियमोनास्ति एवंप्रथ
मेवर्षेअतिक्रांतेपंचमवर्षपर्यंतंविषमेवर्षेकर्तव्यस्तदाविषममासनियमोनास्ति पंचमाद्वर्षात्परंविषमवर्षनियमोनास्ति अथविलंबितवधूप्रवेशंकुर्युर्मासपक्षेकर्त
व्यइत्याह वैफामार्गसिते वैवैशाखः फाफाल्गुनः मार्गोमार्गशीर्षः एषांसितःशुक्लपक्षस्तस्मिन् कैः श्रुतियुगोद्वाहर्क्षैश्चित्राश्विनीज्यर्क्षैः श्रुतियुगंश्रवणधनि

लग्नादष्टिदिनांततःसमसुनीष्वंकद्यःसूर्ध्वंत्वयुग्घस्त्रेमास्यपिहायनेशरमिताद्वर्षात्परंस्वेच्छया ॥ वैफामार्गसितेजगुःश्रुतियुगोद्वाहर्क्षचित्राश्वि
नीज्यर्क्षैश्चानवमंदिरेनिशिवधूसंवेशमंगेस्थिरे ॥ ४१ ॥

ष्ठे उद्वाहर्क्षाणिविवाहनक्षत्राणिपूर्वोक्तानि चित्राश्विनीप्रसिद्धे इज्यर्क्षंपुष्यः तैः अनवमंदिरेजी
र्णगृहे नवीनमंदिरेकन्यांनवोढांनप्रवेशयेत्[illegible]निषेधादनवमंदिरइत्युक्तं ॥ उक्तंच वधूप्रवेशनंकार्यंपंचमेसप्तमेदिने ॥ नवमेचशुभेवारेसल्लग्नेशशिनोबलइति
नारदः आरभ्योद्वाहदिवसात्षष्ठेवाप्यष्टमेदिन ॥ वधूप्रवेशःसंपत्त्यैदशमेऽथसमेदिनइति संग्रहे विवाहमारभ्यवधूप्रवेशोयुग्मेनयाषोडशवासरांतात् तदू
र्ध्वमध्येयुजिपंचमांनादतःपरस्तान्नियमोनचास्ति वृद्धनारदः समेवर्षेसमेमासियदिनारीगृहंविशेत् आयुष्यंहरतेभर्तुःसानारीमरणंव्रजेत् भास्करव्य
वहारे रात्रौविवाहभेशस्तःसन्मुहूर्तेस्थिरोदये वधूप्रवेशोनैवात्रप्रतिशुक्रादिदूषयंविदुः ऋक्षैर्वैवाहिकैःशुद्धेदंपत्योश्चशशिप्रदे वधूप्रवेशनंकार्यंपंचमेद्व्यब्द
तुर्यदि मार्गफाल्गुनवैशाखेशुक्लपक्षेशुभेदिने मूलपुष्यमृदुस्वातीस्थिराश्विश्रुतिवासरे ॥ पितृभेचकरेनारीप्रविष्टापुत्रिणीभवेदिति ॥ ४१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु·मा·
३५

इदानीं प्रथमाषाढादौ भर्त्रादिगृहेवासनिषेधमाह उद्वाहादिति उद्वाहात् विवाहादुपरि प्रथमे शुचौ आषाढे कन्या यदि भर्तृगृहे वसेत्तदा तज्जननीं तस्य भर्तुर्जननीं ह
न्यादित्यादि सुगमं ४२ अथ पुनर्भूविवाहमाह शूद्राः प्रसिद्धाः अंत्याः रजकादयः तेषु पुनर्भवापरिणयः प्रोक्तः कैः विवाहोक्तभैः स्पष्टं ॥ तत्र पुनर्भवापरिणये तिथि
मासवेधगुरुशुक्रास्तादिन आलोक्यं स्पष्टं तथा चोक्तं ज्योतिर्निबंधे नशुक्रास्तादिकं चिंत्यं शुद्धिवेधादिकं तथा पुनर्भवासंवरणे न मासतिथिशोधनम् इति उक्तं च पु
नर्भवासंवरणे न शुद्धिर्न मासदोषो ग्रहवेधलत्ता नचास्त शुक्रोदयवाक्पतिः स्यात्पदृग्गणः स्याच्छुभदो विवाहमिति अथ ब्रह्मपदृनक्षत्रशुद्धिमाह अर्कभात्सूर्यनक्ष

उद्वाहात्प्रथमे शुचौ यदि वसेद्भर्तुर्गृहे कन्यका हन्यात्तज्जननीं क्षये निजतनुं ज्येष्ठे पतिज्येष्ठकं ॥ पौषे च श्वशुरं पतिं च मलिने चैत्रे स्वपित्रालये ति
ष्ठंती पितरं निहंति न भयं तेषामभावे क्वचित् ॥४२॥ शूद्रांत्येषु पुनर्भवापरिणयः प्रोक्तो विवाहोक्तभैर्नालोक्यं तिथिमासवेधभृगुजेज्यास्ता-
दिनत्रार्कभात् ॥ त्रित्र्यृक्षेषु मृतिर्धनं मृतिमृती पुत्रा मृतिर्दुर्भगं श्रीरान्त्यसयोधृती १८ श ११ कृत ४ तत्व २५ क्षैस्त्र्ययः साभिजित् ॥४३॥
भुक्तायैव कृतामुपोषितनरो दद्याच्च सावित्रिकामारब्धोत्सवके यदा जनिमृती स्यातां स्वगोत्रे क्वचित् ॥

अत्र त्रित्र्यृक्षेषु त्रिषु त्रिषु नक्षत्रेषु क्रमेण मृति
मरणं प्रथमे त्रिके द्वितीये त्रिके धनं तृतीये मृतिः चतुर्थे मृतिः पंचमे पुत्राः षष्ठे त्रिके मृतिः सप्तमे दुर्भगं अष्टमे लक्ष्मीः नवमे त्रिके अंत्यं प्रोक्तं अथ रुद्रपदृशुद्धिमाह
अर्कभादित्यनुवर्तते धृती शक्रकृततत्वर्क्षे धृतिरष्टादशं ईशाएकादशं कृतश्चतुर्थं तत्वं पंचविंशं एतन्मितेन क्षत्रे अर्कभादेतन्मित इत्यर्थः तत्र चतुष्टये साभिजिद्गणिते
अत्ययो मृत्युः स्यात् ॥ अर्थादन्येषु शुभं प्रोक्तमिति ४३ अथ नानाविधशास्त्रार्थानाह उपोषितनरः भुक्तायकृतभोजनायैव कृतां दद्यात् चपरं उपोषितनरः भु
क्तायैव बटवे सावित्रिकां गायत्रीं दद्यात् तदुक्तं ज्योतिर्निबंधे भुक्तास सुद्वहेत्कन्यां सावित्रीग्रहणं तथा उपोषितः कृतां दद्यादागताय वराय चेति आरब्धोत्सवके यदा

टी·
३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनिमृतीस्यातांस्वगोत्रेक्कचित् सांगंतंविदधीन वाजमपरे इति वाजं अन्नं अपरे असगोत्रिणो विदधीरन् वाजमन्नंगरुड्वाजो वाजंपीयूषमुच्यत इत्यनेकार्थध्वनि
मंजर्यां शेषंस्फुगमं उक्तंच विवाहोत्सवयज्ञादावारब्धेसूतकंयदि सांगंतत्कर्मकुर्वीत अन्नदानादिकंपरैरिति अस्मादारभेत्पूर्वतो यज्ञोद्वाहनचौलमौंजिकमहः स्फुस्व
र्गदिक्कुत्रित्रिषु अस्मान्निश्चितदिनात्पूर्वतः प्रथमतः यज्ञोद्वाहनचौलमौंजिकेत्येतत् कर्मचतुष्टयंक्रमात्स्वर्ग २१ दिक् १० त्रि ३ त्रिषु ३ अहस्स्फु आरभेत् यज्ञएकविं
शतिदिनेषु उद्वाहनंविवाहः दिक्स्फुदशस्फुदिनेषुचौलं त्रिषुदिनेषु मौंजिकं त्रिषुदिनेष्विति उक्तंच एकविंशत्यहर्यज्ञेविवाहेदशवासराः त्र्यहेचूडोपनयनेनांदीश्रा
द्धंविधीयते आरंभलक्षणं आरंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः नांदीश्राद्धंविवाहादौश्राद्धेपाकपरिक्रिया ४४ क्षयदर्शनैत्यकंश्राद्धं अधीतिंपठनं शीतला

सांगंतंविदधीतवाजमपरेस्मादारभेत्पूर्वतोयज्ञोद्वाहनचौलमौंजिकमहः स्फुस्वर्गदिक्कुत्रित्रिषु ॥ ४४ ॥ नोश्राद्धंक्षयदर्शनैत्यकमधीतिंशी
तलाप्स्वाप्लुतिंसीमासिंध्वतिपातमेककुलजाः सव्यातिपातंक्कचित् ॥ उत्थापावधिमंडपस्यसशरागान्होर्विषष्ठेसमेन्ह्यस्फुद्वास्योनगृहो
द्वाहोसहजयोस्तुल्याक्रियाब्दांतरे ॥ ४५ ॥ स्फुशीतलोदकेषु आप्लुतिंस्नानं सीमासिंध्वतिपातं सीमा प्रसिद्धा सिंधुर्महानदी सिंधुर्नदीसमुद्रयोरि-
त्यभिधानात् तयोरतिपातः उल्लंघनं सव्यातिपातं अपसव्यमित्येतत् एककुलजाः गोत्रिणः क्कचिन्नोकुर्युः किमवधि मंडपस्यउत्थापावधि यावन्मंडपोत्थापनं
स्यात् तावन्नकुर्यादित्यर्थः उक्तंच दर्शश्राद्धंक्षयश्राद्धंशीताद्भिः स्नानमेवच प्राचीनावीतिकरणंनदीसीमातिपातनं ॥ अन्यत्र नित्यश्राद्धमधीतिंचस्नानंचशि
शिरैर्जलैः सपिंडानैवकुर्वीरन्मंडपोत्थापनावधि अथसमंडपोत्थापः कदाकार्यइत्याह सशरागान्होरिति शराः पंच अगाः सप्त तस्मिन्मितान्होर्दिनयोः
पंचमे सप्तमे विषष्ठेसमे षष्ठरहितेसमेन्हि समदिनेउत्थाप्यः उक्तंच मंडपोत्थापनंकार्यंसमेतुदिवसेबुधैः षष्ठंचविषमंनेष्टंमुक्त्वापंचमसप्तमौ इति अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्दांतर्वर्षमध्येंगृहोद्वाहौनकर्तव्यौ सहजयोः एकमातृजयोः पुरुषयोः पुरुषस्त्रियोः समानक्रियासमानंकर्मनकुर्यादित्यर्थः भिन्नमातृजयोर्नदोषइत्यर्थात्सिद्धं अर्थाद्भिन्नमातृजयोस्तथा सहोद्वाहादिकरणमागतं तद्भिन्नकर्तृत्वेभिन्नगृहेसतिवेदितव्यं कर्तृत्वमत्रश्राद्धाधिकारिणः पित्रोरेव नतुविवाहहोमंकर्तुर्वरस्य तथाचोक्तं एकमातृजयोरेकवत्सरेपुरुषस्त्रियोः नसमानक्रियांकुर्यान्मातृभेदेविधीयतइति पुरुषौपुरुषस्त्रियौ पृथक्‌द्वित्वविवक्षयाबहुत्वासंभवान्नबहुत्वं यद्वा पुरुषश्चस्त्रीचतथातयोर्द्वयोः पुरुषयोःस्त्रियोर्वा कन्यापुरुषयोर्विवाहविशेषश्चोक्तः सोदर्ययोः कन्यकयोः स्नातयोरेकवत्सरे विवाहोनस्मृतस्तज्ज्ञैः कन्यकास्नातयोःस्मृतइति अ[illegible]वत्सरमानं मनुजमानेनचैत्रादिफाल्गुनांतंवेद्यं समानक्रियेतिद्वयोश्चौलेद्वयोर्व्रतबंधेद्वयोर्विवाहोवा सहजयोरित्यनेनैव एकमा

उद्वाहव्रतचूडकेब्ददलतत्खंडंनिलैस्तर्पणंश्राद्धंपिंडयुतंमहालयगयापित्र्यंविनानाचरेत्

तृजत्वंसंभवति उक्तंच नैकस्मिन्वत्सरेकार्यौगृहोद्वाहौकदाचन गृहादुद्वाहइष्टःस्यादुद्वाहान्नगृहंक्वचिदिति उद्वाहाद्गृहस्यारंभोनेष्टः ४५ वर्ज्यांतराण्याह उद्वाहेति उद्वाहव्रतचूडकेक्रमेण अब्ददलतत्खंडं अब्दश्चदलंतत्खंडंच उद्वाहेविवाहेकृतेसति अब्दंवर्षपर्यंतं व्रतेव्रतबंधेकृतेसति दलंअब्दार्धंषण्मासपर्यंतमित्यर्थः चूडकेचौलकर्मणिकृतेसति तत्खंडं तस्यदलस्यापिखंडं त्रिमासपर्यंतमित्यर्थः तिलैस्तर्पणंपिंडयुतंश्राद्धंचनाचरेत् किंविना महालयगयापित्र्यंविना महालयंभाद्रपदापरपक्षः गयाप्रसिद्धा पित्र्यंमातापित्रक्षयदिनं तत्रयत्श्राद्धंक्रियते तत् महालयगयापित्र्यं तद्विना उक्तंच विवाहव्रतचूडासुवर्षमर्धंतदर्धकं अतिलंतर्पणंकुर्याच्छ्राद्धंकुर्यादपिंडकं महालयेगयाश्राद्धेमातापित्रोःक्षयेऽहनि कृतोद्वाहोऽपिकुर्वीतपिंडदानंयथाविधीति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वमिति सप्तपदीविधेः पूर्वं प्रथमतः दोषे अंधमूकादिके अधिगते ज्ञाते सति वाइत्यथवा वरे मृते सति कन्या अन्यत्र देया अपि च या कन्या बलाद्विवाहिता सापि अन्यत्र देया
तर्हि कथं चेद्यदि विद्धयोनिर्नस्यात् विद्धायोनिर्यस्याः सा न तथा पुरुषभुक्तेत्यर्थः उक्तं च याज्ञवल्क्येन महादोषे स्वविज्ञाते पूर्वं सप्तपदीविधेः मरणाद्वोसप्तुतस्ने देयाः
न्यस्मैन दोषभाक् बलादुद्वाहिता कन्या दातव्यान्यवराय चेति अन्यच्च बलादुद्वाहिता कन्या मंत्रैर्यदि न संस्कृता अन्यस्मै विधिवद्देया यथा कन्या तथैव सेति महा
दोषाः कारिकानिबंधे उक्ताः अंधो मूकः क्रियाहीनश्चापस्मारी नपुंसकः दूरस्थः पतितः कुष्ठी दीर्घरोगी वरो न सत् अन्येपि दोषा उक्ताः मूर्खो निर्धन दूरस्थ शूरमोक्षाभि
लाषिणां त्रिगुणाधिकवर्षाणां न देया जातु कन्यकेति पुरुषनपुंसकलक्षणं यस्याप्सु प्लवते बीजं ह्रादि मूत्रं च फेनितं पुमान्स्याल्लक्षणैरेतैर्विपरीतैस्तु षंढकः अप

पूर्वं सप्तपदीविधेरधिगते दोषे वरे वा मृते देयाऽन्यत्र विवाहितापि च बलाद्या विद्धयोनिर्न चेत् ॥४६॥ अस्त्रीकैः कुशहेमरौप्यरचिता ताम्रीच
विप्रादिभिर्भार्या वा निखिलैः स्वर्णरचिता धर्माय धार्या बुधैः ॥ मंदारार्कदिनैः बुपाग्निफणिभं भद्रातिथिश्चेदिहोद्वूता सा विषकन्यका यतनु
गौसौम्यौ रिपुक्षेत्रगौ ॥४७॥

री स्य[illegible]नेदोषः अपरीक्ष्य वरं कन्यां निर्गुणाय प्रयच्छति कुलं तस्यैव तच्छोकसंतप्तो विनिकृन्तति इति ४६ अथ स्त्रीरहितानां-
विधिमाह अस्त्रीकैरिति अस्त्रीकैः स्त्रीरहितैः विप्रादिभिर्विप्रक्षत्रियविट्शूद्रैः क्रमेण कुशहेमरौप्यरचिता ताम्रीच भार्या धर्माय धार्या ॥ अयमर्थः विप्रेण कुश
रचिता भार्या धर्माय धार्या क्षत्रियेण हेमरचिता वैश्येन रौप्यरचिता शूद्रेण ताम्री ताम्ररचिता भार्या धार्या कथंभूतैर्विप्रादिभिः बुधैः स्वस्वधर्मनिरतैः वाइत्यथ
वा निखिलैः सर्वैर्विप्रादिभिः स्वर्णरचिता भार्या धार्या यतस्तया विना गृहस्थधर्मसाधनं न स्यात् तथा चोक्तं अपत्नीकैस्तु धर्मार्थं कौशी हैमी च राजती ताम्री वि
प्रादिभिर्भार्या धार्या हैमी तथाखिलैरिति अथ विषकन्यालक्षणमाह मंदेति मंदारार्कदिने शन्यर्कभौमानामन्यतमस्य वारे अंबुपाग्निफणिभं शततारकाकृत्तिकाश्लेषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णामन्यतमंनक्षत्रं भद्रातिथिर्द्वितीयासप्तमीद्वादशी आसामन्यतमाचेत्स्यात्तदायोगः स्यात् इहोद्भूताअत्रयोगेयाकन्याजातासाविषकन्या अथयोगांतरमाह रि
पुक्षेत्रगौसौम्यौ तनुगौलग्नगतौचेत्स्यातां ४७ एकः क्रूरः रिपुक्षेत्रगः तनुगश्चेत्स्यात् इमौद्वौयोगौइहोद्भवापिविषकन्यकास्यात् अथयोगांतरमाह तनौलग्ने
सौरिः शनिः स्यात् रविः सूर्यः पुत्रगः पंचमगः स्यात् धरणीसुतोभौमोधर्मस्थोनवमस्थोयदास्यात्तदा अयंपरोयोगः स्यात् तज्जापिकन्याविषंस्यात् विषमिति
यथाविषस्वीकारान्मृत्युर्भवति तथाविषकन्यांगीकारान्मृत्युर्भवतीतिफलंसूचितम् तस्मात्परित्याज्येतिभावः अथमूलजादीनांफलमाह मूलेति मूलस्यआद्यत्रि
पदोद्भवाप्रथमचरणत्रयेजाताकन्याश्वशुरं[illegible]मारयति अह्यंत्यत्रये अहिराश्लेषातस्य अंत्यत्रयं तत्रजातातस्त्रियं तस्यश्वशुरस्यास्त्रियंश्वश्रूंहंतीत्यर्थः ज्येष्ठां

एकः क्रूरइहोद्भवाप्यथतनौसौरीरविः पुत्रगोधर्मस्थोधरणीसुतोयमपरोयोगोपितज्जाविषा ॥ मूलाद्यत्रिपदोद्भवाश्वशुरमह्यंत्यत्रयेनस्त्रियं
ज्येष्ठांत्यपतिपूर्वजंद्विपचतुर्थेदेवरंहंतिच ॥४८॥ एवंनाद्युवतेरभावइहनोदोषोनुरेतत्फलंमौंज्यूर्ध्वंनवदंतिकेचिदपिपैत्र्याद्येफलंमूलवत् ॥ ॥

त्येज्येष्ठायाः चतुर्थचरणेजातापतिपूर्वजंज्येष्ठंहंति द्विपचतुर्थे द्वौपौपतीयस्यतद्द्विपं विशाखा तस्यचतुर्थचरणेजातादेवरंहंति अर्थादन्यचरणजाशुभा ४८ एवंउ
क्तनक्षत्रचरणजातोनानरः युवतेः स्त्रियः श्वशुरादीन्हंति तथाचगर्गः मूलजाश्वशुरंहंतिसार्पजाचतदंगनां ज्येष्ठजातुपतिज्येष्ठंदेवरंतुद्विदैवजेति तथाचकश्य
पपटले मूलांत्यपादजौश्रेष्ठौतथाश्लेषाद्यपादजौ द्वीशांत्यपादजौदुष्टौतथाश्लेषांत्यपादजाविति अस्यापवादः अभावइहनोदोषइति अभावेतेषांश्वशुरादीनां
मभावेसतिइहमूलादिजोद्वहनेनोदोषः केचिदाचार्याः नुः नरस्यमौंज्यूर्ध्वंमौंजीबंधनानंतरं एतत्फलंनवदंति उक्तंचनारदेन मूलव्यालभवोदोषोविवाहेयउदाहृतः स
मौंजीबंधनादूर्ध्वंपुंसांनैवेतिकेचनेति पैत्र्याद्येपिमघायाआद्यचरणेपिमूलवत्फलंस्यादितिकेचिद्वदंति तथाचोक्तंनारदेन पैत्र्यगंडोद्भवाकन्याश्वशुरंभीचकेचनेति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथऋतुत्रयमध्येकिंकिंनकर्तव्यमित्याह नोद्वाहाविति सहजातयोः एकोदरसमुत्पन्नयोः पुत्रयोः कन्ययोः कन्यापुत्रयोर्वा उद्वाहौविवाहौ ऋतुषु त्रयश्चतेऋतवश्च
ऋतवः तेषुनकार्यौ षण्मासाभ्यंतरेन कार्याविल्यर्थः उक्तंचनारदेन विवाहश्चैकजन्यानांषण्मासाभ्यंतरेयदि असंशयंत्रिभिर्वर्षैस्तत्रैकाविधवाभवेदिति नोद्वाहा
द्व्रतमिति उद्वाहादृतुषुव्रतंमौंजीनकार्या तथाचोक्तंनारदेन पुत्रोद्वाहात्परंपुत्रीविवाहोनऋतुत्रये नतयोर्व्रतमुद्वाहान्मंगलेनान्यमंगलमिति नोपुमुद्वात्स्त्र्युद्वहन
मिति पुमुद्वाहात्पुरुषविवाहात् ऋतुषु स्त्र्युद्वहनंकन्याविवाहः नोकार्यः तथाचकात्यायनः पुत्रोद्वाहात्परंपुत्रीविवाहोनऋतुत्रयइति नमंगलविधेर्मुंडनमिति मंगल
विधेः विवाहात्ऋतुषुमुंडनंचौलंव्रतंवानकार्यम् अत्रकात्यायनः कुलेऋतुत्रयादर्वाक्मंडनान्नतुमुंडनमिति त्रिशःप्येषुनेति एषुऋतुषु त्रिशुभीनकार्या त्रयाणांशु

नोद्वाहौसहजातयोरृतुषुनोद्वाहाद्व्रतंनोपुमुद्वाहात्स्त्र्युद्वहनंनमंगलविधेर्मुंडंत्रिशःप्येषुन ॥ ४९ ॥ नोज्ये
ष्ठाल्लघुकालरुद्धतऋतेकात्यायनोमुंडनंचौलंमाहनमेखलेत्युभयतःकार्याविवाहादियं ॥ ॥

भानांसमाहारस्त्रिशःपी मंगलत्रयमितियाव[illegible]नकुर्यान्मंगलत्रयमितिकात्यायनवचनात् ४९ नोज्येष्ठाल्लघ्विति ज्येष्ठात्मंगलात् विवाहादेरृतुषुलघुमंगलंनोकुर्या
त् यद्बृहिःशालायामुक्तंतत् ज्येष्ठमंगलं अन्यल्लघुमंगलं ज्येष्ठलघुलक्षणंसारसमुच्चये चूडाकेशांतसीमंतविवाहोपनयान्बुधाः गुरुमंगलमित्याहुस्तदन्यल्लघुमंगल
मिति तन्नकार्यमित्यर्थः कस्मादृते कालरुद्धतऋते कालेनरुद्धं कालरुद्धं गर्भाधानपुंसवनादि तस्मादृतेतेनविनेत्यर्थः तथाचकात्यायनः मातृयज्ञक्रियापूर्वंज्येष्ठंकृत्वातु
मंगलं ऋतुत्रयंपुनर्यावन्नकुर्याल्लघुमगलं लघुवागुरुवाकार्यंकार्यंनैमित्तिकंयदिति लघुगुरुमंगलयोर्भिन्नकर्तृत्वेनदोषः कात्यायनोमुनिरितिमाह इतीतिकिं मतं
मुंडनंन चौलमेवमुंडनं मौंजीविवाहात् उभयतःकार्येति तथाचतद्वाक्यं मुंडनंचौलमित्युक्तंव्रतोद्वाहौतुमंगलं चौलंमुंडनमेवोक्तंवर्जयेद्धरणात्परं मौंजीचोभयतःका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यापितोमौंजीनमुंडनमिति॥ अथसंकटेमवृत्तिमाह॥ भेदेब्दस्येति संकटेदेशकालभयादौ अब्दस्यसंवत्सरस्यभेदेपूर्वोदितंमंगलंवितनुयात् विस्तारयेत्कुर्या
दित्यर्थः तथाचोक्तंसंहितासारावल्यां फाल्गुनेचैत्रमासेतुपुत्रोद्वाहोपनायने भेदादब्दस्यकुर्वीतनर्तुत्रयलंघनमिति अथवावेदाहांतरितेचतुर्दिनांतरितेकाले
मंगलंवितनुयात् तथाचस्मृतिसारावल्यां पुत्रीपरिणयादूर्ध्वंयावद्दिनचतुष्टयं पुत्र्यंतरस्यकुर्वीतनोद्वाहमितिसूरयइति अथवादिनव्यवहितेएकदिनांत
रितेकालेमंगलंकुर्वीत तथाचोक्तं एकोदरप्रसूतानामेकस्मिन्वासरेनरः विवाहंनैवकुर्वीतमंडनोपरिमुंडनमिति अथवाएकाहेपिनद्यानगेनपर्वतेनअंतरितेदेशे
मंगलंवितनुयात् ज्योतिर्विवरणे एकोदरयोर्वरयोरेकदिनोद्वाहतोभवेन्नाशः नद्यंतरएकदिनेकेप्याहुःसंकटेचशुभमिति शार्ङ्गधरोपि नद्यंतरेपिशुभदंपृथुशैलस्यरोधत

भेदेब्दस्यचसंकटेवितनुयात्पूर्वोदितंमंगलंवेदाहांतरितेदिनव्यवहितेनद्यानगेनापिवा॥५०॥ एकाहे
पिजनाश्रयांतरइहेदंतारतम्याद्बुधैर्योज्यंनोयमयोर्निषिद्धमनयोरेकत्रकार्यंजगुः॥ ॥छ॥

इति ५० एकाहेपीति अथवाएकाहेपिजनांतराश्रयेमंडपांतरेमंगलंवितनुयात् मंडपोऽस्त्रीजनाश्रयइत्यमरः उक्तंज्योतिर्विवरणे नप्रतिषिद्धंलग्नंसंप्राप्तेसंकटेमहति
एकोदरसंभवयोरेकाहेभिन्नमंडपेकालइति अथैषांपक्षाणांनिर्णयमाह इहेदमिति इहास्मिन्विवाहादिविषयेइदंभेदेब्दस्येत्याद्युक्तं बुधैस्तारतम्याद्योज्यं संकटानुरूपं
योज्यमित्यर्थः अथयमलयोर्विशेषमाह नोयमयोरिति यमयोर्यमलयोः इदंनोनिषिद्धं अनयोर्यमलयोर्मंगलंएकत्रएकवत्सरएकवासरेएकमंडपेकार्यमितिमुनयो
जगुः उक्तंच एकस्मिन्वत्सरेचैकवासरेमंडपेतथा कर्तव्यंमंगलंस्वस्रोर्भ्रात्रोर्यमलजातयोरिति अथमत्स्योद्वाहनिषेधमाह नैकस्मैइति एकस्मैवरायदुहितृद्वयंएको
दरकन्याद्वयंनदद्यात् सहजयोःएकोदरसंभवयोर्भ्रात्रोःएकोदरकन्यकेनदद्यात् तथामिथःपरस्परंउद्वहनंनतनुयात् अत्रापिसंकटेप्रवृत्तिमाह कुर्यादिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अदः नैकस्मैइत्याद्युक्तमकर्तव्यं असंपदिअन्यवधूवरलाभेसतिकुर्यात् तथाचनारदः मत्यकद्वाहोनैवकार्योनैकस्मिन्दुहितृद्वयं नचैकजन्ययोः पुंसोरेकजन्येतुकन्यके इत्यादि
५१ अथप्रतिकूलनिर्णयमाह नोद्वाहमिति निश्चयेपिसतिबुधाः उद्वाहंनजगदुः कस्यांसत्यां पित्रोः असूत्क्रांतौसत्यां माताचपिताचपितरौ तयोः असूनांप्राणानांउत्क्रां
तिः उत्क्रमणंतस्यांसत्यामित्यर्थः कथंभूतयोःपित्रोः सपित्रोः पितरौचपितरौचपितरः मातुःपितरौ पितुःपितरावित्यर्थः तैःसहवर्तमानौसपितरौ तयोःसपित्रोः पुनः कस्यां
सत्यां स्त्रियाःअसूत्क्रांतौसत्यां इदंद्वितीयविवाहादौज्ञेयं एवंसूनोःपुत्रस्य भ्रातुःसहजस्य अनूढितस्वसुः अपरिणीतभगिन्याः पितृव्यस्यपितृभ्रातुः असूत्क्रांतौ
सत्यां एतदुक्तंभवति पित्रादीनामुक्तानांमध्येअन्यतमेमृतेसतिविवाहंनकुर्यादित्यर्थः तथाचवृद्धशौनकः वरवध्वोःपितामातापितृव्यश्चसहोदरः एतेषांप्रतिकूलंचेन्महा

नैकस्मैदुहितृद्वयंसहजयोर्नैकोद्भवेकन्यकेदद्यादुद्वहनंमिथोननतुयात्कुर्यादसंपद्यदः ॥५१॥ नोद्वाहंसतिनिश्चयेऽपिजगदुःपित्रोःसपित्रोः-
स्त्रियाःसूनोर्भ्रातुरनूढितस्वसुरसूत्क्रांतौपितृव्यस्यच ॥ अन्येस्वान्वयजात्ययेपिजनकांबास्त्रीसुतान्यात्ययेऽब्दार्धार्धार्धदलांतरेविदधतेहेरंब
शांत्याक्कचित् ॥५२॥

विघ्नमदं[illegible]वेत् अन्यच्च पितापितामहश्चैवमाताचैवपितामही पितृव्यस्त्रीसुतोभ्रातामाभगिनीचाविवाहिता एभिरेवविपन्नैश्चप्रतिकूलं
बुधैःस्मृतं अन्यैरपिविपन्नैस्तुकेचिदूचुर्नतद्भवेदिति अथान्येषांमतमाह अन्यइति अन्येबुधाःस्वान्वयजात्ययेपिस्वकुलजातमर्त्यनाशेपिउद्वहनंविदधुः तथाचभा
गुः वाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः तदोद्वाहोनैवकार्यःस्वपक्षक्षयदोषतइति अथसंकटेप्रवृत्तिमाह जनकांबास्त्रीति जनकश्चअंबाचस्त्रीचसुतश्चअन्य
श्च अन्यः कुलजः प्रतिकूलाधिकारी एषांअत्ययोनाशः मरणमितियावत् तस्मिन्सति अब्दार्धार्धार्धदलांतरेहेरंबशांत्यागणेशशांत्याक्कचित्संकटेविदधते बुधाइत्य
ध्याहारः एतदुक्तंभवति वरस्यवध्वावापितृनाशेअब्दांतरेवर्षांतरे मातृनाशेअर्धांतरेषण्मासांतरे स्त्रीनाशेअर्धांतरेत्रिमासांतरे एतद्द्वितीयादिविवाहेज्ञेयम् तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुत्रनाशेऽर्धांतरेसार्धमासांतरे अन्यनाशेपितुमातृस्त्र्यान्यादिभ्योन्यस्यकुलस्यनाशेदर्शांतरेमासार्धमासस्यार्धांतरेत्र्यंतरेविंशतिदिनांतरेविद्यमनइत्यर्थः ५२ अन्यच्चै
भ्रातुर्विशेषमाह भ्रातुश्चात्मजवदिति भ्रातुर्नाशेपुत्रवत्पुत्रनाशोक्तवद्द्वयं सार्धमासांतरेकर्तव्यमित्यर्थः तथाचस्मृतिसारावल्यां पितुरब्दमिहाशौचंतदर्धंमातु
रेवच मासत्रयंतुभार्यायास्तदर्धंभ्रातृपुत्रयोः अन्येषांतुसपिंडानामाशौचंमासमंमितं॥ तदातुशांतिकंकृत्वाततोलग्नंविधीयतइति स्मृत्यंतरेप्युक्तं संकटेसम
नुप्रासेयाज्ञवल्क्येनयोगिना शांतिरुक्तागणेशस्यकृत्वातांशुभमाचरेत् अकृत्वाशांतिकंयस्तुनिषेधेसतिदारुणे नकरोतिशुभंगर्वाद्विमस्तस्यपदेपदे इति
ज्योतिःप्रकाशे प्रतिकूलेपिकर्तव्योवि[illegible]होमासमंतरात् शांतिंविहायगांदत्वावाग्दानादिचरेत्पुनरित्येतत्प्रौढायांकन्यायांपित्रोर्मरणेपिज्ञेयं प्रतिकूलेपिमति

भ्रातुश्चात्मजवद्द्वयेतिसमयेपित्रोर्मृतेः संशयेनान्येषांप्रतिकूलमामयिविरक्ताराद्गतानामपि॥ आतुर्यान्मृतनृक्रियानभिभवेनांदीमु-
खंनाचरेन्नोकुर्याज्ज्वरितस्यमंगलमतिव्याध्यद्भवेनिश्चयं॥५३॥

कूलाभावमाह भयइत्यादि भयेदुर्भिक्षराजभयेअतिसमयेअतिकाले पित्रो
र्मातापित्रोः मृतेप्राणस्यसंशयेसति अन्येषां मातापितृभ्यामन्येषांमृतानांप्रतिकूलंनास्ति तथाचोक्तंज्योतिःसागरे दुर्भिक्षेराष्ट्रभंगेचपित्रोर्वाप्राणसंशये प्रौ-
ढायामपिकन्यायांनान्यकूलंप्रतीक्षतइति विशेषांतरमाह आमयिविरक्ताराद्गतानामपिप्रतिकूलंनास्ति आमयीरोगीदीर्घरोगीतियावत् विरक्तोगृहादि
षूदासीनः आराद्गतोदूरगतः देशांतरइतियावत् आराद्दूरसमीपयोरित्यमरः एषामपिमृतानांप्रतिकूलंनास्ति तथाचोक्तंस्मृत्यंतरे दीर्घरोगाभिभूतस्यदूरदेशस्थि
तस्यच उदासवर्तिनश्चैवप्रतिकूलंनविद्यतइति अथान्यानपिशास्त्रार्थानाह आतुर्यादिति तुर्यश्चतुर्थः पुरुषः मूलपुरुषाच्चतुर्थइत्यर्थः तंमर्यादीकृत्य मृतस्यनर-
स्यक्रियायाअनभिभवेअभावेसति कचित्कारणांतरक्रियायामकृतायांनांदीमुखंनाचरेत् एतत्स्वगोत्रविषयम् तथाचमेधातिथिः प्रेतकर्माण्यनिर्वर्त्यचरेन्नाभ्युद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यक्रियां आचतुर्थंततः पुंसिपंचमेतुशुभंभवेदिति नोकुर्यादिति ज्वरितस्यमंगलंनोकुर्यात् तथाचगर्गः ज्वरस्योत्पादनंयस्यशुभंनंस्यनकारयेत् दोषनिर्गमना-
त्पश्चात्स्वस्थोधर्मसमाचरेदिति अनीति अतिव्याध्युद्भवेकस्यचित्कुलजस्यशरीरेअतिदारुणज्वरोत्पत्तौनिश्चयंनोकुर्यात् प्रतिकूलप्रीत्या रोगःपाप्माज्वरोव्या
धिर्विकारोदुःखमामगदइत्यादिवाग्भट्टे ज्वरपर्यायनामानि तथाचगर्गः केचिदूनुर्गृहस्थस्यकस्यचिद्दारुणोज्वरः तावन्मंगलकार्यंचनकार्यंमिश्चितंबुधैरिति ५३ अथमहत्संकटेम
तिवृद्धिसूतकेकर्माहेनामाह चेत्स्यादिति उक्तपूर्वसमयेयज्ञोद्वाहनचौलमौंजिकमित्यत्रोक्ते पूर्वकालेअनारब्धकार्येसति कर्मणिअनारब्धेसतिसंकटेचमाप्तेसति कूष्मांडीघृतहोमतः
कूष्मांडिभिर्यद्देवादेवहेडनमित्यादितिसृभिर्ऋग्भिर्घृतहोमः कूष्मांडीघृतहोमः तेनजननाशौचेदशाहांतः जन्मदशाहमध्येकर्मआचरेत् कूष्मांडीघृतहोमंशास्त्रोक्तंसदक्षिणंकृत्वा

चेत्स्यात्सूतकमुक्तपूर्वसमयेनारब्धकार्येबुधः कूष्मांडीघृतहोमतोऽपिजननाशौचेकृतिंकारयेत्॥ सिंहेज्येनशुभंहितंहरिलवोर्ध्वेगौतमीदक्षिणे
जान्हव्युत्तरतः क्वचिद्धितमजेर्केतोस्त्रभीत्यादिषु॥५४॥ कर्मकर्तव्यमित्यर्थः तदुक्तंस्मृत्यंतरे संकटेसमनुप्राप्तेसूतकेसमुपागते कूष्मांडिभिर्घृतंहुत्वागांद-
त्वाचपयस्विनीं चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेदिति स्मृत्यंतरे अनारब्धविशुद्ध्यर्थंकूष्मांडैर्जुहुयाद्घृतं गांदद्यात्पंचगव्याशीततः शुद्ध्यतिसूतकीति अथसिंहेगु
रौसतिमंगलनिषेधमाह सिंहेज्येइति सिंहेसिंहराशौईज्यः सिंहेज्यः तस्मिन्सतिशुभंनित्यव्यतिरिक्तंनहितंस्यात् इदंतुपूर्वमेवप्रपंचितं तथाचकालनिर्णये शांतिकंपौ
ष्टिकंयात्राप्रतिष्ठोद्वाहपूर्वकं नकुर्यात्सर्वमांगल्यंसिंहस्थेचबृहस्पतौ तथाचमांडव्यः इष्टापूर्तेचचौलादिसंस्कारान्वास्तुकर्मच अन्यानिशुभकर्माणिनकुर्यात्सिं
हगेगुराविति अथसंकटेप्रवृत्तिमाह हरिलवोर्ध्वमिति क्वचित्संकटेदेशकालभयादौसिंहेज्येपिहरिलवादूर्ध्वंसिंहांशादूर्ध्वंगौतम्याः दक्षिणतः जान्हव्याउत्तरतः शुभंकर्म
हितंस्यात् तथाचज्योतिर्निबंधे सिंहेगुरौसिंहनवांशकोर्ध्वंगोदावरीदक्षिणकूलजातैः उद्वाहकालात्ययदोषभीतैः कार्योविवाहस्त्वयवनोब्रवीतीति तथाचगर्गः भागीरथ्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तरेतीरेगोदावर्याश्चदक्षिणे व्रतोद्वाहादिकर्माणिसिंहसंस्थेनदुष्यतीति अर्थाद्गोदावर्याः उत्तरेभागीरथ्याः दक्षिणे एवंद्वयोर्गोदाजान्हव्योर्मध्येसंकटेपिशुभंनाचरेदितिसि
द्धं तथाचवसिष्ठः गोदावर्युत्तरेतीरेभागीरथ्याश्चदक्षिणे विवाहादिनकुर्वीतसिंहसंस्थेचवाक्पताविति अत्राप्यतिसंकटेप्रवृत्तिमाह अजेति अत्रभीत्यादिषुरजोभया
दिषुसत्सु अंतःगोदाजान्हव्योर्मध्येहरिलवादूर्ध्वेसिंहेज्येसति अजेमेषेइनेसूर्येसतिशुभमाचरेत् अजेइनेइत्येतद्विवाहविषयं अत्रभीत्यादिष्वित्यनेनपदेनलक्ष्यते तथाचशौ
नकः मेषस्थेदिवसकरेसिंहस्थेवज्रपाणिसचिवेच यस्याः परिणयनमसौसाध्वीसुखसंपदोपेतेति व्रतबंधस्तुमीनगेसूर्येसतिचैत्रेकर्तव्यइतिग्रंथकृताप्रागेवोक्तं अनिमिष
रविमध्येकार्यमिति तथाचमौंजीपटले [illegible]भादष्टगेसिंहेनीचेवाशत्रुगेगुरौ मौंजीबंधःशुभःप्रोक्तश्चैत्रेमीनगतेरवौ अथवाइनेईज्येतत्पदंसर्वशुभसाधारणविषयं
तथाचशौनकः सिंहस्थेदेवगुरौमेषस्थोपदिभविसहस्रांशुः मंगलकार्यंकुर्यादितिनारदपराशरौवदतइति अत्रभीत्यादिष्वित्यत्रादिशब्देनवृद्धपितृमरणशंकायांकर्त्रंतरा

देशग्रामगृहज्वरव्यवहृतिद्यूतेषुदानेमनौसेवाकाकिणिवर्गसंगरपुनर्भूमेलकेनामभम्॥

भावाद्यतिसंकटेज्ञेयम् ५४ अथनामराशिजन्मराश्योर्निर्णयमाह देशइति देशःप्रसिद्धः ग्रामः प्र॰ गृहंप्रसिद्धं ज्वरः प्र॰ इत्यादिषुनामभंनामराशिः प्रधानंस्या
त् एतदुक्तंभवति देशग्रामगृहेषुप्रवेशाद्यर्थंज्वरेचंद्राद्यवलोकनार्थंव्यवहृतिर्व्यवहारः द्यूतंप्रसिद्धं दानंतुलापुरुषादि एषुचंद्रबलाद्यर्थं मनौमंत्रेमेलनार्थंचंद्रबला
द्यर्थंच सेवाराजादिसेवातत्रमेलाद्यर्थं काकिण्यांकाकिण्यवलोकनार्थं वर्गशुद्ध्यर्थं संगरेसंग्रामेचंद्रबलाद्यर्थं पुनर्भूमेलकेपुनर्भूमेलनायनामराशिरवलोकनीयेत्यर्थः
परतः एभ्योऽन्यत्रविवाहयात्रादौजन्मर्क्षंजन्मराशिःप्रधानंस्यात् तथाचज्योतिर्निबंधे देशेग्रामेगृहेयुद्धेसेवायांव्यवहारके नामराशेःप्रधानत्वंजन्मराशिंनचिंत-
येदिति अन्यच्च काकिण्यांवर्गशुद्धौचदानेद्यूतेज्वरोदये मंत्रेपुनर्भूवरणेनामराशेःप्रधानतेति विवाहेसर्वमांगल्येयात्रादौग्रहगोचरे जन्मराशेःप्रधानत्वंनामराशिंनचिंतयेदिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथवधूवरयोर्मध्येएकस्यजन्मर्क्षंज्ञातंएकस्यनज्ञातंनंदाशुद्धिमेलादिकंकथमवलोकनीयमित्याह वधूपुरुषयोरिति वधूपुरुषयोर्मध्येचेद्यदिएकस्यजन्मर्क्षंज्ञातंएकस्य
नज्ञातंनदा इतः ज्ञातजन्मर्क्षादेकस्यशुद्धिंगुर्वादिशुद्धिंविलोक्य तयोर्वधूवरयोर्नामर्क्षयोर्मेलकोवर्णवश्यादिकः पूर्वोक्तोविलोक्यः अर्थाद्द्वयोरप्यज्ञानेनामर्क्षादेव
सर्वंविलोक्यं तथाचशार्ङ्गधरः विवाहघटनंचैवलग्नजंग्रहजंबलं नामभाच्चिंतयेत्सर्वंजन्मनज्ञायतेयदेति जन्मज्ञानेपिचैकस्यद्वयोर्नाम्नोप्यमेलकः चिंत्यस्तत्रैवजन्म
र्क्षाद्वीर्यंलग्नेंदुजंबलमिति ५५ अथमेलकार्थंनाम्नोनक्षत्रज्ञानमाह भंनामादीति नामादिमवर्णोनामाद्याक्षरंतस्मात् अवकहडशतपदंचक्रंयस्मात् चक्रात् चूचे
चोलापदेष्वाद्येइत्यादयः श्लोकानिबद्धास्तस्माच्चक्राद्भंनक्षत्रंज्ञेयं तद्यथा चूडामणीतिनाम्नः आद्यक्षरात्चकारात् चूचेचोलाइत्यादिनाअश्विनीनक्षत्रंतत्रप्र-

जन्मर्क्षंपरतोवधूपुरुषयोर्जन्मर्क्षमेकस्यचेद्ज्ञातंशुद्धिमितोविलोक्यतुतयोर्नामर्क्षयोर्मेलकः॥
५५॥ भंनामादिमवर्णतोवकहडाद्युज्यादिवर्णाद्बवौतुल्यावप्रशसौरवषौयदभिधाबद्धोस्यनामांतिमं

थमचरणइतिवज्ज्ञेयमित्यर्थः तथा[illegible]दीपिकायाम् जन्मनज्ञायतेयेषांतेषांनामगवेष्यते चक्रेऽवकहडेभांशौतन्नाडीकैश्चिदग्निभादिति तन्नाडीत्यस्यार्थः यदा
नाम्नोनक्षत्रंगवेष्यतेतदाअग्निभात्कृत्तिकानक्षत्रात् नाडीविलोक्येतिकैश्चिदुक्तं कैश्चिदितितन्मतमग्राह्यं तस्मादश्विन्यादित्रिकंव्यस्तमितिन्यायेननाड्यवलोक
नंबहुसंमतमितिभावः अथनामादौसंयोगाक्षरेसतिकिंकर्तव्यमित्यपेक्षायामाह युज्यादिवर्णादिति युजियुक्तेऽक्षरेसंयुक्ताक्षरेप्रद्युम्नेत्यादिकेनामादौयुक्ताक्ष
रेसति आदिवर्णात् प्रथमवर्णाद्भंज्ञेयम् यथाप्रद्युम्नेनाम्नि प्रथमवर्णःप्रस्तत्राद्यःपकारस्तस्माद्भंज्ञेयमित्यर्थः प्रियवचेत्यादौपिकारएव द्रुपदेत्यादौदुकारए
वग्राह्यइत्यादि स्वरशास्त्रे संयोगाक्षरजेनाम्निज्ञेयंतत्रादिमाक्षरमिति अथअवकहडचक्रेनामाद्यक्षराभावेसतिकिंकर्तव्यमित्यपेक्षायामाह बवौतुल्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वत्रशसौरवषाविति अत्रावकहडचक्रे ववौइति इमौवर्णौतुल्यौ तयाचरवषौ शिवइतिनाम्निसति अवकहडेचक्रे शकारस्याभावात् शकारस्यानेसका-
रांगीकारात् भंज्ञेयमितिभावः एवमेवशसौतथारवषौ परस्परसवर्णौज्ञात्वा भंज्ञेयं तयाचस्वरशास्त्रे रवषौशसौबवौचैवज्ञेयाविति परस्परमिति अन्यच्च नमो
ङाङञणावर्णानामादौसंतितेनहि चेद्भवंतितथाज्ञेयागजडास्तेयथाक्रममिति चक्रंशतपदंवस्येक्रक्षांशाक्षरसंभवमितिस्वरशास्त्रोक्तमवकहडचक्रंप्रसिद्धं अथयस्य
बहूनिनामानिसंतितस्यकस्मान्नाम्नोभंज्ञेयमित्याकांक्षया आह यदभिधा बह्वोस्यनामांतिममिति यस्यअभिधानामानिबह्वो भवंतितस्यांतिमंपश्चाद्भवंनामग्रा
ह्यं तयाचस्वरशास्त्रे बहूनियस्यन[illegible]ानिनरस्यस्युः कथंचन तस्यपश्चाद्भवंनामग्राह्यंस्वरविशारदैरिति अथजन्मनक्षत्रंयेषुयेषुशस्तंतान्याह आर्याइति नु

आर्यान्नुद्वहनेजनुर्भममलंपट्टस्यबंधेजगुर्गेहग्रामनृपाभिषेककृषिमौंज्यन्नाशनेभूषणे॥५८॥इं॰ वि॰

द्वहनेपुरुषविवाहेजनुर्भंजन्मनक्षत्रंअमलंनिर्दूषणंजगुः तयापट्टस्यबंधेपदबंधने गेहंगृहकरणप्रवेशनं तयाग्रामोग्रामवरप्रवेशनं नृपाभिषेकोराजाभिषेकः कृषिःप्र
सिद्धा मौंजीप्रसिद्धा अन्नाशनंनवान्नप्राशनं भूषणंभूषणधारणं एषांसमाहारस्तस्मिन् जन्मभंशुभदंजगुः तयाचज्योतिःप्रकाशे जन्मभंकृषिनृपाभिषेचनेभूष
णेनगरगेहकर्मणि आधिपत्यप्रभुविमौंजिबंधनेपुंविवाहउदितंशुभंबुधैरिति राजमार्तंडे वसंतसमयेदद्यादब्देगर्भाष्टमेऽष्टमे मेखलांजन्ममासेपिजन्मभेचतिथावपी
ति नारदः पट्टबंधनचौलान्नप्राशनेचोपनायने शुभदंजन्मनक्षत्रमशुभंत्वन्यकर्मणीति इतिस्वकृतमुहूर्तमार्तंडटीकायांमार्तंडवल्लभायांविवाहप्रकरणंसमाप्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाग्न्याधानं वृत्तेनैकेनाह अग्न्याधानमिति अग्नेराधानं बहुभिर्बुधैर्दारकाले अवादि कथितं चतुर्थीकर्मानंतरं दारकालः परैराचार्यैर्दायाद्यकाले धनविभागकाले अवा
दि तथाच वृत्तशते अग्न्याधानं दारकाले विधेयं केश्चित्प्रोक्तं तच्च दायाद्यकाले इति तथाच कात्यायनगृह्ये आवसथ्याधानं दारकाले दायाद्यकाले एकेषामिति एतद्भाष्य
कारैरेवं व्यवस्थापितं अभ्रातृमतो दारकाले भ्रातृमतो दायाद्यकाले प्रोक्तमिति स्मृतिषु कृतदारस्याग्निना विना बहुधा दोषो दृश्यते तथाहि कृतदारो नैव तिष्ठेत्क्षणमप्यग्निना
विना तिष्ठन्सचेद्द्विजो व्रात्यस्तथा च पतितो भवेत् पितृपाकोपजीवी स्याद्भ्रातृपाकोपजीवकः ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना विना ॥ योनाग्निमुपसेवेत दारान्कामाद
तावपि पारदारी स विज्ञेयः स्वस्त्रीस्वीकरणादपि यथा स्नानं यथा संध्या वेदस्याध्ययनं यथा तथैवोपासनं दृष्टं न स्थितिस्तद्वियोगत इत्यादि तस्मात्सूत्रकारैः कात्यायनादि

अथाग्न्याधानं ॥ अग्न्याधानमवादि दारसमये दायाद्यकाले परैर्द्वीशाग्निध्रुवशाक्रपूषभमृगेज्यैर्व्यब्जलग्नांशयोः ॥ जीवेंद्वर्ककुजैः सुत
५ र्द्धि ३।६।११।१० गुरु ९ केंद्र १।४।७।१० स्थैरनस्तंगतैः स्वोच्चेष्टर्क्षगतैः परैरुपचयैर्वित्ताद्यशुद्धौ बुधैः ॥ १ ॥ ॥ इत्यग्न्याधानप्रकरणम् ॥

भिः दारकाल एव बाहुल्येनोक्तं अग्न्याधाननक्षत्राण्याह कैः द्वीशाग्निध्रुवशाक्रपुष्यमृगपौष्णैः द्वीशा विशाखा अग्निः कृत्तिका ध्रुवाणि त्र्युत्तरा रोहिण्यः शाक्रं ज्येष्ठा पुष्य
मृगौ प्रसिद्धौ पौष्णं रेवती तैः कयोः व्यब्जलग्नांशयोः विगताः अब्जाः याभ्यां तौ व्यब्जौ तौ च तौ लग्नांशौ च तयोः अब्जा जलचरराशयः मकरस्य पश्चिमार्धं कुंभो मी
नः कर्कटश्चैते जलचरराशयः चंद्रोऽपि जलजः एतैरहितयोर्लग्नयोर्लग्ननवांशयोरित्यर्थः तथाच वृत्तशते कर्किनक्रघटमीनविलग्ने चांशके तनुगतेऽथ तदीये लग्नगे कुसु
दिनीदयिते वा नाशमेति जनितोऽपि हुताशः इति कैः जीवेंद्वर्ककुजैः सुतर्धिकेंद्रगुरुस्थैः जीवो गुरुः इंदुश्चंद्रः अर्कः सूर्यः कुजो भौमः तैः सुतः पंचमं ऋद्धय उपचय भव
नानि गुरुर्नवमं केंद्राणि प्रथमचतुर्थसप्तमदशमानि ५।३।६।११।१०।९।१।४।७।१० एतत्स्थानगतैः कथंभूतैरनस्तंगतैः सूर्यकिरणैरलुप्तैः पुनः कथंभूतैः स्वोच्चेष्टर्क्षग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तैः सम्भवउच्चानिचइष्टाश्च एषांभक्षाणिराशयस्तद्गतैः स्वराश्युच्चराशिमित्रराशिगतैरित्यर्थः परैरुक्तैर्योः न्यैर्ग्रहैः उपचयैः त्रिषडेकादशादशामगैः कन्यांसत्यां वित्ताद्यशु
द्धेसत्यां वित्तंद्वितीयं आद्यंलग्नं तयोःशुद्धिः क्रूरराहित्यंतस्यांसत्यां शेषंपूर्ववत् प्रायश्चंद्रमित्यंक्तमवलोक्यं तथाचरत्नशते केंद्रस्थोपचयत्रिकोणभगताःसूर्या
रजीवेंदवः शेषाश्चोपचयास्थितायदितदाऽग्न्याधानमुक्तंशुभं चंद्रेनैधनगेग्निप्रयेतसुवती भौमेपुमानष्टमेशेषैर्मृत्युगतैरुजान्वसहितोऽग्न्याधानकर्ताभवेत् नोकुर्या
द्धुतभुक्परिग्रहमिहक्ष्मापुत्रजीवेंदुभिर्नीचस्थैर्विजितैरिपोर्भवनगैरस्तंगतैर्वाद्विजइति तथाचसंहितासारे अग्न्याधानंनकुर्वीतकर्किनक्रत्रयेविधौ लग्नेधन
गेपापेतथारिभग्रहान्वितइति १ इतिमुहूर्तमार्तंडटीकायांमार्तंडवल्लभायांअग्न्याधानप्रकरणंसमाप्तं अथगृहप्रकरणंविवक्षुस्तावद्ग्रामविचारमाह

अथगृहप्रकरणं ॥ नामर्क्षाद्विसुतांकदिग्भव २।५।९।१०गतोग्रामः शुभोन्योन्यथातत्कोणेंत्यभुवांशुभंनिवसतांदोषाः परेषाम
लम् ॥ कन्यार्कालिधनुस्तुलाक्रियघटाः कौर्प्यंडजोयाम्यतोमध्येः न्येन्यवसंत्यथेंद्रककुभोवर्गाःस्वराजस्त्विनः ॥१॥ नामर्क्षादिति नामर्क्षा
न्नामराशेः सकाशात् द्वि२सुतां५क९दिक्१०भव११गतोग्रामःशुभःस्यात् अन्यउक्तविपरीतोग्रामः अन्यथास्यादशुभः स्यादित्यर्थः तदुक्तंज्योतिः
सागरे एकभेसप्तमेग्रामेवैरंहानिस्त्रिषष्ठगे तुर्याष्टद्वादशेरोगःशेषस्थानेसुखंभवेदिति एवंग्रामशुभाशुभमभिधायेदानींग्रामदिङ्नियममाह तत्कोणइति तत्को
णेतस्यग्रामस्यकोणे अंत्यभुवांरजकचर्मकारादीनांनिवसतांवसतिंकुर्वतांशुभंस्यात् रजकश्चर्मकश्चैवनटोबुरुडएवच कैवर्तमेदभिल्लाश्चसप्तैतेअंत्यजाःस्मृता
इत्यादीनांग्रामकोणेशुभंस्यादित्यर्थः तत्कोणेनिवसतांपरेषांवर्णानांअलंअत्यर्थंदोषाःस्युः अशुभानिस्युरित्यर्थः तथाचज्योतिर्निबंधे भवनपुरग्रामा
णांयेकोणास्तेषुनिवसतांदोषः श्वपचादयोंत्यजाद्यास्तेष्वेवविवृद्धिमायांति एवंजातीनांशुभाशुभमादिग्विभागमत्रराशिपरत्वेनदिक्षुवसतिमाह कन्येति य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माशादितः दक्षिणस्याः सकाशात् क्रमेणाष्टस्नदिक्षु कन्याककिंधनुस्तुलादयोराशयो वसंति अन्येउवैरिताबध्ये वसंति एतदुक्तंभवति अभीष्टग्रामंनवभागंपरिकल्प्य मध्य
भागाद्दक्षिणभागेकन्या वसति कन्याराशिनादक्षिणभागेगृहंनकार्यमित्यर्थः तथैवनैर्ऋत्येकर्कटः पश्चिमेधनुः वायव्येतुला उत्तरेअजोमेषः ईशान्यांघटः कुंभः पूर्वेकी
र्पीवृश्चिकः आग्नेयेअंत्योमीनः वसति अन्येवृषमिथुनसिंहमकरामध्यभागे वसंति एवंराशिपरत्वेनदिङ्नियममुक्त्वा इदानींवर्गपरत्वेनदिङ्नियममाह अयेति इं
द्रककुभः सकाशात् अष्टस्नदिक्षु अभ्रसुखाः अष्टौवर्गाः अकचटतपयशाः इत्येतेप्रसिद्धाः ओजस्विनोबलवंतः स्युरित्युत्तरश्लोकेनान्वयः १ अष्टाविति एतदुक्तंभवति
अआइईउऊइत्यादिकः षोडशाक्षरोवर्गः पूर्वस्यांबली कादिकः पंचाक्षरआग्नेयां चादिकोदक्षिणस्यां टादिकोनैर्ऋत्यां तादिकः पश्चिमस्यां पादिकोवायव्यां यादिक
उत्तरस्यां शादिकईशान्यांबली अयमर्थः स्वनामादिमाक्षरात्स्ववर्गंज्ञात्वास्वस्थानेगृहंकार्यमितिभावः यतः स्वस्वस्थानेप्राणिनोबलवंतइतिलोकेप्रसिद्धं किंलक्षणाव

अष्टावभ्रसुखाःस्वपंचमपराद्विड्वर्गःस्ववर्गोन्ययुक्तष्टः काकिणिकागजैर्मियइमायस्याधिकाःसोःर्थदः॥

र्गाः स्वपंचमपराः स्वेभ्यः पंचपराः वैरिणोयेषांतेतथा यथा अवर्गस्यपंचमस्तवर्गः सौम्यवैरी कवर्गस्यपंचमः पवर्गः सौम्यवैरी एवंसर्वेषांवर्गाणांवैरिणोज्ञातव्याः वैरत्वंहिस्वा
मिवशेन तदुक्तंभूपालवल्लभे वर्गेशास्तार्क्ष्यमार्जारसिंहश्वसर्पमूषकाः इभेणौपूर्वतस्तेषांस्ववर्गात्पंचमोरिपुरिति तस्मात्स्ववैरिवर्गस्यदिशिगृहंनकार्यमितिभावः अर्थाद
न्यत्रमध्यमंतत्रापिस्वदिग्वर्गासन्नंशुभं वैरिदिगासन्नमशुभमितिबुद्ध्याज्ञेयम् एवंस्ववर्गग्रामवर्गयोर्मिथारित्वमवलोक्यवासः कर्तव्यइतिसिद्धम् तत्रराशियदितवर्गयदि
तयोर्मध्येराशिर्यदितंबलवत् तदुक्तंज्योतिःसागरे केप्याहुरयवर्गाणांस्वस्थानेराशिदंगृहमिति अथवर्गयदितेकाकिणिकाआह द्विड्ति स्ववर्गोग्रामवर्गः वसतिक
र्तुर्वर्गश्चद्विड्भिः द्विगुणितःकार्यः मिथअन्ययुक् अन्यवर्गयुक्कार्यः गजैरष्टभिस्तष्टः शेषितः सन्काकिणिकाःस्युः इमाः काकिणिकाः यस्यअधिकाः सोःर्थदोधनदातास्याव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदुक्तं गर्गेण स्ववर्गं द्विगुणीकृत्य परवर्गेण योजयेत् अष्टाभिः शेषमुद्दिश्य काकिण्यो ह्यधिकाः शुभमिति एवं ग्रामादिद्विकमनुक्त्वा इदानीं निर्माणे पत्तनग्रामक्षेत्रादीनां समन्ततः क्षेत्रमादौ परीक्षेत गंधवर्णरसप्लवैरित्युक्तत्वात् तावद्वर्णपरत्वेन भूमेर्वर्णरसगंधान् वृत्तार्धेनाह श्वेतेति श्वेतारक्तकपीतकृष्णा वसुधाः विप्रतः ब्राह्मणात्स काशात् वर्णानां शुभाः शोभनाः स्युः श्वेतवसुधा पृथ्वी ब्राह्मणस्य आरक्तवसुधा क्षत्रियस्य पीतवसुधा वैश्यस्य कृष्णवसुधा शूद्रस्य शोभनेति अथात् मिश्रजा तीनां मिश्रा शोभना तथा च वसिष्ठः श्वेता शस्ता द्विजेंद्राणां रक्ता भूमिर्महीभुजां विशां पीता च शूद्राणां कृष्णाऽन्येषां च मिश्रितेति एवं वर्णमुक्त्वेदानीं रसमाह स्वादु रिति स्वादुर्मधुरा वसुधा ब्राह्मणस्य शोभना कटुर्मरीचरसा क्षत्रियस्य तिक्ता निंबरसा वैश्यस्य कषाया हरीतकीरसा शूद्रस्य शोभनेति अथान्मिश्राणां मि

श्वेतारक्तकपीतकृष्णा वसुधाः स्वादुः कटुस्तिक्तकाः काषाया घृतशोणितान्नमदिरागंधाः शुभा विप्रतः ॥ २ ॥ सौम्यादिप्लवभूतले विरचये द्विप्रादिको रम्योऽखिलेनान्येषां नियमोऽत्र यत्र निखिलाः कुर्युर्गृहं हृत्स्थिरं ॥

श्रा शोभना तथा च नारदः मधुरं कटुकं तिक्तं कषायश्च रसाः क्रमात् ए वं रसानुक्त्वा गंधानाह घृतेति घृतगंधा ब्राह्मणस्य शोणितगंधा रक्तगंधा क्षत्रियस्य अन्नगंधा वैश्यस्य मदिरागंधा मद्यगंधा शूद्रस्य मिश्राणां मिश्रग धा शुभेत्यर्थः तथा चोक्तं कारिकायां घृतासृगन्नमदिरागंधा च क्रमशो भवेदिति नानाग्रंथेषु रसगंधानां नानात्वं तद्विकल्पतो ग्राह्यं तथा च नारदः मधुपेरान्नपिशि तगंधवर्णानुपूर्वकम् मधुरं कटुकं तिक्तं कषायश्च रसाः क्रमात् पेरगंधा कषायगंधा अन्यत्सुगमं तथा च कारिकायां घृतासृगन्नमद्यानां गंधा च क्रमशो भवेत् मधुरास्याल्कषा याम्लकटुका चानुपूर्वशः इति २ एवं पृथ्वीवर्णादिकमभिधाय इदानीं वर्णपरत्वेन भूप्लवत्वमाह सौम्यादिषु उत्तरादिषु दिक्षु प्लवो निम्नत्वं यस्य तस्य तच्च तद्भूतलं च तस्मिन्वि प्रादिको ब्राह्मणादिकः गृहं विरचयेत् कुर्यात् एतदुक्तं भवति ब्राह्मणः उत्तरप्लवभूतले क्षत्रियः पूर्वप्लु॰ वैश्यो दक्षिणप्लवे शूद्रः पश्चिमप्लवे गृहं विरचयेत् एवं वर्णपरत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नम्नूप्लवमुक्त्वा ब्राह्मणस्यविशेषमाह अग्न्योः खिलइति अग्न्योब्राह्मणः अखिलेसर्वप्लवेगृहंविरचयेत् तथाचभृगुः उदकादिप्लवमिष्टंविप्रादीनांप्रदक्षिणेनैव विप्रः स
र्वत्रव सेद्दूर्णमथेष्टमन्येषामिति अथपक्षांतरमाह यत्रेतिनिखिलाः सर्ववर्णाः तत्रगृहंकुर्युः तत्रकुत्र यत्रभुविहृतअंतः करणंस्थिरंस्यात् अयमर्थः यस्यांभूमौ अं
तः करणप्राशस्त्यंस्यात् तत्रैवगृहंकर्तव्यमित्यर्थः तथाचवास्तुशास्त्रे मनसश्चक्षुषोयत्रसंतोषोजायतेभुवि तस्यांकार्यंगृहंसर्वैरितिगर्गादिसंमतमिति अथ
शल्यज्ञानप्रकारेणाह सद्यप्रश्नेति सद्यप्रश्नकृतः अत्रगृहंकर्तव्यमित्यादि गृहप्रश्नकर्तुर्मुखाच्चेद्यदिप्रथमतः वर्गादिवर्णोद्गमः स्यात् वर्गाणांप्रथमाक्षरोदयः
स्यात् अकचटतपयशानामन्यतमाक्षरोद्गमः स्यात्तदाशल्यं तद्दिग्गतंतस्यवर्गस्यदिग्गतंसुधीः आदिशेत् शल्यमत्रास्तीतिकथयेदित्यर्थः एतदुक्तंभवति गृह
संमितांभूमिंदक्षिणोत्तररेखाभिः समतयानवधाकृत्वावर्गाद्यक्षरैः अकचटतपयशैरष्टभिः क्रमेणाष्टासु पूर्वादिदिक्षुशल्यमादिशेत् अकारेप्रश्नाद्यक्षरेसतिपू

सद्यप्रश्नकृतोमुखात्प्रथमतोवर्गादिवर्णोद्गमश्चेत्तद्दिग्गतमादिशेत्तुहपयैः शल्यंसुधीर्मध्यतः ॥३॥

र्वस्यांदिशिशल्यमादिशेत् ककारेआग्नेय्यां चकारेदक्षिणस्यां इत्याद्यष्टसुदिक्षु अष्टभिरक्षरैरादिशेदित्यर्थः तुपुनः हपयैस्त्रिभिरक्षरैर्मध्यतोमध्यकोष्ठेशल्य
मादिशेत् हपयानांत्रयाणामक्षराणां अन्यतमेप्रश्नाद्यक्षरेसतिमध्येशल्यमादिशेदित्यर्थः तथाचोक्तंज्योतिर्निबंधे स्मृत्वेष्टदेवतांप्रष्टुर्वचनस्याद्यमक्षरं गृहीत्वातुत
तः शल्याशल्यंसम्यग्विचार्यते अकचटतपयशाहपयावर्णाः पूर्वादिमध्यांताः शल्यकराः इहनान्ये शल्यगृहेनिवसतांनाशइति एतदेवस्पष्टंतत्रैवोक्तं पृच्छायांयदिअः
प्राच्यांनरशल्यंतदाभवेत् सार्धहस्तप्रमाणेनतच्चमानुषमृत्युकृत् आग्नेय्यांदिशिकः प्रश्नेखरशल्यंकरद्वये राजदंडोभवेत्तत्रभयंनैवनिवर्तते याम्यायांदिशिचः प्र
श्नेकुर्यादाकटिसंस्थितं नरशल्यंगृहेशस्यमरणंचिररोगतः नैर्ऋत्यांदिशिटः प्रश्नेसार्धहस्तादधस्थले शुनोस्थिजायतेतत्रबालानांजनयेन्मृतिं तः प्रश्नेपश्चिमायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुदिशोः शल्यंप्रजायते सार्धहस्तेगृहस्वामीननिष्ठतिसदागृहे वायव्यांदिशिपः प्रभेतुषांगाराश्मतुःकरे कुर्वंतिमित्रनाशंचदुःस्वप्नदर्शनंतदा उदीच्यांदिशियः प्रश्नेवि
प्रशल्यंकटेरदः तच्छीघ्रंनिर्धनत्वायकुबेरसदृशस्यहि ईशान्यांदिशिशः प्रश्नेगोशल्यंसार्धहस्ततः तच्चोधनस्यनाशायजायतेगृहमेधिनः हृपयामध्यमेकोष्ठेवक्षोमात्रे
भवेदधः नृकपालमयीभस्मलोहंतत्कुलनाशकृदिति ९ ३ एवंशल्यमभिधायेदानींस्थलस्यशुभाशुभज्ञानस्योपायमाह श्वभ्रमिति श्वभ्रंगर्तंहस्तमितंखनेत्
इहास्मिन्श्वभ्रे निशास्येरात्रिमुखेअर्धसूर्यास्तेजलंपूर्णंन्यसेत् तच्चेद्यदिप्रातःसजलंस्यात् तदातत्स्थलंसत्शुभंस्यात् वृद्धिकरंस्यात् यदिअजलंगतजलंस्यात्
तदामध्यमं यदास्फाटितंस्फुटितंस्यात्तदाअसत् नानाविधहानिकरंस्यादित्यर्थः तथाचनारदः तथानिशादौतत्कृत्वापानीयेनप्रपूरयेत् प्रातर्दृष्टेजलेवृद्धिंसमंपंके

श्वभ्रंहस्तमितंखनेदिहजलंपूर्णंनिशास्येन्यसेत्प्रातर्दृष्टजलंस्थलंसदजलंमध्यंत्वसत्स्फाटितम् ॥ ज्ञा
त्वैवंनिरखनेद्गृहाधिकभुवंनत्वाजलांतंस्तरोयावद्वापुरुषस्ततःकपिशिरस्तुल्याश्मभिः पूरयेत् ॥ ४ ॥

व्रणेक्षयइति एवंशुभाशुभस्थललक्षणमभिधायेदानींभूमिशोधनमाह ज्ञात्वेति एवमुक्तप्रकारैः स्थानंज्ञात्वा गृहाधिकभुवंजलांतंयया भवतितथाखनेत् गृहाद
धिकागृहाधिकासाचासौभूश्चतयानांकल्पितगृहात्किंचिदधिकांभूमिंजलपर्यंतंखनेदित्यर्थः अधिकखननंतुशुद्धभूभागेभित्तिरचनार्थं वाइत्यथवास्तरोयावत्तावत्खनेत्
पृथ्वीगर्भेमृद्भेदानांस्तराःसंति तत्रान्यस्तरपर्यंतंखनेदित्यर्थः अथवायावत्पुरुषस्तन्मितंवापुरुषमात्रंखनेत् इदंशक्त्यपेक्षयाज्ञातव्यं पुरुषप्रमाणंपंचारत्नयः तथाच
शल्वे पंचारत्निर्दशवितस्तिर्विंशतिशतांगुलः पुरुषइति पंचारत्न्यादयः पुरुषपर्यायाः किंकृत्वा नत्वानमस्कृत्यखनेदित्यर्थः ततस्तदनंतरंतत्खातंकपिशिरस्तु
ल्याश्मभिः वानरशिरःप्रमाणैःग्रावभिः पूरयेत्पूर्णंकुर्यात् तथाचमांडव्यः जलांतंप्रस्तरांतंवापुरुषांतमथापिवा क्षेत्रंसंशोध्यचोद्धृत्यशल्यंसदनमारभेदिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथाचमत्स्यपुराणे कपिशीर्षप्रमाणैश्चग्रावाणैः पूरयेत्तद्दृढं खातंतत्प्रसमंकृत्वाततः प्राचीप्रसाधयेदिति खन्यमानेक्षत्रेयदाप्यतेतस्यफलंकारिकायामुक्तं खन्यमानेय दाक्षेत्रेपाषाणः प्राप्यतेयदा धनायुर्वृद्धिरतुलातस्यस्यादिष्टकासुधनागमः कपालांगारकेशाद्यैर्व्याधिनापीडितोभवेदिति ४ एवंस्थलशुद्धिमभिधायाधुनादिक्साधनमाह प्राक्साध्येति उज्जयिनीस्थलात्यम्यदिशिदक्षिणस्यांदिशिवाष्ट्रानिलाभ्यंतरात्प्राक्साध्या नरैरित्यध्याहारः त्वाष्ट्रंचित्रा अनिलःस्वाती अनयोरंतरंम ध्यंतस्मात्प्राचीसाध्येत्यर्थः एतदुक्तंभवति संभवेसतिरात्रौप्राङ्मुखउपविश्य युगमात्रोदितांचित्रांनलिकयाविलोकयन् नलिकाग्राल्लंबंभूमिपर्यंतमुक्त्वाभू मौचिह्नंकृत्वातथैवाचलस्तेनैवनेत्रेणस्वातिमवलोकयन् तथैवनलिकाग्रात्सकाशाल्लंबंभूमिपर्यंतंमुक्त्वालंबपातेचिन्हंकृत्वानेत्राल्लंबंमुक्त्वातथैवचिन्हंकुर्यात् एवंचिन्हद्वयंचित्रास्वातीचिन्हयोरज्जुंतन्मितांधृत्वा रज्जुप्रांतावेकीकृत्यमध्येचिन्हंकुर्यात् पुनस्तत्रतत्रैवप्रसार्यमध्यचिन्हेशंकुंनिधाय तस्मात्पश्चिमचि

प्राक्साध्योज्जयिनीस्थलाद्यमदिशित्वाष्ट्रानिलाभ्यंतरात्सौम्येसाग्न्युदयादुदग्ध्रुवमुखाद्दिङ्मूढकेस्यान्मृतिः

न्हपर्यंतंरज्जुंप्रसारयेत् तत्प्राचीसूत्रं एवमुज्जयिन्यादक्षिणतः प्राचीसाधनमुक्त्वानंतरंउत्तरतः प्राचीसाधनमाह सौम्येइति अतः उज्जयिन्याः सौम्येउत्तरभागे अग्न्युदयात्कृत्तिकोदयात् प्राचीसाध्या एतदुक्तंभवति पूर्ववन्नलिकयायुगमात्रोदितांकृत्तिकामालोक्यनलिकामूलाग्राभ्यांलंबौमुक्त्वाभूमौचिन्हद्वयंकृत्वा तयोरुप रिप्राचीसूत्रं अथोत्तरसाधनमाह उदगिति ध्रुवमुखात् उदक् उत्तरदिक्साध्या इदंसर्वेषांसाधारणं अथदिङ्मूढत्वेदोषमाह दिङ्मूढकेस्यान्मृतिरितिस्पष्टं त थाचोक्तंदेवयजनदीपिकायां चित्रास्वात्यंतरेश्रोणाद्दक्षिणापथवासिनां प्राचीतुकृत्तिकाज्ञेयाउत्तरापथवासिनामिति श्रोणात्उज्जयिन्याः तथाचशुल्बे कृत्तिका- श्रवणंपुष्यंचित्रास्वात्योर्यदंतरं एतस्याच्यादिशोरूपंयुगमात्रोदितेपुरइति युगप्रमाणंषडशीत्यंगुलानि तथाचशुल्बसूत्रं अंगुलैरथसंमितायाःप्रमाणं तत्राष्टाशी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निशातमीषाचतुःशतमस्ताः मस्ताः षडशीतिर्युगंचत्वारोष्टकाः शम्योर्ति तथाचस्फुटकरणे ध्रुवलंबकरेरवायोरेरवांतःसौम्ययाम्यहरितौस्तः तन्मत्स्यपुच्छमुरवतः प
श्चिमपूर्वाभिधोविद्यादिति रघुनारदः प्रासादेसदनेलिंदेद्वारेकुंडेविशेषतः दिङ्मूढेकुलनाशःस्यात्तस्मात्संसाधयेद्दिशइति अथकेषुमासेषुगृहंकर्तव्यमित्या
ह गेहमिति माधवादिषुमासेषुमृद्वादिभिर्नक्षत्रैर्गेहंगृहंकुर्यात् माधवोवैशारवः पौषफाल्गुनौप्रसिद्धौ नभाःश्रावणः मार्गोमार्गशीर्षः तेष्वित्यर्थः मृदू
नि चित्रानुराधारेवतीमृगाः अनिलःस्वाती पाशीवरुणः तद्दैवंशततारका अर्कोहस्तः ईज्यःपुष्यः वसूधनिष्ठा ध्रुवाणिरोहिणीउत्तरात्रयंचतैः स्थिरतनौ
स्थिरलग्ने किंलक्षणे सुकेंद्राष्टमे शोभनानिपापग्रहरहितानिकेंद्राष्टमानियस्यतत्तथातस्मिन् स्थिरतनाविति वापाठः शेषंपूर्ववत् ५ अथोक्तेष्वपि

गेहंमाधवपौषफाल्गुननभोमार्गेषुमृद्वानिलैःपाश्यर्केज्यवसूध्रुवैःस्थिरतनौकुर्यात्सुकेंद्राष्टमे ॥५॥नोपृ
ष्ठाग्रविधौनरिक्ततिथौनार्कारवारांशयोरुक्तर्क्षेष्वपिकुंभमीनगविधौस्तंभोच्छ्रितिंनाचरेत् ॥ ॥

नक्षत्रेषुविशेषमाह नोइति पृष्ठाग्रविधौसतिनोविरचयेत् एतदुक्तंभवति कृत्तिकादीनिसप्तनक्षत्राणिपूर्वस्यां मघादिसप्तदक्षिणे अनुराधादिसप्तपश्चिमे धनिष्ठादिसप्तो-
त्तरे इत्या[illegible]सप्तशलाकाचक्रस्थितनक्षत्राणांमध्येमृद्वानिलादीष्टचंद्रनक्षत्रंयस्मिन् दिग्भागेभवति तद्दिङ्मुखेगृहेसंमुखश्चंद्रोज्ञेयः तत्पृष्ठस्थेपृष्ठतोज्ञेयः एवमग्रगेपृष्ठ
गेवाचंद्रेसतिगृहंनकर्तव्यमित्यर्थः तथाचभृगुः चक्रेसप्तशलाकाख्येकृत्तिकादीनिविन्यसेत् ऋक्षंचंद्रस्यवास्तोश्चपुरःपृष्ठेचनोशुभमिति तथाचब्रह्मशंभुः धनलाभःप्र-
वासःस्यादायुश्चौरभयंक्रमात् दक्षाग्रवामपृष्ठस्थगृहकर्तुर्निशाकरइति नरिक्ततिथौस्पष्टं नार्कारवारांशयोः अर्कभौमयोर्वारेनवांशयोः नकुर्यात् उक्तर्क्षेष्वपिउक्त
नक्षत्रेष्वपि कुंभमीनगविधौसतिस्तंभोच्छ्रितिंनाचरेदिति अर्थादन्यत्सर्वंआचरेत् तथाचमांडव्यः पंचकेषुचधिष्ण्येषुनकुर्यात्स्तंभमुच्छ्रयम् क्षेत्रसूत्रशिलान्यासमाका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रादिसमाचरेदिति अथारंभेवृषभवास्तुमाह तदुक्तंगर्गसंहितायां सूर्यक्षभादतस्यवमस्तकेत्रीणिविन्यसेत् वृषभस्याग्रपादे तत्पश्चात्ग्रहकारिणः द्वेद्वेपादेचाग्रपा
दौउद्वसन्पश्चिमेस्थिरं पुच्छेत्रीणिचहानिःस्याद्भ्रमणंतत्फलंस्थितं वामकुक्षौचतुर्भानिदारिद्र्यंतत्फलंभवेत् चत्वारिदक्षिणेकुक्षौतत्फलंस्याद्धनागमः पृष्ठेत्रीणिश्रि-
यानित्यंसुखेद्वेस्वामिनाशनं वृषभस्यफलंज्ञेयंकृत्वागेहंसमारभेदिति गृहारंभेगृहकरणेशिलान्यासादेरिदंवृषभवास्तुवेवउत्तीर्णशुभंयासंतुर्यादिति अर्कयुतादिसूर्यनक्ष-
त्रादि तुर्या तुर्यात्पंचदशाग्निदृक्परिमिताश्चयोविंशात्सकाशात् क्रमेणवेदाब्धिपंचभानिनक्षत्राणिगृहस्यकरणेरचनायांप्रवेशोपिनिंद्यानिस्युः तथाचव्यवहारसारे
त्रिवेदाब्धित्रिवेदाब्धिद्वित्रिभेष्वर्कतः शशी कुर्याल्लक्ष्मींसमुद्वासंस्थैर्यंलक्ष्मींदरिद्रताः धनंव्याधिंक्रमान्मृत्युंप्रवेशारंभयोर्द्वयइति ६ अथचतुर्धाद्वारनिर्णयमाह सार्धें

तुर्यात्पंचदशाग्निदृक्परिमिताद्वेदाब्धिपंचक्रमान्निंद्यान्यर्कयुतादिगेहकरणेभानिप्रवेशोपिच ॥ ६ ॥ शे
तेभाद्रपदात्रिषुत्रिषुस्मरः प्रागादिशीर्षोऽन्हिप्रोक्तंसद्मसुखंतुगोल्यजधटेष्वर्कैयमोदङ्मुखम् ॥

स्त्रिभिर्वृत्तैः शेतइति भाद्रपदात्त्रिषुत्रिषुमासेषुस्मरोवास्तुपुरुषः प्रागादिशीर्षःशेतेइति एतदुक्तंभवति भाद्रपदादिमासत्रये पूर्वशीर्षः मार्गशीर्षादिमासत्रयेदक्षि
णशीर्षः फाल्गुनादिमासत्रयेपश्चिमशीर्षः ज्येष्ठादिमासत्रयेउत्तरशीर्षोवास्तुःशेते इत्यर्थः अत्रअस्यांशीर्षदिशायांसद्मसुखंगृहसुखंप्रोक्तं वास्तुपुरुषस्य मु
खेव्हादिचतुष्पादेखननंस्तंभारोपणंनकार्यमितिभावः तदुक्तंवास्तुशास्त्रे वास्तोःशिरसिपुच्छेचयाम्येकुक्षौचपृष्ठतः आयुष्कामःखनेन्नैववामकुक्षौखनिः शुभाइ
ति वास्तुयामले शिरःस्थानेध्रुवःकुर्यात्त्रयमंहननकर्मच मातरंपितरंहन्यात्पृष्ठेरोगभयंतथा पुच्छेचगोत्रहानिःस्यात्वामकुक्षौधनप्रदइति अन्यच्च स्तंभंनारोपयेद्वा
स्तु पुच्छेव्हादिचतुष्पदे मुखेमृत्युःस्वंशीर्षेहृदिशोकंपदेभयं पृष्ठेकर्तुर्विनाशायवामकुक्षौसुखप्रदइति अथसंक्रांतिपरत्वेनमुखनिर्णयमाह गोल्यजेति गोल्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जभसेष्वर्कैसतियमोदङ्मुखंगृहंकार्यं गोर्वृषः अलिर्वृश्चिकः अजोमेषः धटस्तुला एषुराशिषुअर्केसूर्येसतियमोदङ्मुखं दक्षिणामुखंउत्तराभिमुखंवागृहंकार्यमि-
त्यर्थः हृद्रोगैणकुलीरलेयगरवौसति पूर्वापरास्य पूर्वाभिमुखपश्चिमाभिमुखंगृहंकार्यमित्यर्थः हृद्रोगः कुंभः एणोमकरः कुलीरः कर्कटः लेयःसिंहः एतान्ग
च्छतिसतथा सचासौरविश्च तस्मिन्सति पूर्वापरास्यपूर्वपश्चिममुखंवागृहंकार्यं अन्यस्थेअन्यराशिस्थेरवौसति गृहंनकार्यं अथायपरत्वेनगृहमुखनिर्णयंवि
वक्षुस्तावदायसाधनमाह भुजेति भुजकोटिघातइभहृच्छेषंआयाःस्फः भुजोगृहदैर्घ्यविस्तारयोरन्यतमस्यनाम तदन्याकोटिः तथाचोक्तं।लीलावत्यां इष्टो-
बाहुर्यस्यांतत्स्पर्धिन्यांदिशीतरोबाहुः त्र्यस्रेचतुरस्रेवासाकोटिः कीर्तितातज्ज्ञैरिति तयोर्घातोगुणनं इभहृदष्टहृच्छेषंपूर्वादियथास्यात्तथा ध्वजादयआयाः क्रमा-

हृद्रोगैणकुलीरलेयगरवौपूर्वापरास्यंगृहंनान्यस्थेभुजकोटिघातइभहृच्छेषंस्फरायाः क्रमात् ॥ ७ ॥ पूर्वादिध्वजधूमसिंहशुनकोक्षाणाः
खरेभोष्ट्रकाधार्याःस्वस्वपदेध्वजोऽखिलसुखः भाग्यान्यवक्रोगजः॥ स्फः ७ पूर्वादिषुध्वजादयोबलिशाइनिभावः एतेध्वजादयःस्वस्वपदेस्वस्व-

स्थाने ध्वजःपूर्वे धूमआग्नेय्यां इत्यादिधार्याः अयमर्थः मुख्यगृहापेक्षयादिक्षुवक्ष्यमाणगृहेषुधार्याइत्यर्थः अथवास्वसदृशवास्तुषुधार्याः अथवा स्वसदृशरक्ष
गृहेषुधार्याः अथवा क्रूरकर्मसाधनवस्तुषुपराक्रमिणोधार्याः अथवास्वसदृशवास्तुसत्वोपजीविनांगृहेषुधार्याः अथवास्वानुरूपवस्तुसाध्यहितवस्तुगृहेषुयथा
योग्यंधार्याइत्यर्थः एतत्स्पष्टमुक्तंवास्तुप्रदीपे खेटखर्पटकाटेषुवृषः सिंहोगजःश्रुभः वापीकूपतडागादौगजोदेयोविचक्षणैः आसनेयोजयेत्सिंहंशयनेवैबलं
जरं वृषंभोजनपात्रेचदद्याच्छालादिषुध्वजं महानसेऽग्निशालायांगृहेचाग्न्युपजीविनां धूमंदद्यात्तथाश्वानंयवनांत्यजयोर्गृहे खरोवेश्यागृहेयोज्योध्वां
क्षःपक्षिपनेगृहे वृषसिंहगजंदद्यात्प्रासादेपुरमंदिरे तथाचशिल्पशास्त्रे वस्त्रजेधर्मशालायांकुंभेस्तंभे [illegible] गजः गोगजौस्वगृहेचैवसाधारणगृहेशुभौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्रेशस्त्रेरथेसिंहो भांडागारेशश्वोगजः धान्यांबुस्थानगोस्वेभशालायांवृषभःशुभः नाड्यभागोद्वाहवेद्यांभजसिंहवृषाःशुभाइत्यादि एवआयसाधनमुक्त्वेदानींतेषांमुख्या-
न्याह ध्वजोऽखिलमुखः सर्वदिग्द्वारः प्राग्याम्यवक्त्रोगजः स्वगमं प्रागास्योवृषभः आस्यंमुखंप्राङ्मुखोवृषभःस्पष्टं विवारुणमुखः सिंहः वरुणस्यायंवारुणोदिग्विभागः
पश्चिमदिग्विभागतः वारुणोयेभ्यस्तन्नमुखंयस्यसतथा पश्चिमदिशंविनासर्वदिग्द्वारइत्यर्थः योयोयद्दिङ्मुखआयस्तत्संभूतगृहस्य तत्तद्दिशिमुखंकर्तव्यमित्यर्थः एव
मायपरत्वेनगृहमुखमुक्त्वा प्रसंगेनआयानांशुभत्वमाह प्रशस्ताइमेइति इमेचत्वारआयाःप्रशस्ताः सर्वेषांशुभाः अर्थादन्येचत्वारःसमाआया अप्रशस्ताः तथाचग
र्गः कीर्तिश्शोकोजयोवैरंधनंनिर्धनतासुखं रोगश्चेतिगृहारंभेध्वजादीनांफलंक्रमादिति प्रकारांतरं ध्वजेकृतार्थोमरणंचधूमेसिंहेजयःश्वानमनंतरोगं वृषेचराज्यं-

प्रागास्योवृषभोविवारुणमुखः सिंहःप्रशस्ताइमेधूमोऽग्नेःशुनकोंत्यजस्यखगपस्योष्ट्रोदृपत्न्याः खरः ॥८॥ प्राहुःप्राङ्मुखमंत्यवृश्चिककुलीराणां
प्रचेतोमुखंजूकोपांत्यगवांयमास्यमबलायुग्मेणकानांहितं ॥ सौम्यास्यंगृहमाद्यसिंहधनुषामत्रेष्टकाष्ठानननंकृत्वासान्यककुसावादसवदनंतत्कार्यमास्यं
नसत् ॥९॥

खरजेविनाशंगजेधनंचोष्ट्रेजानिष्फलंचेति अथदुष्टेपिसमयेविशेषमाह धूमोग्नेरिति अग्नेर्गृहेधूमोधूमायःप्रशस्तः अंत्यजस्यशुनकःप्रशस्तः खगपस्यप-
क्षिपालकस्य उष्ट्रःप्रशस्तः अदृपत्न्यावेश्यायाः गृहेखरः खरायःप्रशस्तः ८ एवमायपरत्वेनगृहमुखमुक्त्वाऽधुनाराशिपरत्वेनाह प्राहुरिति अंत्यवृश्चिककुलीराणांप्राङ्मुखं-
गृहंहितंप्राहुः अंत्योमीनः वृश्चिकःप्रसिद्धः कुलीरः कर्कः एषामित्यर्थः जूकोपांत्यगवांप्रचेतोमुखंपश्चिमाभिमुखं जूकस्तुला उपांत्यःकुंभः गौर्वृषः एषामित्यर्थः अबलायु-
ग्मेणकानांयमास्यं दक्षिणामुखं अबलाकन्या युग्मंमिथुनं एणामकरः एषामित्यर्थः आद्यसिंहधनुषांसौम्यास्यं आद्योमेषः सिंहधनुषीप्रसिद्धे एषांसौम्यास्यं उत्तरामुखंगृहं
हितंप्राहुराचार्याः एवंचतुर्धागृहमुखमभिधायेदानींतन्निर्णयमाह अत्रेष्टकाष्ठाननमिति गृहमुखपक्षेषुशोभावकाशानुरूपंइष्टकाष्ठाननंइष्टदिङ्मुखंकृत्वा तद्गृहंआस्यान्य-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ककुब्वावाक्षवदनंकार्यं आग्नाश्चनाभ्यककुभश्चनासागवाक्षाणवदनानियस्य नत्तथा उर्वरितपक्षत्रयमाग्नदिक्षुगवाक्षाः कार्याइत्यर्थः तथाचवास्तुशास्त्रे द्वारंचतुर्वि
धंप्रोक्तंवास्तुसंक्रांतिभावजं कृत्वाचान्यतमंमुख्यंगवाक्षाद्यैः पराणितु इति ९ एवंगृहमुखनिर्णयमुक्त्वाऽधुनाकोणादिविद्धमुखस्यदोषंतदपवादंचाह आस्यमिति आस्यं
गृहस्यमुखंकोणस्तंभादिभिर्विद्धंनसत्स्यात् कोणोभित्तिकोणः अध्वामार्गः भ्रमोभ्रमथभ्रधरट्टकुलालचक्रादि कूपः प्रसिद्धः कर्दमः स्नानादिजनितोनिरंतरस्थायी
तरुर्वृक्षः द्वाः द्वारांतरं स्तंभः प्रसिद्धः देवः स्थावरः एभिर्विद्धंमुखंनसत्स्यादित्यर्थः अथास्यापवादमाह सद्मौच्चेति सद्मौच्च्यद्विगुणाधिकांतरभवेवेधेनदोषः सद्म
नोगृहस्यऔच्च्यंतस्यापेक्षया द्विगुणाधिकांतरभवे द्विगुणाधिकांतरेजातेवेधेकोणादिवेधेनदोषः अर्थान्न्यूनेदोषःकिलत्यागमेनिश्चयेवा तथाचागमांतरेउक्तं मार्गत

कोणाध्वभ्रमकूपकर्दमतरुद्वारस्तंभवेवेध्रितंसद्मौच्च्यद्विगुणाधिकांतरभवंवेधेनदोषः किल॥ अष्टघ्नेगृहभूफलेभविहृतेशेषंगृहर्क्षंभवेद्दस्रेसर्प
व्ययोगृहमसत्स्वल्पायभूरिव्ययं॥१०॥ मेषाश्विवित्रितयंहरोत्रिपित्रभंमूलत्रयंधन्विनिहृद्वभेपरतोगृहेशाद्यदितंप्राग्वत्तुनाऽन्यथा॥

रुकोणकूपभ्रमविद्ध
मश्मभवंद्वारं सद्मोच्च्रयाद्विगुणांत्यक्त्वाभूमिंनदोषायेति कात्यायनगृह्यकारिकायामप्युक्तं विद्धंकूपतरुस्तंभपथपंकैःसदैवतैः तद्वारमश्मभंप्रोक्तमत्यक्त्वनीचमेवचेति
अथगृहनक्षत्रानयनंव्ययानयनंचाह अष्टघ्नइति गृहभूफलेगृहक्षेत्रफले अष्टघ्नेअष्टगुणितेभविहृतेसप्तविंशतिहृतेसतिशेषंगृहर्क्षंगृहनक्षत्रंभवेत दस्रेसर्पहृ
तेअष्टहृतेसतिशेषंव्ययोभवेत् एवमायव्ययावधिधायाधुनातत्फलंविशेषेणद्वारेणाह गृहमसदिति स्वल्पायभूरिव्ययंगृहमसत् अशुभंस्यात् स्वल्पायत्रभूरि
व्ययश्चतौयस्मिंस्तत्तथा अर्थाद्बह्वायाल्पव्ययंशुभं १० नक्षत्रज्ञानेराशिनिर्णयमाह मेषइति अश्विवित्रितयंमेषेज्ञेयं त्रिपित्र्यभं मघात्रयंहरोसिंहेज्ञेयं मूलत्रयंधनु-
षिज्ञेयं अन्येषुराशिषुद्वेद्वेभेज्ञेये तथाचगर्गः अश्विन्यादित्रयंमेषेसिंहेप्रोक्तंमघात्रयं मूलादित्रितयंचापेशेषेषुद्वयंद्वयमिति अथगृहतत्स्वामिनोर्यदितमाह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहेशेति गृहं प्रसिद्धं ईशः स्वामी तयोर्यदितिंमाग्वद्विवाहवद्योज्य तत्राविशेषमाह नाड्यन्यथेति नाडी एकनाडी अन्यथा याज्या विवाहवत्तयोज्येत्यर्थः अत्र
एकनाड्येव प्रशस्तेति भावः नक्षत्रमेकं यदि भिन्नराश्योरभिन्नराश्योर्यदि भिन्नमृक्षं प्रीतिस्तदानीं निबिडा न नाडी श्चेत्कृत्तिकारोहिणिवन्न नाडीति तथा च वृद्ध
गर्गः प्रभुः पण्यांगनां मित्रं देशं ग्रामं पुरं गृहं एकनाडीस्थितं भव्यं विरुद्धं वेधवर्जितमिति तथा च ज्योतिःसागरे सेव्यसेवकयोश्चैव गृहतत्स्वामिनोरपि परस्परं-
मित्रयोश्च एकनाडी प्रशस्यत इति अथांशसाधनार्थं गृहाणि तन्नामाक्षरसंख्यां चाह एकादीति गृहमुखात्सकाशात् क्रमात्प्रदक्षिणक्रमात् दिक्चतसृषु दिक्षु ए
कादिद्विगुणोत्तरा अंकाः स्युः एतदुक्तं भवति द्वारदिशि एकः तस्माद्द्वितीयदिशि द्वौ तृतीयदिशि चत्वारः चतुर्थदिशि अष्टौ एवं भवतीत्यर्थः शालः शांकयुतिः शा-

एकादिद्विगुणोत्तरा गृहमुखाद्दिक्ष्वंककाः स्युः क्रमाच्छालाशांकयुतिः कुयुग्ध्रुवमुखान्योकांसि संति स्फुटं ॥ ११ ॥ आषष्ठाद्दशमं त्रयोदशमिभं द्व्यर्णाः प
रे त्र्यक्षराः षष्ठेंत्ये चतुरक्षरं खलु गृहं स्युः षोडशैवं गृहाः ॥ गेहक्ष्माफलयुग्व्ययो गृह भवैर्नामाक्षरैः संयुतस्त्वष्टाप्तो वह्निभिरंशकान्शुभदः पस्त्यं द्वितीयांशकं ॥ १२ ॥

लादिगंकयोगः कुयुक् एकयुता सती ध्रुवमुखानि ध्रुवादिकानि शास्त्रोदितानि गृहाणि स्फुटं संभवंति तानि यथा ध्रुवं धन्यं जयं नंदं खरं कांतं मनोरमं सुमुखं दुर्मुखं क्रू
रं सुपक्षं धनदं क्षयं आक्रंदं विपुलं चैव विजयं चेति षोडशमिति ११ नामाक्षरसंख्यामाह आषष्ठादिति पंचमपर्यंतमित्यर्थः आषष्ठं तस्मात् प्रथमं द्वितीयं तृतीयं चतु
र्थं पंचमं षष्ठानि दशमं त्रयोदशं इभं अष्टगृहा द्व्यर्णाः द्व्यक्षराः षष्ठांत्यं सप्तमं गृहं चतुरक्षरं [illegible] क्षराणि यस्मिंस्तत्तथा अन्ये गृहाः त्र्यक्षराः एवं षोडशगृहाः स्युः गृहाः पुंसि
च भूम्न्येव निकाय्यनिलयालया इत्यमरः अथांशकसाधनमाह गेहक्ष्मेति गेहक्ष्माफलयुग्व्ययः गृहक्षेत्रफलयुक्तः पूर्वानीतो व्ययः गृह भवैर्नामाक्षरैः संयुतः वह्निभिस्त्रिभिस्तष्टः
शेषितः सन् अंशकाः स्युः इंद्रो यमो राजेति तन्नामानि ग्रंथांतरे उक्तानि तत्र द्वितीयांशकं पस्त्यं गृहं न शुभदं अर्थात्प्रथमतृतीयांशकं शुभदमित्यर्थः निशांतपस्त्यसदनभवनागारमंदिर
मित्यमरः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथगुणविचारणावधिमाह यावदिति यावत्पर्यंतंकरैः हस्तैः कृत्वा भूरिगुणंबहुगुणगृहं हृदिअंतःकरणेस्फुरति तत्तावद्विचार्यंचेद्यदि तैः केवलैः करैर्हस्तैः कृत्वाबहुगुणंन
स्फुरति तदा अंगुलमुखं अंगुलादिकंकरेषुक्षिप्त्वाः यवाविहाय तन्नुयात्कुर्यात् अथोपायांतर[illegible]माह श्रीगोपीपतीति गोपीपतिः गोपीराजः मेंगः मेंगनाथदेव
ज्ञः स्यात्तुगिर्ह्यालुगिदैवज्ञः एतन्मुखैः एतन्मुखैर्ज्योतिर्विद्भिः आयासविच्छिन्तयेयत्स्वशायक्षफलंनिबद्धं तांदहास्मिन्गृहकरणविषयेज्ञात्वास्थलंस्ताभीष्टस्थ
लंसाधयेत् तथात्रगोपीराजः विष्णोव्येकायगोभू १९ हतिभयुजिफलंगोपिराजोभर२७शेषात्ससायंचेष्टाष्टिहृम्या २१६ श्रुतमहि ८ हताद्दकु २ मकृत्यारव्य २१ वि-
श्वे १३॥ बाणाः ५ सिद्धा २४ष्टि १६ नागो ८ द्व २७ धृति १९ गिरिशा ११ न्या ३ कृतीं २२ द्व १४ तु ६ तत्वा २५ त्यष्ट्य १७ क ९ क्ष्मा १ नखे २० ना १२ र्णव ४ विकृति २३ दिना १५
न्या ७ कृति २६ धृत्य १८ धाशा १० इति अस्यार्थः गोपिराजः विष्णुंविष्णुनामानंशिष्यंमत्याहेत्यन्वयः किमाह हेविष्णो व्येकायगोभू १९ हतिभयुजि भ २७शे

यावद्भूरिगुणंहृदिस्फुरतितत्तावद्विचार्यकरैश्चेत्तैर्नोतनुयादिहांगुलमुखंक्षिप्त्वाविहायायवा ॥

षात् अहि ८ हताद्दकु मकृत्यादयः फलंस्यात् विगतः एकोयस्मात्सव्येकः सचासौआयश्चव्येकायः व्येकायश्चगोभूश्च अनयोर्हतिःगुणनंव्येकायगोभूहतिश्चभं
चव्येकायगोभूहतिभे तयोर्युक्योगः तस्यांभशेषात्सप्तविंशतिहृच्छेषात् एकादिषुसप्तविंशतिपर्यंतेषु अहिहता अष्टहताद्दकु मकृत्यादयः फलं क्षेत्रफलंस्यादित्यर्थः कथं
भूतंफलं सायं आयेनसहवर्तमानंसायं इष्टायसहितमित्यर्थः एतत्स्वेष्टायनक्षत्रजंफलंभवति न्यासः वाइत्यथवा तत्सायंफलं इष्टाष्टिहृ २१६ न्याप्तुतंसत्फलंस्यात् इष्टश्च अ
ष्टिहृच्च इष्टाष्टिहृक् तयोर्ग्रीहतिस्तयाप्तुतमित्यर्थः इदमपिस्वेष्टायनक्षत्रजंफलंभवतीति अत्रांकन्यासएवव्याख्यानं तथाचमेंगनाथदेवज्ञस्यसूत्रं इष्टघ्नात्यष्टि १७घा
तेयआयस्तेनोनितेष्टकः त्रिहृल्लब्धहतागाश्वि २७ युतेचेष्टायभंभवेदिति अस्यार्थः इष्टघ्नात्यष्टिघाते इष्टभंच[illegible]योर्घातो[illegible]तस्मिन्पृथकस्यापितोय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आयस्तेनोऽभिनिष्टकः यदि ऊनो न भवति नष्टाङ्कः आक्षप्यस्फोटनायः ऊननष्टापासरुल्लब्धाहतागाविद्युतेलब्धेन आहतोऽभ्रित अगाऽस्वनश्वनः पृथक् स्थापिते इष्टभाल्पष्टिया
नेयुतेसति इष्टायभंक्षेत्रफलं भवेत आयश्वभंचआयभे इष्टेआयभेयस्मिंस्तत्तया अत्रयदि त्रिभिर्निःशेषो भागो न गच्छति तदा तत्रतावत् अष्टौक्षेप्याः यावत्त्रिभिर्भागो ग
च्छति तथाचह्माालुगिदैवज्ञस्यसूत्रं व्येकेष्टर्क्षहताद्विबाणशशिनो १५२ त्यष्टायुता १७ स्तेपिचव्येकेष्टायहतैर्कनाग ८१ सहिताः षण्मूर्च्छनाभि २१६र्हताः शेषंक्षेत्रफलं
भवेदभिमतस्वेष्टायनक्षत्रजंस्यात्दैर्घ्यंतदर्भाष्टविस्तृतिहृतंदैर्घ्योद्धृतिंविस्तृतिरिति स्पष्टार्थोयंश्लोकः इत्यादिविचारणया इष्टंक्षेत्रफलं अवकाशानुरूपंचहृदिधृत्वास्थलं
साधयेदित्यर्थः १३ अथस्थलसाधनायसूत्रमोटनलक्षणमाह द्विघ्नायाममिति अजरत्सूत्रंनूतनरज्जूं द्विघ्नायाममितंद्विपाशंचविधाय अंतात् एकस्मात्सूत्रांतात्

श्रीगोपीपतिमंगह्माालुगिसुरवैरायासविच्छिन्नयेस्वेष्टायर्क्षफलंनिबद्धापिहनज्ज्ञात्वास्थलंसाधयेत् ॥ १३ ॥ द्विघ्नायाममितंद्विपाशमजरत्सूत्रंविधा
यांकयेत्त्र्यायामांघ्रिमितेचविस्तृतिदलेंनात्कर्षकोणाभिधौ ॥ पाशौक्षेत्रविरामशंकुनिहितौकृत्वाद्यमाकर्षयेत्कोणेशंकुरितीतरौविनिमयाद्ध्वंतयो
श्चापरौ ॥ १४ ॥ अंकयेदित्यन्वयः द्विघ्न[illegible]श्चासौआयामश्चद्विघ्नायामः आयामोदैर्घ्यं तेनमितंद्विगुणितदैर्घ्यसमानमित्यर्थः द्विपाशं द्वौपाशौयस्मिन्तद्विपाशं एवंवि
धंसूत्रंविधायकृत्वा अंतात्सकाशात् अंकयेत् चिन्हयेत् एतदुक्तंभवति पूर्वकल्पितक्षेत्रस्यदैर्घ्यमितंसूत्रंद्विगुणंविधाय तदंतयोः पाशौकृत्वा अंकयेत् कुत्रकुत्रांक
येदित्याह आयामांघ्रिमितेचपरंविस्तृतिदलेअंकयेत् भयश्चतेआयामांघ्रयश्चतेतथातैर्मितंतस्मिन् एतदुक्तंभवति क्षेत्रदैर्घ्यंचतुर्भिर्भक्त्वा लब्धं अंघ्रिप्रमाणं एक-
स्मादंतात् अंघ्रित्रयंहित्वाचिन्हयेत् तस्मादेवांतात् विस्तृतिदलंक्षेत्रस्यविस्ताराधीमितंअंकयेत् [illegible]तौअंकौकर्षकोणौ॥ प्रथमस्तुः अंघ्रित्रयेकृतः कर्षाख्यः विस्तृतिद-
लेकृतोंकः कोणाख्यः एवंसूत्रमोटनमुक्त्वास्थलसाधनमाह पाशाविति पाशौक्षेत्रविरामशंकुनिहितौकृत्वा आद्यंअंकंआकर्षयेदित्यन्वयः क्षेत्रस्यविरामोअंतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयोः शंकूनिहितौ निक्षिप्तौ कृत्वा आद्यं अंकं कर्षाख्यं आकर्षयेत् एतदुक्तं भवति क्षेत्रस्य मध्यभागे साधितादिक्सूत्रोपरि इष्टदैर्घ्यमितं सूत्रं प्रसार्य तदंतयोः शंकू निखाय तयोः शंक्वोः मोचितसूत्रांतपाशौ निधाय कर्षाख्यं चिन्हं धृत्वा एकस्यां दिशि आकर्षयेत् यथो[illegible]समाना भाक[illegible]त् तथा आकर्षयेदित्यर्थः कोणशंकुरिति द्वौ [illegible] कोणचिन्हे[illegible] कोणचिन्हमागतं तत्र भुवि शंकुं निखाय इत्यध्याहारः इत्यमुना प्रकारेण इतः शंकुनिखेयः एतदुक्तं भवति तदेव कर्षचिन्हं अन्यस्यां दिशि आकृष्य कोणे शंकुर्निखेयः एवं कोणद्वयसाधनमभिधाय अन्यकोणद्वयसाधनमाह विनिमयादिति रज्ज्वंतयोर्विनिमयाद्विपरीतधारणात् अपरौ कोणशंकौ निखेयौ एतदुक्तं भवति रज्ज्वंतौ विपरीतौ धृत्वा पूर्ववत्कर्षाकर्षणं कृ[illegible] कोणयोः शंकू निखेयौ १४ एवं क्षेत्रसाधनमुक्त्वा सूत्रन्यासमाह आग्नेयादीति आग्नेयादि दृढं प्रदक्षिणगतं यथा स्यात्तथा।

आग्नेयादि दृढं प्रदक्षिणगतं सूत्रं समासादयेन्मध्ये वामकपार्श्वसुप्तपुरुषं ध्यात्वा तमुत्तानकम् ॥ अष्टाश्व्यं २८ शमगेंदुसंमितलवान्पुच्छाद्विहायाग्रगोभागो नाभिरितः खनेद्धूर्वामितं वामे[illegible] भिः पूरयेत् ॥१५॥

खंडं अत्रुटितं सूत्रं आसादयेत् मध्ये क्षेत्रमध्ये वामकपार्श्वसुप्तं पुरुषं प्रागुक्तशिरस्कं ध्यात्वा तं ध्यातं पुरुषं उत्तानकं ध्यायेत् कथं भूतं पार्श्वस्थं लघुमध्ये गुरोः परस्या[illegible]योपरि तथैव पूरयेत् पश्चिमं च गुरुभिः पुनः पुनः सर्वमेव लघुरित्ययं विधिरिति कथंभूतं अष्टाश्व्यंशं अष्टाश्विनोंशा भागा यस्मिन्स तथा तं अयमर्थः क्षेत्रप्रमाणं कुकलास रूपं वास्तुपुरुषं प्रकल्प्य ततोष्टाविंशतिधा कुर्यात् एवमष्टाश्व्यंशं प्रकल्प्य पुच्छात्सकाशात् अगेंदुसंमितलवान् सप्तदश भागान् विहाय त्यक्त्वा अग्रगस्तदग्रगो भागो नाभिः इतो नाभेः सकाशात् वामवामभागे लवमितं हस्तमितं खनेत् अनंतरं अश्मभिः पूरयेत् तथा च ब्रह्मशंभुः सूत्रभित्तिशिलान्यासं स्तंभस्यारोपणं तथा पूर्वदक्षिणयोर्मध्ये कुर्यादित्याह काश्यपइति नारदः [illegible] पूर्वादिदिक्शिरा वामपार्श्वशा[illegible]क्षिणमिति तथा च शिल्पशास्त्रे वास्तोः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिरसिपुच्छेचयाम्यकुक्षौचपृष्ठतः आयुःकामोरवनेन्नैववामकुक्षौरवनिःक्रमा वास्तुक्षेत्रप्रमाणंचकल्पयित्वाऽस्यवामके कुक्षौरवनावधायाद्वोग्रावाणैःपूरयेत्तत इति
तयाचलक्षः त्यजेद्दशशिरोभागौद्ध्यग्रेसमदशांशकान् मध्येनाभिंविजानीयात्तत्रशंकुंप्रतिष्ठयेत् अस्थिरस्यशिरोयत्रवास्तोस्तद्गणयेत्करैः दैर्घ्यवाविस्तृतिंतत्रक्ष
त्वाष्टाश्विमितांशकाइति १५ अथशंकुन्यासमाह नाकालइति अत्रकुक्षिस्थलेनानरः शंकुः कालेमुहूर्तसमयेनिधेयः सकियत्प्रमाणइत्यपेक्षायांप्रमानमाह अ
ग्न्याहिमात्सकाशाद्वर्णपरत्वेन सिद्धू २४ विंशा २० स्य १६ हः छत् १२ संख्यांगुलिकः निधेयः प्रतिष्ठापनीयः एतदुक्तंभवति विप्रेणसिद्धसंख्यांगुलिकः चतुर्विंशां
गुलोनिधेयः क्षत्रियेणविंशांगुलः वैश्येनाष्टांगुलः षोडशांगुलःशूद्रेण अहःछत्संख्यांगुलोद्वादशांगुलोनिधेयइत्यर्थः किंलक्षणः नाउक्ततरुजः शास्त्रोक्त

नाकालेःत्रनिधेयउक्ततरुजोग्न्यात्सिद्धविंशाष्टयहःछत्संख्यांगुलिकस्त्रिभागचतुरस्त्राष्टास्त्रकानस्त्रकः॥ कंवक्षस्थलमूरुपादयुगुलंसं
स्पृश्यविप्रादिकोरेखांसूत्रवदग्निजेनरचयेत्तद्धच्चभित्तेःशिलाः॥१६॥ वृक्षोद्भवः पुनःकिंलक्षणः त्रिभागचतुरस्त्राष्टास्त्रकानस्त्रकः त्रिभागेषु

चतुरस्त्राष्टास्त्रकानस्त्रकानियस्मिन्सतथा एतदुक्तंभवति यथाप्रमाणंशंकुंत्रिविधाविभज्याद्यांशंचतुरस्त्रं द्वितीयांशंअष्टास्त्रं तृतीयांशमनस्त्रंवर्तुलंकुर्यादि-
तिभावः तथाचोक्तंग्रंथांतरे स्याच्चतुर्विंशविंशाष्टिद्वादशांगुलकैःक्रमात् विप्रादीनांशंकुमानंस्वर्णवस्त्राद्यलंकृतं खदिरार्जुनशालोत्थंयुगपत्रतरूद्भवं र
क्तचंदनपालाशरक्तशालविशालजं नीपकारंजकुटजंवैणवंबिल्ववृक्षजं शंकुंत्रि[illegible]विभज्याद्यंचतरस्त्रंततःपरं अष्टास्त्रंचतृतीयांशंअनस्त्रमृजुमव्रणं ए
वंलक्षणसंयुक्तंपरिकल्प्यशुभेदिनइति अथरेखाकरणमाह कमिति अग्निजनस्तु[illegible]णब्राह्मणादिकः कं[illegible]दसस्पृष्ट्वासूत्रवद्रेखांरचयेत् सूत्रवदिति आ
ग्नेय्यादिगृहप्रदक्षिणंकुर्यादित्यर्थः एतदुक्तंभवति ब्राह्मणः कंशिरःस्पृष्ट्वातर्जन्यावाकुत्वा आग्नेयादिप्रदक्षिणंसूत्रानुगतांरेखांकुर्यात् तथैवक्षत्रियो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु० भा०
५०

वक्षस्थलस्पर्शद्वारेरेखांकुर्यात् वैश्यः ऊरुयुग्मस्पर्शद्वारेरेखांकुर्यात् शूद्रः पादयुग्मस्पर्शद्वारेरेखांकुर्यात् तथाचलल्लः छत्रास्त्रमनिपातंमध्यांगुल्याथवाप्रदेशिन्या अंगुष्ठेनवा
मपाणिनाकक्षांतरमुक्ताभिः रेखांकुर्यात् इत्यादि तथाचभृगुः विप्रः शीर्षंनृपोवक्षोवैश्यऊरू [illegible] पदौ स्पृष्ट्वारेखां [illegible] रंभ [illegible] कुर्याद्दूर्ध्वं प्रदक्षिणमिति अन्यैरित्यारने
व्याः तथाचकारिकायां अंगुष्ठकेनदेशिन्यारेखांकुर्वीतसूत्रतः स्वर्णेनमणिनारूप्यमुक्तादधिफलाक्षतैः कुसुमैर्वानशस्त्रेणनलोहेननभस्मना काष्ठादिभिर्नापसव्यां
नखकाष्ठदोषदर्शनात् शस्त्रेणशस्त्रमृत्युःस्यादित्यादिस्पष्टमीरितमिति तथाचबृहद्वास्तुपद्धतौ शस्त्रेणशस्त्रमृत्युःस्याद्बंधोलोहेनभस्मनाग्निभयं तस्करभयंतृणेन
चलिखिताकाष्ठेनराजभयं वक्राचपादलिखिताशत्रुभयक्लेशदाविरूपाच चर्मांगारास्थिकृतादंतेनचकर्तुरशुभाय वैरमपसव्यलिखिताप्रदक्षिणासंपदोविनि
दिशेयाइति अथशिलान्यासमाह भित्तेःशिलाअपिसूत्रवदाचरेयुः आग्नेयादिप्रदक्षिणंस्थापयेयुरित्यर्थः तथाचवराहः दक्षिणपूर्वकोणेकृत्वापूजांशिलांन्य

पूर्वादौत्रिषडर्थपंचमलवेद्वाः सव्यतोऽकोष्ठतेदैर्घ्ये द्व्यंशासमुच्छ्रिताब्धिलवकेसर्वासुदिक्षूदिता ॥

सेन्प्रथमं शेषाःप्रदक्षिणेनस्तंभाश्चैवमनिष्पाद्याइति १६ अथभित्तिप्रसंगेनद्वारमाह पूर्वादाविति दैर्घ्येगृहदैर्घ्ये अंकाभेनवभिर्भाजितेसतिपूर्वादौदिशिक्रमेणस-
व्यतोवामभागात्त्रिषडर्थपंचमलवेद्वाः द्वारंउक्तं मुनिभिरितिशेषः त्रयश्चषट्चअर्थाश्चपंचचत्रिषडर्थपंच एतेषांसंख्यापूरकाः त्रिषडर्थपंचमास्तेचतेलवाश्चतेषां
समाहारस्तस्मिन् एतदुक्तंभवति गृहदैर्घ्येनवभागंकृत्वापूर्वाभिमुखेगृहेक्रियमाणेवामभागात् अंशद्वयंत्यक्त्वातृतीयांशेद्वारंकर्तव्यं दक्षिणाभिमुखेगृहेतथैवांश
पंचकंत्यक्त्वाषष्ठांशेकार्यं पश्चिमाभिमुखेतथैवांशचतुष्कंत्यक्त्वापंचमांशेकार्यं उदङ्मुखेपंचमांशे एतद्द्वारंकर्तव्यं सर्वासुदिक्षु अब्धिलवकेचतुर्थभागेद्वारुदिता कि
लक्षणाद्वाः द्व्यंशसमुच्छ्रिताद्विभागोच्चा तथाचवाराहः दैर्घ्येनवांशाः [illegible] सव्याद्द्वारंशुभंप्राकुभिचतुर्थभागे चतुर्थ [illegible] शिदक्षिण [illegible] पश्चात्तु पंचमकेतयो
[illegible] वेसूत्रवक्ष्यइति

टी.
५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाग्नेय्यन्नासक्तभित्तिषु स्तंभप्रतिष्ठामाह स्तंभोऽग्नेर्दिशीति अग्नेर्दिशि आग्नेय्यां सत्समये पूर्वोदिते स्तंभः स्थाप्यः अत्र पूर्वोक्त तरुजइत्यनुवर्तते किंलक्षणः स्तंभः पूजितः प्राक्चंदनार्चितः पुनः किंलक्षणः शिरश्छत्रभाक् शिरसि छत्रं भजतइति तथाच्छत्रंतु काकादिपक्ष्युपवेशनभयात्स्तंभोपरि क्षिप्यते तथाचवराहः छत्रस्रग्वस्त्रयुतः कृतधूपविलेपनः समुत्थाप्यः स्तंभस्तथैवकार्यो द्वारोच्छ्रायः प्रयत्नेनेति तथाचोत्पलः स्तंभोपरि यदोलूककाकगृध्रादिपक्षिणः व्यालप्रदयप्रतिष्ठंति तदाकर्तुर्नशोभनं॥तस्मात्स्तंभोपरिच्छत्रंशाखांवाफलवतींहुवा धारयेदथवावस्त्रंतु धैरत्नादि निक्षिपेदिति गुर्जरदेशेकश्चित्कालसर्पमकष्टोवक्ष्यते तच्छून्यदिशिप्रथमंस्तंभप्रतिष्ठांकुर्वंति॥तदसत् यतस्तदवलोकनंविवाहवेद्यांकोणेषु शृंगारार्थस्तंभान्रोपयंति तद्विषयं तदप्येकदेशीयंनबहुसंमतं कालसर्पस्तुयथा ईशानतःसर्पति कालसर्पोविहाय सृष्टिंगणयेद्दिक्कु पश्चाद्गतिस्तत्सुखमध्यपुच्छंत्रिकंत्रिकंवै वृषसंक्रमादेः अहेःफणायांमरणंवरस्य मध्येकुमार्याःस्वजनस्यपुच्छे विषयमेकंकिलशून्यदेशोविवाहवेद्यांनिखनेच्चकील

स्तंभोऽग्नेर्दिशिपूजितःसत्समयेस्थाप्यःशिरश्छत्रभाग्विस्ताराष्टिलवान्वितैः कृतकरैस्तुल्यंगृहोच्चंविदुः॥१७॥

मिति वृषादित्रिषुराशिषु आग्नेय्यांस्तंभरोपणंकार्यं सिंहादित्रिषु ईशान्यां वृश्चिकादित्रिषु वायव्यां घटादित्रिषुनैर्ऋत्यांकर्तव्यमिति तद्विवाहएव गृहेसिंहादवलोकनीयं वृषाद्वेद्यां तथाच वृषाद्वेद्यांगृहेसिंहान्मीनात्त्रीणिसुरालये मुखंमध्यंतथापुच्छं स्वहस्तंभनियोजयेत् इति अन्यच्च गृहस्तंभप्रतिष्ठापनंबहुभिर्ग्रंथकारैःसाग्नेय्यामेवाभिहितं तथाचब्रह्मशंभुः सूत्रभित्तिशिलान्यासंस्तंभस्यारोपणंतथा पूर्वदक्षिणयोर्मध्येकुर्यादित्याहकश्यपः तथाचशार्ङ्गधरः प्रासादेषुचहर्म्येषुगृहेष्वन्येषुसर्वदा आग्नेय्यां प्रथमंस्तंभंस्थापयेत्तद्विधानतः तथाचवराहमिहिराचार्याः दक्षिणपूर्वकोणे कृत्वापूजांशिलान्यसेत्प्रथमं [illegible] ार्याः प्रदक्षिणंशेषाः स्तंभाश्चसमानेष्ठाप्याइति कात्यायनगृह्यकारिकायामप्यु-
क्तं एकैकमुद्धृयेत्स्तंभंमंत्रैरेतैःशिलातले श्रियोवसानइत्येतैरमामित्यादिभिर्गृहेति आग्नेय्यादिषुकोणेषुमंत्रैरेतैःशिलान्यसेदिति गृह्यहरिहरभाष्येशालापद्धतिश्चप्ये-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वमेवोक्तमित्यलमतिप्रसंगेन उक्ततरुजइत्यक्तत्वात् शास्त्रांतरात्काष्ठान्यवगंतव्यानि तथाचवास्तुशास्त्रे श्रीपर्णीरोहिणीशाकसर्जाश्चसरलाःशुभाः प
नंगलोध्रशालाख्यास्तालाःर्जुनकशिंशपाः १ चंदनाशोकबदरीमधूकाश्वकदंबकाः [illegible] शमीनिंबबिल्ववर्ज्यंगृहांतिके गृहेकाष्ठसमंश्रेष्ठमलिंदेविषमंशु
भमिति नारदः प्लक्षोदुंबरचूताख्यानिंबस्नुहिबिभीतकाः दग्धाःकंटकिनोवृक्षावटा [illegible] पत्यकाः अगस्तिशिग्रुतालाख्यास्तित्तिडीकाश्चनिंदिताः अन्येच-
गृहनिर्माणेयोजनीयाः सदाद्रुमाइति तथाचवराहः पितृवनमार्गसुरालयवल्मीकोद्यानतापसाश्रमजाः चैत्यसरित्संगमसंभवाश्चघ टतोयसिक्ताश्च १ कुंजानु
जातवल्लीनिपीडितावज्रमारुतोपहताः स्वपतितहस्तिनिपीडितशुष्काग्निप्लुष्टदुष्टमधुनिलयाः तरवोवर्जयितव्याःशुभदाःस्युःस्निग्धपत्रकुसुमफलाः सुरदारुचं
दनसमामधुकतरवःशुभाद्विजातीनां क्षेत्रस्यारिष्टाश्वत्थखदिरबिल्वावृद्धिकराः वैश्यानांजीवकखादिरकसिंधूकस्यंदनाश्चशुभफलदाः तिंदुककेसरसरलार्जु-
नोत्थशालाश्चशूद्राणाम् सर्वेषांवावास्ताः सर्वेवृक्षाश्चनिंदितानोचेदिति व्यासोऽपि अन्यवेश्मस्थितंदारुनैवान्यस्मिन्प्रयोजयेत् नतत्रवसतेकर्तावसेत्तत्रन-
जीवति समरांगणे इष्टकालोष्ठपाषाणमृत्तिकाजीर्णमायसं तृणंपर्णंबुधैः प्रोक्तंदारुनूनं गृहायवै इति शार्ङ्गधरेपि नूतनेनूतनंकाष्ठंजीर्णेजीर्णंप्रशस्यते जीर्णेचनूत
नंकाष्ठंनोजीर्णंनूतनंशुभमिति वृक्षच्छेदप्रार्थनाग्रंथांतरेउक्ता यानीहभूतानिवसंतितानिबलिंगृहीत्वाविधिवत्प्रयुक्तं अन्यत्रवासंपरिकल्पयंतुक्षमंतुतान्यद्यनमोऽस्तु
तेभ्यः इति अथस्तंभप्रसंगेनगृहोच्चतामाह विस्तारेति विस्तारस्यगृहविस्तारस्य अष्टिलवः षोडशांशस्तेनअन्वितैर्युक्तैः कृतकरैश्चतुर्हस्तैस्तत्तुल्यंसमानंगृहोच्चंविदु
र्मुनयइत्यध्याहारः तथाचरत्नकोशे विस्तारषोडशांशश्चतुर्हस्तोभवेद्गृहोच्छ्रायइति तथाचलल्लः नात्युच्छ्रितंनातिनीचंकुड्योत्सेधंयथारुचीति १७ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथसुखगृहात्कस्यगृहं कस्यांदिशिकर्तव्यमित्याह स्नानेति स्नानप्रसद्म आग्नःप्रसद्मः स्वपिःशयनं वस्त्राणिप्र० भोजनप्रसद्म परावानादयः द्रव्याणिस्वर्णादी
नि अमराः देवाः एषांओकांसिगृहाणि तेषांस्थितिः स्थापनं पूर्वादौदिशिक्रमेणकार्यमित्यध्याहारः तथाचनारदः स्नानागारंदिशिप्राच्यामाग्नेयामग्निमंदिरम्
याम्यायांशयनागारंनैर्ऋत्यांवस्त्रमंदिरं प्रतीच्यांभोजनागारंवायव्यांपशुमंदिरं भांडकोशंतूत्तरस्यामीशान्यांदेवमंदिरमिति अथजलस्थानमाह ईशितुरीशानस्य
दिशिजलंकार्यंनान्यत्र तथाचलल्लः प्राच्यादिदिक्स्थेसलिलेसुतहानिःशिखिभयंरिपुभयंच स्त्रीकलहंस्त्रीदोष्यंनैःस्वंचिंतात्मजविद्विरिति अथान्यदप्याह परमिति प
र मनुक्तंपदार्थजातंवायोर्दिशिकार्यं अन्यानिमारुत्यामितिलल्लोक्तत्वात् अपाक्दक्षिणस्यांदिशिमूत्रकंकार्यम् स्थलसंकोचेसतिएतद्यत्प्रोक्तं तद्गृहमध्येबाह्यतश्च स्व

स्नानाग्निस्वपिवस्त्रभोजनपशुद्रव्यामरौकस्थितिः पूर्वादौजलमीशितुर्दिशिपरंवायोरपाङ्मूत्रकम् ॥ आल्पेशक्तिभुवोर्यथारुचिपरेगेहस्यदक्षेघर
ट्टांबूलूखलचुल्लिकापितृपदप्रक्षालनान्यूचिरे ॥१८॥ द्वात्रिंशाधिकहस्तमब्धिवदनंतार्णंत्वलिंदादिकंनैष्वायादिकमीरितंतृणगृहंसर्वेषुमास्तूदितं ॥ स्वस्थाने-

तारतम्येनयोज्यं अथशक्तिभुवोःसंकोचेसति कर्तव्यमाह आल्पइतिशक्तिभुवोरल्पेसतियथारुचिकार्यं गेहस्यदक्षेपरेआचार्याघरट्टादिकमूचिरे घरट्टः पिष्टयंत्रं अंबुउ
दकं उलूखलादिकंप्रसिद्धं तथाचोक्तंग्रंथांतरे उलूखलंपिष्टयंत्रमग्निस्थानजलाश्रयं वेश्मनोदक्षिणेपार्श्वेपितृणांपादशौचन मिति १८ अथकेषु केषुगृहेषु आयादिकंभाव्यं
केषुनभाव्यमित्याह द्वात्रिंशेति द्वात्रिंशेभ्यः अधिकाः हस्तायस्मिन्गृहेप्रमाणंतत् द्वात्रिंशाधिकहस्तं अब्धिवदनंचतुर्मुखं तार्णंतृणगृहं अलिंदादिकं अलिंदंपट्टिशा
लेतिलोकेप्रसिद्धं आदिशब्देननिर्व्यूहादिगृहभूषणंगृह्यते एषुआयादिकनइरितनोक्त तथाचवल्लभ आलदानर्व्यूहवानभाद्याश्चतुर्दिशंयेगृहभूषणाय आ
यादिकंतेषुनचिंतनीयंयतोननेवास्तुपरिग्रहेस्युरिति तथाचचिंतामणौ यत्रदैर्घ्यंगृहादीनांद्वात्रिंशाद्धस्ततोधिकं नतत्रचिंतयेद्धीमान्गणनायव्ययादिकमिति तथाच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजमार्तंडे आयव्ययौमासशुद्धिंचिंतयेन्नतृणालये इति तथाचवसिष्ठः एकादशेयवाद्वूर्ध्वंयावद्द्वात्रिंशहस्तकं तावदायादिकंचिंत्यंनदूर्ध्वंनैवचिंतयेदिति अथतृण गृहेविशेषमाह तृणगृहंसर्वेषुमासेषूदितं सर्वमासेषुकर्तव्यमित्यर्थः अथनिष्पन्नेगृहे प्रवेशमाह [illegible] मिति आरंभोदितमासेषु [illegible] शास्त्ररीत्यावेश्मगृहंविशेत् आरं भायउदिताः प्रोक्तास्तेचतेमासाश्चतेषुशास्त्ररीत्यासूत्राद्युक्तविधिना गृहंप्रविशेत् कथंभूतवेश्म छन्नं कुड्यैराच्छादितं पुनः किंलक्षणं बद्धकपाटं बद्धयमधीनंक- पाटंयस्यतत्तथा तद्बद्धयमिति ज्ञापितउद्घाटितेवा तथैवस्थिरं पुनः किंलक्षणं अर्चिततमं तोरणमालाद्यलंकृतं तथाचनारदः अकपाटमनाच्छन्नमदत्तबलिभोजनं गृहंनप्रविशेदेवविपदामाकरंहितत् इति तथाचच्यवनः स्वयमुद्घाटितेरोगोपिहितेचकुलक्षयः मानाधिकोनदिग्भागेद्वारेनीचेस्त्रवक्षयइति अथप्रवेशेमासविशेषमा

छन्नंबद्धकपाटमर्चिततमंवेश्मोक्तरीत्याविशेदारंभोदितमासकनारदमतान्माघोर्जशुक्रेषुच ॥१९॥ प्रारंभोदितभैः प्रवेशउदितोपूर्वस्सपूर्वःस्थि रैर्मैत्रैश्चाच्युतमूलदस्त्रसहितैरारंभभैर्ध्रुवात्मकः॥

ह नारदमतात् माघोर्जशुक्रेषुमासेषुगृहंप्रविशेत् माघः प्र० ऊर्जः कार्तिकः शुक्रोज्येष्ठः एषुगृहंप्रविशे दित्यर्थः आरंभोदितमास्वित्यनेनतृणगृहस्यसर्वमासेषुविहितत्वात्प्रवेशोपिसर्वमासेषुविहितः तथाचनारदः प्रवेशोमध्यमोज्ञेयः सौम्यकार्तिकमासयोः माघफाल्गु नवैशाखज्येष्ठमासेषुशोभनइति तथाचज्योतिःप्रकाशे गृहारंभोदितैर्मासैर्धिष्ण्यैर्वारैर्विशेद्गृहमिति तथाचग्रंथांतरे विशेत्सौम्यायनेहर्म्यंतृणागारंतुसर्वदेति त- थाचव्यवहारसारतत्वे सौम्यायनेश्रावणमार्गपौषेजन्मर्क्षलग्नोपचयोदशांशे वामंगतेऽर्केगृहवास्तुपूजांकृत्वाविशेद्वेश्मभकूटशुद्धमिति १९ इदानीमपूर्वादिप्रवेशाना ह प्रारंभेति प्रारंभोदितभैः गृहप्रारंभोदितैर्नक्षत्रैरपूर्वः प्रवेशःउदितः मुनींद्रैरित्यध्याहारः अत्रप्रारंभोदितभैरित्युपलक्षणं तेनप्रारंभोदिततिथिभादिकंसर्वं- ग्राह्यं अपूर्वोनामनूतनगृहेप्रथमः प्रवेशउच्यते स्थिरैर्मैत्रैश्चनक्षत्रैः सपूर्वः प्रवेशउदितः सपूर्वोनामयात्रावसानेयः क्रियते तथाचज्योतिःप्रकाशे अपूर्वःप्रवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शोगृहारंभधिष्ण्यैर्विधेयः करोमध्यमात्रेतिकेचित् सपूर्वस्थिरामिश्रभरवक्षद्रतीन्पाश्विमूलान्युत्तरां भधिष्ण्यैः वसिष्ठः अपूर्वसंज्ञप्रथमप्रवेशयात्रावसानेचसपूर्व संज्ञं द्वंद्वाह्वयंचाग्निभयादिजातंगृहप्रवेशंत्रिविधंवदंति अथगृहकृत्यविषयेदिनरात्रिविशेषनिर्णयमाह कृत्यंवेश्मभवमिति वेश्मभवंगृहभवंयत्किंचित्कृत्यंतद्दिवैवविहितं नरात्रौ क्वचिद्दिवामुहूर्ताभावेसतिरात्रौप्रवेशोविहितः नान्यत् तथाचवसिष्ठः दिवाप्रवेशः शुभदः सपुत्रपौत्राभिवृद्ध्यैनिशिभास्करे द्वौः बलेनमत्स्यध्वजेवास्रस्यरात्रिंविनासूर्यति येश्वरात्रिमिति अथकलशवास्तुनक्षत्रशुद्धिमाह सूर्यर्क्षादिति सूर्यर्क्षादिभपंचकंनक्षत्रपंचकंतया सूर्यादिभमनुमितानक्षत्राद्दष्टनक्षत्राष्टकंप्रवेशेनसत् नशुभंस्यात् अन्यानिशुभानीत्यर्थात्सिद्धं अत्रपूर्वोक्तानांनक्षत्राणांशुभाशुभत्वंज्ञातव्यं २० अथप्रवेशेलग्नशुद्धिमाह लग्नइति उपचयस्थिरेल ग्नेजन्मर्क्ष

कृत्यंवेश्मभवंदिवैवविहितंरात्रौप्रवेशः क्वचित्सूर्यर्क्षादिभपंचकंमनुमितादष्टप्रवेशेनसत् ॥ २० ॥ लग्नेचोपचयस्थिरेरविसुरैर्केः मारंभवत्संस्थितेः सूर्येवामगतेस्वदिग्वदनभैर्वेश्मप्रवेशः शुभः ॥ रंध्रेषुद्विभवेभ्यआस्तगतः सूर्योयदास्यात्तदापूर्वाद्याननमालयंप्रविशतांस्याद्वामगोसौक्रमात् ॥ २१ ॥

इतिमुहूर्तमार्तंडेवास्तुप्रकरणंसमाप्तं

जन्मलग्नाभ्यां उपचयावहस्थिरेलग्नेवेश्मप्रवेशः शुभः स्यात् कैः रविसुरैः सूर्याद्यैः मारंभवत्संस्थितैः गृहारंभार्थमुक्तनक्षत्रसंस्थितैरित्यर्थः कस्मिन्सति सूर्येवामगतेसति पुनः कैः स्वदिग्वदनभैः यद्दिङ्मुखंगृहंतद्दिङ्मुखैः प्रवेशादितैर्नक्षत्रैरित्यर्थः अथवामसूर्यलक्षणमाह रंध्रइति रंध्रे ८ षु ५ द्वि २ भवे ११ भ्यः लग्नादिअष्टमपंचमद्वितीयैकादशेभ्यः सकाशात् ८ आस्तगत [illegible] गतः सूर्योयदास्यात्तदा पूर्वाद्याननमालयं पूर्वादिमुखंगृहं प्रविशतां मनुष्याणामसौसूर्यः क्रमाद्वामगः स्यात् एतदुक्तंभवति अष्टमात्पंचस्थवर्तमानेर्कः पूर्वाभिमुखगृहंप्रविशतांवामोभवति पंचमात्पंचस्थगतोदक्षिणाभिमुखेगृहेप्रविशतांवामोभवतीत्यर्थः एकादशात्पंचस्थगतः उत्तराभिमुखेगृहेप्रविशतांवामोभवतीत्यर्थः २१ इतिस्वोक्तमुहूर्तमार्तंडटीकायांमार्तंडवल्लभायांवास्तुप्रकरणंसमाप्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथयात्राप्रकरणंव्याख्यायते तत्रादौकस्मिन्कालेयात्राकर्तव्येत्याह वारेइति स्फुदशास्फु शोभनादशाअंतर्दशाविदशोपदशास्फु उपचयावहस्यग्रहस्यवारेगोच राष्टकवर्गादौशुभफलग्रहवारेप्रयाणमिष्टंशुभंजगुराचार्याः केषुकर्णात्यादितिभाहिकेषु कर्णःश्रवणः अंत्यंरेवती अदितिभंपुनर्वसुः एषांहिकाः श्रवणधनिष्ठे रेवत्यश्विनी पुनर्वसुपुष्यौ एष्वित्यर्थः पुनः केषु मृगमैत्रार्केषु मृगःप्रसिद्धः मैत्रअनुराधा [illegible] अर्काहस्तः तेषु एषुनवनक्षत्रेषु प्रयाणंशुभमित्यर्थः तत्रविशेषमाह नोजन्मभइति जन्मभेजन्मनक्षत्रेश्रवणाद्यन्यतमेपियानंशुभंनोजगुः अथयेषुअशुभंतान्याह सार्पेति सार्पमाश्लेषा आर्द्राप्रसिद्धा अग्निःकृत्तिका यमोभरणी अजैकपात्पूर्वाभाद्रपदा पितरोमघा तेषुत्वाष्ट्रत्रयेचित्रात्रयेच एषुनवनक्षत्रेषुयानमशुभंजगुः अन्यानिनवनक्षत्राणिमध्यमानीत्यर्थतःसिद्धं अथयासुतिथिषुअशुभं

वारेचोपचयावहस्यसुदशास्विष्टंप्रयाणंजगुःकर्णांत्यादितिभाहिकेषुमृगमैत्रार्केषुनोजन्मभे ॥ सार्पार्द्राग्नियमाजपादपितृषुत्वाष्ट्रत्रयेचाशुभंरिक्तापर्वगुहाष्टमीहरिसितास्येषुज्ञशुक्रौन्मुखं ॥ १ ॥ प्राक्चंद्रासितशक्रभंवसुपरार्धात्पंचभेज्यानपाक्पश्चात्कार्कसितानुदक्कुजबुधार्यम्णस्त्यजेच्छूलकान् ॥

तदाह रिक्तेति रिक्ताः चतुर्थीनवमीचतुर्दश्यः पर्वणी पूर्णिमाःमावास्ये गुहःषष्ठी अष्टमीप्र॰ हरिर्द्वादशी सितास्यंशुक्लप्रतिपत्तेषुप्रयाणंयानमशुभंजगुः अर्थादन्यासुतिथिषुशुभं अन्यद्दुष्टमाह ज्ञेति ज्ञोबुधः शुक्रःप्रसिद्धः तयोरुन्मुखंसन्मुखयानं उक्तेष्वपितिथिनक्षत्रादिषु अशुभंजगुः बुधशुक्रसन्मुखंगमनंनकर्तव्यमित्यर्थः १ अथशूलानाह प्रागिति प्राक्पूर्वस्यांदिशिचंद्रासितशक्रभंत्यजेत् चंद्रःसोमवारः असितःशनिवारः शक्रभंज्येष्ठा एतत्त्रयंपूर्वदिशित्यजेदित्यर्थः अपाग्दक्षिणस्यां वसुपरार्धात् धनिष्ठोत्तरार्धात् पंचनक्षत्राणि ईज्योबृहस्पतिवारः एतान्दक्षिणस्यांत्यजेत् पश्चात्पश्चिमायांदिशि कार्कसितान् त्यजेत् कःरोहिणी अर्कोरविः सितःशुक्रः एतान्पश्चिमायांत्यजेदित्यर्थः [illegible] उत्तरस्यांदिशिकुजबुधार्यम्णस्त्यजेत् कुजोभौमवारः बुधःप्र॰ अर्यम्णानामोत्तराफा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...मिति एतान्प्रत्येकपदगतान् ... इति ... सकाशात् भद-
ल्गुनी एतान्शूलकान्उत्तरस्यांत्यजेत् शूलपदस्यप्रत्येकसंबंधः अथयामिनीमाह त्रिंशाष्टाविति एतान्प्रत्येकपदगतान्नयान् इशा... शान्याः सकाशात् भद-
क्षिणक्रमेणजह्यस्त्यजेसुः एतान्तिथींस्त्यजेत् एतेके त्रिंशा ३० अष्टौ ८ ईशान्यां नव ९ भूमयः १ प्राच्यां अग्नि ३ गिरिशाः ११ आग्नेय्यां विश्वे १३ इषवः ५ दक्षिणस्यां अर्का १२
ब्धयः ४ नैर्ऋत्यां षट् ६ शक्राः १४ पश्चिमायां तिथि १५ पर्वताः ७ वायव्यां दश १० दृशो २ उत्तरस्यांत्यजेत् अत्रांकन्यासएवव्याख्यानं २ अथान्यन्निंद्यमाह ऐन्द्येति
ऐन्द्यादिषुदिक्षु अग्निभात् कृत्तिकायाःसकाशात् सप्तभगणंभवेत् एतदुक्तंभवति सप्तशलाकाचक्रंनिष्पाद्य पूर्वगतसप्तरेखासुईशानतः कृत्तिकादीनिसप्तनक्षत्रा
णिन्यसेत् तत्पुरस्थानिसप्तदक्षिणरेखासुन्यसेत् एवंपश्चिमोत्तररेखासुक्रमेणन्यसेत् ततोवायव्याग्नेयदिग्गतांरेखांकुर्यात् अस्यारेखायाःपरिघइतिसंज्ञा एवंनिष्पादि

त्रिंशाष्टौनवभूमयोऽग्निगिरिशाविश्वेषवोऽर्काब्धयः षट्शक्रास्तिथिपर्वतादशदृशोप्येतांस्तिथीनीशतः ॥ २ ॥ ऐंद्र्याद्यग्निभसप्तसप्तभगणे-
वाय्वग्निकाष्ठास्थितोनोल्लंघ्यः परिघस्त्वपाग्वरुणभैः प्राच्यैरुदङ्गोव्रजेत् ॥ सर्वाशासुरवीज्यमित्रतुरगैर्यायादथावश्यकेहित्वाशूलमनिष्टभैर्यदि
निजाशेष्टांगलब्धिर्व्रजेत् ॥ ३ ॥ तेचक्रप्रयोजनमाह वाय्वग्निकाष्ठास्थितइति वायुः प्रसिद्धः अग्निःप्र० अनयोः काष्ठेदिशौवायव्याग्नेय्यौ तत्रस्थितः परिघोनो

ल्लंघ्यः अथान्यत्प्रयोजनमाह अपागिति अपाग्दक्षिणस्यांवरुणभैःप्रतीच्यैर्नक्षत्रैः व्रजेत् प्राच्यैर्नक्षत्रैःउदगुत्तरस्यांदिशिनव्रजेत्नगच्छेत् तत्तद्दिक्स्थापितनक्षत्रैस्त
त्तद्दिग्गमनंसिद्धमेव सर्वासुसर्वदिक्षुरवीज्यमित्रतुरगैर्यायात् रविर्हस्तः ईज्यः पुष्यः मित्रमनुराधा तुरगोऽश्विनी एभिर्नक्षत्रैः सर्वासुदिक्षुगमनंशुभमित्यर्थः अथाव
श्यकेकृत्येअस्यापवादमाह अथावश्यकेइति अवश्यकेकृत्येसतिनिंद्यैः अनिष्टभैः यद्दिक्... तः पूर्वोक्त... ... स्यांदिशितदाव्रजेत् तदाकदा यदा
निजाशेष्टांगलब्धिर्भवेत् निजाशायांनिजगमनदिशायांइष्टांगलब्धिः इष्टलग्नलाभःस्यात् इष्टलग्नंवक्ष्यमाणलक्षणं तद्यथोक्तंगुणसंपन्नंयदास्यात्तदागच्छेदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सार्थः नोचेन्नेत्यर्थात्सिद्धं किंकृत्वा शूलभांहित्वा पूर्वोक्तशूलनक्षत्रंत्यक्त्वा शूलनक्षत्रेसतिनिजाशेष्टां गलब्ध्वापि नगच्छेदित्यर्थः ३ अथान्यदाह मिश्राख्यैरिति दिनादि
मलवे त्रिधाविभक्तस्यदिनस्याद्यंशे मिश्राख्यैः साधारणैर्नक्षत्रैः ध्रुवभैश्चनेयात् नगच्छे[illegible]तीक्ष्णैः [illegible]क्षिप्रैर्नक्षत्रैर्नेयात् अथरात्रित्रि
भागेषु क्रमशोमृदूग्रचरभैर्नेयात् रात्रेः प्रथमेभागेमृदुभिः द्वितीयेभागेउग्रैः तृतीयेभागेचरभैर्नेयात् अथविशेषमाह श्रुतीति श्रुत्यर्केज्यमृगेषु अयंनियमोन
श्रुतिः श्रवणः अर्कोहस्तः ईज्यः पुष्यः मृगः प्रसिद्धः एभिर्नक्षत्रैः सर्वभागेषु गंतव्यमितिभावः अथाभिजिल्लक्षणंतत्फलंचाह वैश्वेति वैश्वस्युत्तराषाढातस्यांत्यपा
दश्चतुर्थचरणः श्रवणस्यआद्यस्तिथ्यंशः प्रथमः पंचदशांशः एतत्प्रमाणोऽभिजित्स्यात् सोऽभिजिद्यामींदक्षिणांदिशंविनासर्वदिक्षुफलदः क्षणोमुहूर्तोपि आभिजि

मिश्राख्यध्रुवभैर्दिनादिमलवेतीक्ष्णैर्द्वितीयेंऽतिमेक्षिप्रैर्नक्रमशोमृदूग्रचरभैरात्रित्रिभागेष्वियात्॥श्रुत्यर्केज्यमृगेष्वयंननियमोवैश्वांत्यपादश्च
वस्तिथ्यंशस्त्वभिजिद्गमेसफलदोयामींविनाप्यक्षणः॥४॥एकार्केद्वयनानुकूलमनिशंभेदेदिवारात्र्योर्भौमेप्राक्कुशानिचंद्रयोर्गलमपाक्पश्चाद्गुरु
वोर्हितं॥

द्यामींविनाफलदः यातॄणामभीष्टफलदोभवतीत्यर्थः ४ अथान्यदाह एकार्केद्वयनानुकूलमिति अर्कश्चइंदुश्चतयोरयनंअर्केद्वयनं एकंचतत्अर्केंद्वय
नंचतत्तया तस्यानुकूलंगतंगमनंअनिशंअहर्निशंहितंस्यात् भेदेसतिदिवारात्र्योः क्रमेणशस्तंस्यात् अयमर्थः सूर्योदिनस्वामी चंद्रोरात्रिस्वामी द्वौचेदुत्तरायणेस्थि
तौतदाऽहर्निशमुदग्गमनंशस्तं द्वौचेद्दक्षिणायनेभवतस्तदाऽहर्निशंदक्षिणगमनंशस्तंस्यात् रवौचंद्रायनदिशंप्रतिगमनंशस्तंस्यात् अर्थादन्यथानशस्तंस्यात् अत्र
प्राचीउत्तरसंबंधिनीज्ञेया तस्माद्यदाउदग्गमनंशस्तंतदाप्राग्गमनमपिशस्तंभवति तथाप्रतीचीदक्षिणसंबंधिनीज्ञेया तेनयदादक्षिणदिग्गमनंशस्तंतदाप्रतीचीदिग्गम
नमपिशस्तंस्यात् तथाचरत्नकोशे दिनकरकरप्रतप्तामकरादाव[illegible] [illegible]तौयाम्यामाशांप्रतीचींच अथान[illegible] [illegible]पूर्वदिशिगतंगमनंहितं
[illegible] पाश्चात्पश्चिमायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...सन् द्विसम द्वौवासमवा

भृगवर्कान्हिशक्रकरविदिने उदक्उन्तरस्यांगतंहितंस्यात् अथाडलंविडलचाह अर्कभादिति सूर्यनक्षत्राद्युमंदिननक्षत्र... ५ अथवार शूलदो
यदाभवंति तदाडलः स्यात् व्यंगाभ्यां भिषट्संख्याकाभ्यांविडलः स्यात् अनयोरडलविडलयोः गमनंश्रीदेवलोक्त्यादेवलर्षिवचनेननहितंनस्यात् ५ अथवार शूलदो
यदाभवंति तदाडलः स्यात् ... अनयोरडलविडलयोः ... अथदिग्दोषापवादमाह आ
धापवादमाह आज्यंदुग्धेति मगमं इनात्सूर्यवारात्सकाशात् आज्यादीनिप्राश्य प्राशयित्वा शूलेवारशूलेयानंप्रयाणं अनर्थरुन्नो भवति एतदुक्तंभवति घृतंप्राश्य हस्ति
ज्यमिति घृतादिकंप्राश्य ऐन्द्यादिषुपूर्वादिषुहस्त्यादिभिर्यानंस्रयानंभवति हस्तीप्रसिद्धः अनः शकटः हयोःश्वः नरःशिविकावाहकः एतदुक्तंभवति घृतंप्राश्य हस्ति
ज्यमिति ... दुग्धंप्राश्यनरेरुदग्गमनासिद्धिः स्यादित्यर्थः
नाग्राग्गमनासिद्धिः तिलान्नंतिलोदनंप्राश्यरथेनदक्षिणगमनासिद्धिः मत्स्यान्प्राश्य अश्वेनपश्चिमगमनासिद्धिः दुग्धंप्राश्यनरेरुदग्गमनासिद्धिः स्यादित्यर्थः

भृगवर्काद्धत गर्कभाद्यभमगैस्तष्टंद्विसमाडलस्त्र्यंगाभ्यांविडलोनयोर्नगमनंश्रीदेवलोक्त्याहितं ॥५॥ आज्यंदुग्धगुडौतिलान्दधियवान्मा
षानिनात्प्राश्यनोशूलेयानमनिष्टंमिंद्रककुभोःथाज्यंतिलान्नंतिमीन् ॥ दुग्धंप्राश्यचहस्त्यनोहयनरैर्यानंस्रयानंतयोर्ध्यानाद्वाभवतिध्रुवे
ऽथहरिजंतिथ्यादिलक्षाधिकं ॥६॥ स्वर्क्षानर्द्धिघटास्तभान्नृजुगृहान्षष्ठंरिपोर्भादनुस्वर्क्षांगेशरिपुरंवलंजनिबलत्यक्तंतथासांमतं ॥ असतिसं

भवेअप्रसंगेचनिर्णयमाह तयोर्नरस्वाहनयोर्ध्यानाद्वायानंस्रयानंभवति अथलग्नशुद्धिंसहेतुकामाह ध्रुवेऽथहरिजमिति अथहरिजंलग्नं ध्रुवेवचिम कथंभूतं नि
थ्यादिलक्षाधिकं तिथ्यादिभ्योलक्षाधिकंबलिष्ठमित्यर्थः ६ स्वर्क्षेति स्वर्क्षानर्द्धि... यात्रालग्नगतंत्यजेत् स्वर्क्षस्वराशिः अनर्द्धिः स्वराशेः अनुपचयभवनं
जन्मराशिजन्मलग्नाभ्यामपचयमित्यर्थः अपचयंजन्मराशिजन्मलग्नाभ्यांत्रिषडेकादशदशमभ्यान्यत् घटः कुम्भः अस्तंभअस्तगतग्रहस्यराशिः अनृजुगृहंवक्र
गतगृहस्यराशिः एतान्रिपोर्भात् वैरिराशेः षष्ठं अनुपृष्ठोदयं तथाचबृहज्जातके गोजाश्विकर्किमिथुनाः समृगानिशाख्याःपृष्ठोदयाविमिथुनाः कथितास्तएवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नि वृषमेषधनकर्कमकराः पृष्ठोदयाः स्वर्क्षोगेशरिपुं कस्यंचअंगंनक्षोणि स्वस्यक्षसांगंनस्येशःस्वामी तस्यरिपुः तं खलुः प्रसिद्धः जनिबलत्यक्तं जन्मनि बलहीनंगृहं तयासांप्रतंप्रस्तृतंबलत्यक्तं इत्युक्तंसर्वथाभालग्नगतंत्यजेत् अथदिग्गतप्रयाणविषये [illegible] दिग्स्वामिनः अर्कशुक्रादयःपाठक्रमात्स्युः केंद्रेदिगीशो १।४।७।१० सन्निव्रजेत्नगच्छेत् यस्मिन्केंद्रेललाटगतंभवति तत्केंद्रंवर्जयित्वाअन्यकेंद्रेदिगीशोसतिव्रजेत् इदमग्रिमश्लोकेवक्ष्यति ७ अथदिक्पतेर्ललाटगत्वंतद्दिग्गमननिषिद्धं ललाटलक्षणंचाह दिगिति दिक्पेललाटगेसतितन्प्रवसेत् प्रवासंनकुर्यात् तत्रोलग्नेवर्तमानइनः सूर्यः प्राक् प्राच्यांदिशि

याम्यालग्नगतंत्यजेदथदिशामीशोर्कशुक्रोकुजोराहुर्मंदशशांकसौम्यगुरवः केंद्रेदिगीशोव्रजेत् ॥ ७ ॥ दिक्पेनप्रवसेल्ललाटगइनःप्राच्यांतनौ भालगः स्यात्पश्चात्मदने ७ र्कजोंबुग ४ बुधःसौम्यांखगोपाकुजः ॥ ऐन्द्र्यांहि २ त्रिगतोगुरुर्ज्वलनदिश्याय ११ व्ययस्थोभृगुर्यापेषद् ६ सुत ५ गोविधुर्निर्ऋतिदिश्यष्टांकसंस्थंतमः ॥ ८ ॥ वक्रीकेंद्रगतस्तदीयदिवसोलग्नेःस्ववर्गोभवेद्यातुर्नाशकरःशुभोपितनुगोजन्मर्क्षलग्नेद्विषुः ॥

भालगः ललाटस्थितःस्यात् मदनेसप्तमेवर्तमानोःर्कजः शनिः पश्चिमस्यांललाटस्थितःस्यात् अंबुगबुधश्चतुर्थगतोबुधः सौम्यामुत्तरस्यांललाटस्थितःस्यात् खंदशमंगतः कुजोभौमः अपागदक्षिणस्यांललाटस्थितःस्यात् द्वित्रिगतोगुरुःऐन्द्र्यामीशान्यांललाटस्थितःस्यात् आयव्ययस्थोभृगुः कविः ज्वलनदिशिआग्नेय्यांललाटस्थितः-स्यात् षट्सुतगोविधुश्चंद्रः वायोवायव्यांललाटस्थितःस्यात् अष्टांकसंस्थंतमः अष्टमनवमस्थानस्थेराहुः निर्ऋतिदिशिललाटसंस्थःस्यात् इति ८ वक्रीति वक्रोग्रहः केंद्रगतःसन् यातुर्गमनकर्तुर्नाशकरःस्यात् तदीयदिवसोःपिवक्रग्रहस्यदिवसोपियातुर्नाशकरःस्यात् लग्नेस्ववर्गोपिनाशकरःस्यात् जन्मर्क्षलग्नेद्विषुःशुभोपि तनुगोयातुर्नाशकरःस्यात् जन्मराशिजन्मलग्नेतयोःईशौतयोःरिपु ५ ५ १० ५ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथसूर्यादीनां जन्मनक्षत्राण्याह द्वीशेति अर्कतः सूर्यतः ग्रहाणां द्वीशादीनि जन्मर्क्षाणि जन्मनक्षत्राणि स्युः द्वीशं विशाखा सूर्यस्य अग्निः कृत्तिका चंद्रस्य अंबु पूर्वाषाढा-
भौमस्य अजः श्रवणो बुधस्य भाग्यभं पूर्वाफल्गुनी गुरोः गुरुः पुष्यः शुक्रस्य पौष्णं रेवती शनेः याम्यं भरणी राहोः सार्पमाश्लेषा केतोः उपप्लवगतो नाम यदीयभं यस्य ग्र-
हस्य भं जन्मनक्षत्रं हतं त्रिविधोत्पातहतं स्यात् स ग्रहो लग्ने स्थितो हानिकृत् स्यात् ९ वेशिरिति सूर्यद्वितीयो राशिर्वेशिः स सौम्ययुतः सन् अंगगोलग्नगः निशोभनः स्या-
त् जनुषि जन्मकाले सद्भिर्ग्रहैर्युता ये राशयस्तनुगता अतिशोभनाः स्युः जन्मा ओपचयस्थिताः जन्माद्योजन्मचंद्रः तस्मादुपचयानि त्रिषडेकादशदशमानि तेषु स्थिता ग्रहा
स्ते तनुगता अतिशोभनाः तनोरपि जन्मलग्नादप्युपचयस्थलग्नगता अतिशोभनाः स्युः स्वर्क्षोच्चमित्रर्क्षगाः जन्मनि ये स्वर्क्षगाः उच्चगाः मित्रर्क्षगास्ते पापा अपि तनुगता अति

द्वीशाग्न्यंबुज भाग्य भानि गुरुभं पौष्णांतके सार्पभं जन्मर्क्षाणि रवेरुपप्लवगतः खेटस्तनौ हानिकृत् ॥ ९ ॥ वेशिः सौम्ययुतस्तनौ जनुषि येसद्भिर्युताराश-
शयो जन्माद्योपचयस्थिता अपि तनोः स्वर्क्षोच्चमित्रर्क्षगाः ॥ पापा अप्यतिशोभनास्तनुगता जन्मेश्वरौ केंद्रगौ स्वारात्यन्हितनौ शुभो नफलदो मित्रा-
न्हिपापोऽर्थदः ॥ १० ॥ स्वायार्यन्यग[illegible]ाः खलाः खइनजो ज्ञोंऽत्याद्यषष्ठाष्टगो भूयः सोपचितो स्तखांबुस्मरगः शुक्रोस्तईज्यो मृतो ॥ शोभनाः स्युः जन्मे-
श्वरौ जन्मराशिजन्मलग्नस्वामिनौ केंद्रगौ अतिशोभनौ स्यातां स्वारात्यन्हि स्ववैरिवारे शुभः शुभग्रहः तनौ लग्ने वर्तमानो नफलदो भवति मित्रान्हिपापः तनौ वर्तमानोऽर्थदः
स्यात् तथाच्यवनः रक्षका वर्धकाश्चैव ये स्युर्जन्मनि नायकाः तान्पापानपि निःशंकोयाय[illegible] इत्यादि ९ [illegible]नेइष्टानिष्टांश्च श्लोकेनैकेनाह स्वाया
इति स्वायार्यन्यगताः खलाः स्वा ३ या ११ रिपु ६ अन्यानि १।२।४।५।७।८।९।१०।१२ तत्रगताः खलाः पापग्रहाः खेदशमेइनजः शनिः स्वायार्यन्यगताः खलाइत्यनेनैव सिद्धेपि
विशेषदुष्टफलज्ञापनार्थं खइनजइत्युक्तं अंत्या १२ द्या १ षष्ठा ६ ष्ट ८ गो ज्ञश्चंद्रः भूयः पुनः सचंद्रः अपचितः क्षीणचंद्रः कृष्णपक्षचंद्रः अस्तं ७ खां १० बु ४ स्मर ५ गः अस्ते ७ शुक्रः
ईज्योगुरुर्मृतेऽ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु॰ मा॰
५६

टी॰

नष्टज्ञोः स्वमितज्ञो व्यय १२ गतः ग्रहान्वितः शशी येनकेनापिग्रहेणग्रहाभ्यांग्रहैर्वायुक्तश्चंद्रमाः एतेप्रत्येकंयातुर्महाविघ्नदाः स्युः नानाप्रकारेणमरणभंगादीन्ददतीत्यर्थः अन्य-
स्थानगताः उक्तेभ्योऽन्यस्थानगताः संतस्तदा जयार्थसुखदाः स्युः तदाकदाचेद्यदिपुरोक्तं [illegible] ंनस्यात् ११ अथप्रतिबुधशुक्रापवादमाह स्वग्रामइति स्वग्रामः प्रसि-
द्धः एकपुरं प्र॰ आत्मसद्म आत्मगृहं चतुर्मुखेचतुर्वक्त्रेचतुःशालकंप्रसिद्धं उद्वाहाः [illegible] ह्म्यादयः विवाहः तत्रवधूप्रवेशः नृपभीराजभयं दुर्भिक्षपीडाप्रसि-
द्धा तासु तीर्थस्वामिनिदेशयोः तीर्थेतीर्थगमनं स्वामिनिदेशः स्वाम्याज्ञातयोः भृगुवसिष्ठात्र्यंगिरः काश्यपेभृग्वादिगोत्रसमूहे भारद्वाजजवात्स्ययोर्गोत्रयोः [illegible]भूत्वेषु
सितज्ञोन्मुखं शुक्रबुधसन्मुखंयानंगमनंहितंस्यात् अत्रवधूप्रवेशेप्रतिशुक्रदोषोनोक्तः तत्तुभर्त्रासहगमनविषयं भर्त्राविनागमनेदोषोदृश्यते नवोढायास्तुवंध्यात्वमिति

नष्टज्ञोव्ययगोग्रहान्वितशशीयातुर्महाविघ्नदा अन्यस्थानगताजयार्थसुखदास्त्याज्यंपुरोक्तंनचेत् ॥११॥ स्वग्रामैकपुरात्मसद्मसुचतुर्वक्त्रेचतुःशा
लकेतूद्वाहेषुवधूप्रवेशनृपभीदुर्भिक्षपीडासुच ॥ तीर्थस्वामिनिदेशयोर्भृगुवसिष्ठात्र्यंगिरःकाश्यपेभारद्वाजजवात्स्ययोर्हितकरंयानंसितज्ञोन्मु
खं ॥१२॥ चंद्रेपूषभमेषगेसति सितोऽधःस्यात्तदासन्मुखंयानंसत्परपूर्वयोःसितविपर्यासात्तदावश्यकं ॥ तथाचभीमपराक्रमे स्वामिनानीयमानायांप्र

तिशुक्रोनविद्यतइति तथाचमतांतरे नवोढायास्तुवंध्यात्वंयदुक्तंसन्मुखेभृगौ तदत्रविबुधैर्ज्ञेयंकेवलंतुद्विरागमइति तथाचलल्लः स्वभवनपुरप्रवेशेदेशानांविग्रहेत
थोद्वाहे नववध्वागृहगमनेप्रतिशुक्रविचारणानास्तिइति तथाचमत्स्यपुराणे चतुःशालंचतुर्द्वारंभिलिंदैः सर्वतोयुतं नाम्नातत्सर्वतोभद्रंनतत्रप्रतिशुक्रतेति तथाच
वसिष्ठः काश्यपेषुवसिष्ठेषुभृग्वत्र्यंगिरसेषुच भारद्वाजेषुवात्स्येषुप्रतिशुक्रोनविद्यतइति १२ अथान्यंचापवादमाह चंद्रइति चंद्रेपूषभमेषगेसति पूषभंरेवती मेषो
मेषराशिः तत्रचंद्रेगतेसति सितः शुक्रः अंधः स्यात् तदासंमुखंयानंशुक्रसंमुखंगमनंसतत्शुभंस्यात् तथाचगर्गः पौष्णादिवन्हिभाद्यंघ्रीयावत्तिष्ठतिचंद्रमाः तावदंधो

५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवेच्छुक्रः प्रवेशेनिर्गमेशुभइति अथावश्यकप्रवृत्तिमाह परपूर्वयोरिति परपूर्वयोः पश्चिमपूर्वयोः सितविपर्यासात् शुक्रविपर्यासात् आवश्यककृत्येसतियानंसत्स्या न् ए
तदुक्तंभवति शुक्रेपूर्वकपालगेसतिपश्चिमांगच्छेत् पश्चिमकपालगेसतिपूर्वांगच्छेत् तथाचज्योतिःप्रकाशे अन्यत्स्वकेषुयावत्प्राक्कपालस्थोभृगुर्भवेत् तावत्प्राशिदिशंग-
च्छेत्प्राचींप्रत्यकृस्थितस्तथेति अथप्रयाणविधिमाह राजेति राजात्रिदिवसैरेकाब्धिषट्क्रोशकान्व्रजेत् एतदुक्तंभवति प्रथमेदिनेक्रोशंगच्छेत् द्वितीयदिनेचतुःक्रोशा
न् तृतीयेषट्क्रोशान् अर्थात्परतोयथेष्टंगच्छेत् कथंभूतःराजा तर्पितवन्हिभूसुरसुहृत् वन्हिरग्निः भूसुराः ब्राह्मणाः सुहृदोबांधवाः तेतर्पिताः वन्हिभूसुरसुहृदो
येनसतथा अत्रायंभावः समित्चरुतिलादिनावन्हिंतर्पयित्वा दक्षिणान्नादिनाभूसुरांस्तर्पयित्वा वस्त्रालंकरणादिभिःसुहृदःकलत्रादींस्तर्पयित्वाव्रजेदिति किंकुर्वन्स्ने
हानुवृत्तिंत्यजन्सन् स्नेहेनअनुवृत्तिंपुनःगृहागमनं अयंभावः यात्रार्थंबहिर्गत्वा पुत्रादिस्नेहवशात् तदवलोकनार्थंगृहंनागच्छेदिति कथंभूतोराजा त्वमः बुभुक्षितोनग

राजातर्पितवन्हिभूसुरसुहृत्स्नेहानुवृत्तिंत्यजन्तृप्तः कार्यमनाव्रजेत्त्रिदिवसैरेकाब्धिषट्क्रोशकान् ॥१३॥

च्छेदितिभावः पुनःकिंलक्षणः कार्यमनाः कार्यायउत्कंठितांतःकरणः तथाचरत्नमालायां स्वनिकेतात्सुरभवनात्प्रधानादाश्रमाद्गुरुगृहाद्वापि यायात्कृताग्निकार्यः प्राश्य
हविष्यंद्विजानुमतमिति तथाचबृहस्पतिः दैवज्ञंपूजयित्वातुविदुषःपूज्यशक्तितः प्रदक्षिणामिमांकृत्वातिष्ठन्ध्यायेदुमापतिमिति तथाचज्योतिःप्रकाशे संतोष्यस्वांग
नांविप्रान्जह्यात्प्रतिरथादिकं शुचिःशुक्लांबरोष्णीषोनत्वेष्टंसुमनाव्रजेदिति अथ [illegible] यात्रासमये [illegible] स्यवैषम्ये गोभूहिरण्यवस्त्रैः संपूज्यप्र-
दूयाचदैवज्ञमिति बृहद्यात्रायां स्नातोभुक्तोनुलिप्तश्चसर्वालंकारभूषितः शुक्लांबरधरःश्रीमानध्वगःसुखमेधतइति भूपालवल्लभे ब्राह्मणान्नावमन्येतकोपयेन्न
निजांगनां यात्रांकृत्वागृहंनैवसिद्धिकामोविशेद्बुधमिति लल्लः यात्रायांप्रस्थितोयश्चब्राह्मणानवमन्यते तदंतंजीवितंतस्यनासौप्रतिनिवर्ततइति बृहद्यात्रायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु·मा·
५७

यस्तु संप्रस्थितो यात्रां स्वभार्यां नाभिनंदति भार्या वा नाभिनंदेत नास्य मनिनिवर्तनमिति तथा च रत्नावल्यां क्रोशं वा यदि वाप्यर्धं प्रथमेहनि शस्यते द्वितीये योजनं गत्वा निवसेत महीपतिः
तृतीये योजनं सार्धं वसेदा कल्पदूरतः ततः परं यथेष्टं तु यायान्मार्गं महीश्वर इति १३ अथ या[illegible]निर्णयमाह क्रोधेति क्रोधः प्रसिद्धः क्षौरं प्र० रतिर्मैथुनं श्रमः क्लेशः आमि
षं मांसं गुडः प्र० द्यूतं द्यूतरमणं अश्रु अश्रुमोचनं दुग्धं प्र० आसवा मद्यं क्षारः क्षारधा[illegible]वादि अभ्यंगस्तैलाभ्यंगः भयशोकारिपु भयमित्यर्थः असितांबराणि [illegible]
वस्त्राणि रक्तकृष्णादीनि वमिर्वमनं तैलं प्र० कटु मरीचादि इत्येतद्गमेगमने उद्दिष्टे त्यजेत् अथोक्तेषु किं कियद्दिनं त्यजेदित्याह क्षीरेति क्षीरं क्षौरं रतीः क्रमात् त्रिश
रसप्ताहं त्यजेत् क्षीरं दुग्धं त्र्यहं क्षौरं शराहं पंचाहं रतिं सप्ताहं त्यजेदित्यर्थः परे उर्वरितं तद्दिने प्रयाणदिने त्यजेत् रोगव्याधिं यावद्बाधं त्यजेत् स्त्र्यानवं बीजदानपर्व

क्रोधक्षौररतिश्रमामिषगुडद्यूताश्रुदुग्धासवक्षाराभ्यंगभयाः सितांबरवमिस्तैलं कटूद्धे गमे ॥ क्षीरक्षौररतीः क्रमात्त्रिशरसप्ताहं परं तद्दिने रोगं
स्त्र्यानवकं सितान्यतिलकं प्रस्थानकेपीति च ॥१४॥ त्यजेत् सितान्यतिलकं श्वेतव्यतिरिक्तं तिलकं पीतकौंकुमादिकं तद्दिने त्यजेत् प्रस्थानकेपार्श्वेनत्यजेत्

प्रस्थानकं नाम मुहूर्तसमये किंचिदभीष्टवस्तुचालनं तदुक्तं रत्नमालायां छत्रायुधाद्यं मनसस्त्वभीष्टं प्रचालयेद्वैजयिकं जयार्थीति एतत्तु कार्यवशात्क्रियते प्रस्थाने संपू
र्णफलं नास्ति तथा च रत्नकोशे कार्यवशात्स्वयमगमे भूभर्तुः केचिदाचार्याः छत्रायुधाद्यभीष्टं वैजयिकं निर्गमे कुर्युरिति तथा च गर्गः स्वशरीरेण यः कश्चिन्निर्गंतुं न प्र
भूयान्वितः तस्य यात्राफलं सर्वं संपूर्णं पथि सिद्ध्यतीति तच्चालनविधिर्ग्रंथांतरात् गृहाद्गृहांतरं गर्ग आह सीमांतरं भृगुः शरक्षेपाद्भरद्वाजो वसिष्ठो नगराद्बहिरिति एवं
प्रस्थाने कृतेपि स्वयमन्यस्मिन्दिने गच्छेत् तथा च ज्योतिःप्रकाशे प्रस्थानेपि कृते नेयान्महादोषान्विते दिने गर्भयोगं विना कालहष्यादौ चाप्युत्तेत थेति रत्नमालायां
वसेन्नचैकत्र दशाक्षितीशो दिनानि नो सप्त च मंडलीकः यः प्राकृतः सोधिकपंचरात्रं भद्रेण यात्रापरतः प्रयोज्येति एवं[illegible]प्रस्थानेपि[illegible]क्षौररत्यादीन् वर्जयेदित्यर्थः

टी·
५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गर्गः क्रोधंक्षौरंतथावांतिंतैलाभ्यंगाश्रुमोक्षणं द्यूतंमांसंगुडंतैलयानमद्यपरंत्यजेदिति रत्नकोशे कालीयकंहिंगुलकः कुंकुमंरक्तचंदनं पीतरक्तंचवसनंयात्रानुर्नेष्टानित्यजेदिति बृहद्यात्रायां कटुतैलगुडक्षारपक्वमांसाशनंनतया भुक्त्वायोयातिमोहेनव्याधितःसनिवर्ततइति लल्लः ममत्तोव्याधितोभीतःशांतःक्रुद्धोबुभुक्षितः अध्यानंनप्रपद्येतक्लीबवेषस्तथैवच रत्नावल्यां स्वकीयांपरकीयांवास्त्रियंपुरुषमेववा ताडयित्वातुयोगच्छेन्नदंतंनस्यजीवितमिति भृगुः त्रिरात्रंवर्जयेत्क्षीरंपंचाहं क्षौरकर्मच नदहश्चावशेषाणिसप्ताहंमैथुनंत्यजेदिति यात्रायांगमनलक्षणंगर्गोक्तंज्ञेयं मुहूर्तसमयेप्राप्तेहंसचारांघ्रिणाव्रजेत् दैवज्ञामात्यविप्राद्यपुरोगैःस्वजनैर्वृतः पूर्वंदक्षिणमुद्धृत्यपादंयात्रांनराधिपः द्वात्रिंशतपदंगत्वायानमारुह्यसंव्रजेत् ततोनिरीक्षयेत्सम्यक्शकुनांश्चशुभाशुभान् तथैवसदसच्छब्दान्निमित्तानिचसंव्रजेत्

वस्त्रालंकरणानिपूर्णकलशस्तौर्यध्वनिःपुत्रवान्शंखदर्शनृपाश्वदंतिसुरभिस्त्रीपुष्पधान्यादिच ॥ दोला
दीपविधूमवह्निसुरभिद्रव्याणिशुभ्रोवृषोवेश्याच्छत्रवितानचामरकुमारीमीनगोरोचने ॥ १५ ॥ ॥

दिति १४ इदानींशकुनानाह वस्त्रेति वस्त्राणिश्वेतवस्त्राणि अन्यान्यपशकुनमध्येपठितानि अलंकरणानि सुवर्णादिनिर्मितानिभूषणानीत्यर्थः पूर्णकलशः प्रसिद्धः तौर्यध्वनिः वाद्यध्वनिः पुत्रवान् वर्धमानःपुरुषः शंखः प्रसिद्धः आदर्शोमुकुरः नृपोराजा अश्वः प्रसिद्धः दंतीहस्ती सुरभिर्गौः स्त्रीसौभाग्यवती पुष्पाणि श्वेतानि धान्यानि अकृष्णानि कृष्णानित्वपशकुनमध्येपठितानि आदि[illegible]सुवर्णादिधातवः दोला प्रसिद्धा दीपः प्रसिद्धः विधूमवह्निः धूमरहितोवह्निः सुरभिद्रव्याणि सुगंधद्रव्याणि कर्पूरचंदनादीनि शुभ्रोवृषः श्वेतवृषः वेश्याप्रसिद्धा छत्रप्रसिद्धं वितानवस्त्रनिर्मितं चामरंप्रसिद्धं कुमारीप्र० मीनोमत्स्यः जलादुद्धृतः गोरोचनंप्र० ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथसंकोचेनाह यद्यदिति यद्यद्वस्तुस्वांतंनितांततोषकरणं स्वांतंअंतःकरणं तस्यनितांतंअतिशयंतोषकरणं संतोषजनकं तत्तत्किंबहुनोक्तेन एवंसंकोचेनोक्तेदानींये
षुसंकोचाभावः तानिपूर्वाचार्यैः शकुनमध्येपठितानितान्याह कोरुद्धृतंगोमयं कोः पृथिव्याः [illegible] मृच्च पृथिव्याः उद्धृतामृत्तिका अंभोर्थंघटान्वितः सहचरः उदकार्थं
कुंभयुक्तोजनःसन् सहचरः सहचरतीतिसहचरः जलार्थीरिक्तकुंभस्तु पथिकेनसहेत्[illegible] निवर्ततेनयथापूर्णः कृतार्थः पाथकस्तत्र [illegible] धौतांबरोमौनकः धूत
वस्त्ररजकः दूर्वाप्र॰ दर्भौ तृणेअपिशुभौ अपशकुनमध्येयत्तृणंपठितंतदेतद्व्यतिरिक्तं रथःप्र॰ पलंमांसं असृग्रक्तं मदिरामद्यं वर्णीब्रह्मचारी गुरुःप्र॰ दैवविज्ज्यो
तिर्वित् विप्रौ द्वौब्राह्मणौ मित्रंइष्टः मृगःप्र॰ अरोदनशवं रोदनरहितंप्रेतं सिद्धार्थागौरसर्षपाः दुग्धादि दुग्धदध्याज्यं ननु यद्यत्स्वांतनितांततोषकरणमित्यनेनदुग्धं वृ

यद्यत्स्वांतनितांततोषकरणंकोरुद्धृतंगोमयंमृच्चांभोर्थघटान्वितःसहचरोधौतांबरोमौनकः॥दूर्वादर्भरथाःपलासृग्मदिरावर्णीगुरुर्दैवविद्विप्रौ
मित्रमृगावरोदनशवंसिद्धार्थदुग्धादिच॥१६॥

हणत्वात्सिद्धं पुनःकिमुक्तंदुग्धमिति सत्यं दुग्धंभक्षणेनिषेधितं तत्संदेहनिवृत्त्यर्थंदुग्धपठनमित्यदोषः ए
वमेवात्रविचारणीयं तथाचवसंतः दध्याज्यदूर्वाक्षतपूर्णकुंभसिद्धान्नसिद्धार्थकचंदनानि आदर्शशंखामिषमीनमद्यगोरोचनागोमयमुद्धृतंगोरिति भरद्वाजः राजावि
प्रोस्रुह्द्वेश्यासपुत्रास्त्रीकुमारिका अभिरूपोनरोस्त्रीवागजोवाजीवृषःसितः रज्जाधृतान्यवर्णैर्गौःसवत्साचविशेषतः उद्धृतंगोमयंनीतंमृत्तिकाचोत्खनातथा रजकोधौ
तवस्त्रश्चवेश्यातौर्यत्रिकध्वनिः जयमंगलशब्दाश्चशांतिपाठःसदीपकाः दीपोवाप्रज्वलद्वह्निः पूर्णकुंभंनृपासवाः मद्यंमांसंचरुधिरंभक्ष्याणिविविधानिच इक्षवोमधुतांबू
लंवस्त्रालंकरणानिच रौप्यंताम्रंमणिंस्वर्णद्रव्यंदर्पणमक्षताः वितानंचामरंछत्रंदूर्वादर्भतृणध्वजाः दोलाचारुरथोवृद्धः पुत्रपौत्रार्थयुक्तशुचिः चंदनानिस्रग्गंधानित-
थापुष्पाणिरोचना घृतंदधिपयःपेयासिद्धमन्नंवचःशुभं दैवज्ञःसगुरुर्देवश्चित्तोत्साहकराणिच दृष्टैतानिनरोयायात्सर्वार्थंलभतेध्रुवम् इति १६ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्वन्निति एतदनंतरोक्तंसतअग्रंदक्षिणतः दक्षिणभागेकुर्वन्सन् इतरत् अग्रेवक्ष्यमाणंवामेकुर्वन्सन्व्रजेत् गच्छेत् अथारूयमाह भस्मेति भस्मप्रसिद्धं अस्थि प्रसि-
द्धं इंधनंप्र० विट्विष्ठा तुषंधान्यादीनांत्वक् फल्गु अश्मापाषाणः लवणंसामुद्रिकं उपानहौप्र० तृणंप्र० अयस्करोलोहकारः पिण्याकंमर्दिततिलाः औषधंप्र० कृष्णधान्यंमा
षादि रुदनंरोदनादि तक्रंप्र० सधूमानलः धूमसहितोऽग्निः कार्पासः प्र० अरुणपुष्पंजपादि चर्मप्र० गुडः प्र० तैलंप्र० अयोलोहं कर्दमः पंकः १७ मत्तइति मत्तउन्मत्तः
वांतोवमितः बुभुक्षितः प्र० अंतकः प्राणिहिंसकः खलोदुर्जनः मुंडी मुंडितः जटी जटिलः व्याधितोरोगी खंजः पादेनखंजः व्यंगोऽंगहीनः दिगंबरोनग्नः यतिःसन्यासी अ

कुर्वन्दक्षिणतःसदेतदितरद्वामेप्रकुर्वन्व्रजेद्भस्मास्थींधनविट्तुषाश्मलवणोपानत्तृणायस्कराः॥ पिण्याकौषधकृष्णधान्यरुदनंतक्रंसधूमा
नलःकार्पासारुणपुष्पचर्मचगुडस्तैलायसीकर्दमः॥ १७॥ मत्तोवांतबुभुक्षितांतकखलामुंडीजटीव्याधितः खंजव्यंगदिगंबरायतिर रिः
काषायिमुक्तालकौ॥ चोराभ्यक्तमलाविलाश्चपतितः पाश्यर्गलीगुर्विणीवंध्याकृष्णवृषाहिभेकसरठगोधावराहःशशः॥ १८॥ जाहोतूमहि
षःखरोष्ट्रमहिषारूढाश्चरिक्तोघटश्छिक्काप्राणिशिरोंगकंपपदवीबंधाःकुवागाहवौ॥ रिर्वैरी काषायी गैरिकरंजितवस्त्रः मुक्तालकोमुक्तकेशः चौ

रःप्रसिद्धः अभ्यक्तः तैलाभ्यक्तः मलाविलोमलिनः पतितोजातिभ्रष्टः पाशी प्राणिबंधार्थपाशवान् अर्गली अर्गलावान् गुर्विणीगर्भिणी वंध्या निरपत्या कृष्णवृषः कृ-
ष्णोनड्वान् अहिः सर्पः भेकोमंडूकः सरठः प्रसिद्धः गोधा प्रसि[illegible]तिप्रसिद्धा जाहकोगात्रसंकोचीमंडली
तनुधैःस्मृतइतिहलायुधः ओतुर्मार्जारः महिषःप्र० खरोष्ट्रमहिषारूढाः प्रसिद्धाः रिक्तोघटःप्र० छिक्काक्षुतं प्राणिशिरोंगकंपः प्राणिनांगोखादीनांप्राणिनां शिरो
ध्दारनं अंगोध्दारनंवा पदवीबंधोमार्गबंधः ऊर्णनाभादिभिर्मार्गोबध्यते कुवाक्कुत्सितवाक्यश्रवणं आहवः संग्रामोबिडालमहिषादीनाम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पातः पतनं वस्त्रादीनांस्खलनं यानमश्वादिनस्यपलायनं स्वकलहः शत्रुनांकलहः षंढोनपुंसकः गोः क्षुतं प्रसिद्धं ज्वलद्वेश्म ज्वलद्गृहदर्शनं इत्येतेः पशाकुनाः प्र-
निबंधकाः कार्यप्रतिबंधकाः स्युः छिक्कादिकाअपशाकुनामृत्युप्रदाः स्युः तथोक्तमागमांतरे तृणतैलारिकार्पासभस्माचर्मतुषौषधं सामुद्रंगुडपंकाहिमत्तवांतबुभुक्षित
मित्यादि १९ अथशकुनांतरमाह भृंगाल्यकष्टू इति भृंगोभ्रमरः आलिवृंश्चिकः पष्टू॰ [illegible] ॰कंचुकाः शब्दकुर्वाणाराजसुकाः नरविनः श्वानादयः स्त्रीसंज्ञकाः वट-
कादयः एतेवामवः मनोऽभीष्टदाः स्युः काली महिषी कुक्कुटः प्र॰ पुंप्रयाः पुरुषसंज्ञकाःकाकादयः स्वरभिर्गौः एते दक्षेमनोऽभीष्टदाः स्युः भारद्वाजः प्रसिद्धः शि
खंडीमयूरः चाषः प्र॰ नकुलोबभ्रुः हंसः प्र॰ अजोबस्तः एते भारद्वाजादयोदृशंयाताः संतः इष्टफलाः स्युः अयमर्थः भारद्वाजादयोवामेदक्षेवाऽप्रेवादृष्टमात्रा-

पातोयानपलायनंश्वकलहः षंढः क्षुतंगोर्ज्वलद्वेश्मेतिप्रतिबंधकाः कुशकुनाश्छिक्कादिकामृत्युदाः ॥१९॥ भृंगाल्युष्ट्रपठत्कंचुकाश्वनरविनः स्त्रीसं
ज्ञकावामतः कालीकुक्कुटपुंप्रथाश्वस्वरभिर्दक्षेमनोऽभीष्टदाः ॥ भारद्वाजशिखंडिचाषनकुलाहंसोऽजएतेदृशंयाताइष्टफलास्तुरासभरवोवामेऽ
पिपृष्ठेऽर्थदः ॥२०॥ नद्युत्तारभयप्रवेशसमरद्यूतेषुनष्टेक्षणेव्याधौस्युःशुभदाविलोमशकुनानाड्याइडायाभरे ॥ इष्टफलाः अभीष्टफलदाभवंतीत्यर्थः रा

सभरवोगर्दभध्वनिर्वामेपृष्ठेपिअर्थदः अभीष्टार्थदोभवति २० अथयेषुयेषुकृत्येषुविपरीतशकुनाः शुभास्तानाह नद्युत्तारइति नद्युत्तारोनद्युत्तरणं भयंनृपादीनां प्रवेशोग्रामादिप्रवे
शः समरः संग्रामः द्यूतंप्र॰ नष्टेक्षणंनष्टवस्तुनअवलोकनं व्याधौरोगोपच्यारे एषुविलोमशकुनाविपरीतशकुनाः शुभदाः स्युः अयमर्थः गमनेयेऽपशकुनास्तेनद्युत्तारादिषुशुभदाः
स्युरित्यर्थः तथाइडायानाड्याभरे पूर्णतायांविलोमशकुनाः शुभदाः स्युः तथाचवसंतः भवेदिडायांपरिपूरितायांसर्वोपिवामः शकुनः प्रशस्तः स्यात्पिंगलायांपरिपूरितायांसर्वोऽ
पसव्यः शकुनः प्रशस्तः संगेरणेकर्मणिचप्रवेशेशत्रुग्रहेनष्टविलोकनेच व्याधौसरिद्दुर्गवनादिकेषुशस्तः प्रयाणाद्विपरीतभावइति अन्यच्च नद्युत्तारे भयेयुद्धे प्रवेशेनष्टवी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षणे शकुनाव्येरुत्तगाःशस्तान्नृपालोकेप्रयाणवदिति अथप्रथमेःपशकुनजातसतिकिंकर्तव्यमाह आद्येति आद्येप्रथमेदुःशकुनेजातेसतिनिवृत्त्यनिवर्तनं कृत्वा तत्रशुचौदे
शेउपविश्य शुचिः प्रक्षालितपाणिपादः आचांतः कृताचमनः असवःप्राणास्तेषांआयमःप्राणायामः अष्टधाअष्टवारंकृत्वा इयात्गच्छेत् चेद्यदिपुनः दुःशकुनः स्यात्त-
दानिवृत्त्यशुचिराचांतोऽष्टिवारंषोडशवारंअसून्नियम्येयात् अपरेतृतीयेदुःशकुनेजातेसतिस्वर्णंदत्वेयात् एतदावश्यकगमनविषयं प्राणायामानधिकारीतावत्कालं
स्थित्वाव्रजेत् तथाचज्योतिर्निबंधे विरुद्धेशकुनेपूर्वंप्राणायामाष्टकंचरेत् द्वितीयेद्विगुणान्कृत्वातृतीयेनव्रजेत्क्वचित् इति तथाचवसंतराजः जातेविरुद्धेशकुनेध्वनी-
नोव्याघुट्यकृत्वाकरपादशौचं आचम्यचक्षीरतरोरधस्तात्तिष्ठन्प्रपश्येच्छकुनांतराणीति तथाचार्ष्टिषेणः यदापशकुनंपश्येद्विपरीतमुपस्थितं सघृतंकांचनंदत्वानिर्वि

आद्येदुःशकुनेनिवृत्यचशुचिर्भूत्वाऽष्टधास्वायमंकृत्वेयादपरेष्टिवारमपरेदत्वास्वर्णंव्रजेत् ॥२१॥ ॥इतिश्रीमदनंतारव्यसुतचातुर्मा
स्यर्याजिनारायणविरचितेमुहूर्तमार्तंडेयात्राप्रकरणंसमाप्तं॥ ॥जन्मांगर्क्षदशेशसद्ग्रहकुजैःसार्कैर्बलिष्ठैर्मृदुक्षिप्रेंद्रध्रुवभैःस्थिरधिनृत
नौव्याराह्निभूपस्थितिः॥

शंकुः स्वरत्नंव्रजेदिति २१ इतिमुहूर्तमार्तंडटीकायांमार्तंडवल्लभायांयात्राप्रकरणंसमाप्तं अथमिश्रप्रकरणंविवक्षुरादौराजाभिषेकंवृत्तार्धे
नाह जन्मइति जन्मांगर्क्षदशेशादिभिर्बलिष्ठैः तथामृद्वादिभैः स्थिरधिनृतनौव्याराह्निभूपस्थितिः शस्तास्यादित्यध्याहारः अगंचऋक्षंचअंगर्क्षे जन्मनिअंगर्क्षेजन्मांग
र्क्षे जन्मलग्नजन्मराशी तेचदशाचजन्मांगर्क्षदशाः दशावर्तमानातस्याईशाः तेच[illegible]जश्चसूर्यश्च तेन[illegible]सार्कैः अर्कोरविः तेनसहबलिष्ठैः स्थानादिबलसमृ
द्धैः सद्भिः तथामृदुक्षिप्रेंद्रध्रुवभैः स्पष्टं स्थिरधिनृतनौऋद्विगतानृततुः ऋद्विनृततुः ।स्थिराचासौऋद्विनृततुश्चसातथा तस्यांजन्मराशिजन्मलग्नाभ्यां स्थिरोपचयन्
लग्ने व्याराह्निभौमरहितदिने भूपस्थितिः राजप्रतिष्ठाशुभास्यादित्यर्थः लग्नबलंप्रागवत् प्रायश्चंद्रंत्यजेत्स्याद्यवलोकनीयं

अथदेवस्थापनमुत्तरार्धेनाह स्वस्वर्क्षैरिति स्वस्वर्क्षैः यस्यदेवस्यप्रतिष्ठाक्रियते तस्यनक्षत्रैः समृदुध्रुववर्क्षचरभक्षिप्रैः शेषंस्पष्टं माघयुगे माघफाल्गुनयोः तथाराधयुगे राधो वैशाखः तस्माद्युगंयुगुलंतस्मिन् वैशाखज्येष्ठयोरित्यर्थः तथाव्यारान्हि विगत [illegible] तदिनइत्यर्थः पूर्वाह्णके अत्रदिनस्यद्वौ भागौ पूर्वभागः पूर्वाह्णः तस्मिन् आचार्यासुरस्थापनंप्रोक्तुः शेषंस्पष्टं सर्वामररुद्रस्थापनमितिशेषः लग्नबलंप्राग्वत् १ अथवस्त्रपरिधानंतस्यक्षालनंउंदुरादिभक्षितफलंच आह धार्यमिति वसुर्धनिष्ठा अदितिः पुनर्वसुः इनपंचहस्तपंचकं गुरुभंपुष्यः अश्विअश्विनी अंत्यरेवती श्रवाणिपूर्वोक्तानि एतैर्नक्षत्रैः ज्ञत्रये बुधगुरुशुक्रवारे अंबरं वस्त्रंधार्यं नान्यत्र यतउक्तं रवौजीर्णंविधौ शैत्यं जलार्द्रं दुःखदंकुजे बुधेधनंगुरौज्ञानंशुक्रेसौख्यंशनौमलमिति लग्नबलंप्राग्वत् अथक्षालनमाह इहास्मिन् वस्त्रधार

स्वस्वर्क्षैःसमृदुध्रुववर्क्षचरभक्षिप्रैः सुरस्थापनंप्रोक्तुर्माघयुगेचराधयुगुलेव्यारान्हिपूर्वाह्णके ॥ १ ॥ धार्यंवसुदितीनपंचगुरुभाश्व्यंत्यश्रवैर्ज्ञ
त्रयेज्ञोनेक्षाल्यमिहारवुभक्षितमसन्मध्यत्रिभागेंबरं ॥

णोक्तनक्षत्रादौक्षाल्यम् प्रक्षालनीयं कथंभूते ज्ञोनेबुधवाररहिते उक्तंच बुधार्किभद्रानंदेषु वैधृतिःपा तसंक्रमे मघावह्निद्विदैवेनक्षाल्यंवस्त्रंनूतनमिति वस्त्रहेमाद्यलंकारधारणोक्तैश्चभादिभिः तत्संहविश्वनिर्माणंविदध्यात्क्षालनादिकमिति यद्यपि यस्यांगंयददोगिनो गदितंभेकुर्यादिनिपूर्वमेव अंगमृतंकर्मोक्तं तथापिक्षालनेबुधवर्जनार्थंज्ञोने इहक्षाल्यमित्युक्तं बुधनिषेधश्रवणात् उक्तंच शनौसोमसुतेश्राद्धेपक्ष्यामावास्ययोस्तथा वस्त्रा णांक्षालनंचैवदहत्यासप्तमंकुलमिति अथोंदुरादिभक्षितफलमाह आखुभक्षितमिति आखुः उंदुरः तेनअंबरंमध्यत्रिभागेभक्षितं असत् दुष्टफलंस्यात् एतदुक्तंभवति व स्त्रंत्रिगुणंकृत्वा यदिभक्षितभागोमध्यत्रिभागेपततितदानदुष्टमित्यर्थः आखुरित्युपलक्षणं तेनाग्निदग्धंगवादिभक्षितंमष्यादिलिप्तंज्ञेयं तथाचोक्तंरत्नशते दग्धंवास्फुटि तंचगोमयमषीपंकैर्विलिप्तंतथा दष्टंमूषक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथस्त्रियारक्तवस्त्रधारणंभूषणधारणंच अनुक्तग्रहाणांकुजभकुजभावास्त्येतदुत्तरार्धेनाह स्त्रीति स्त्री अत्रोक्तेवस्त्रधारणभादौ अवरभूषणस्व[illegible]दभूषणंबिभृयात् धारयेत्
कथंभूते व्यादित्यपुष्यध्रुवे विगतानिआदित्यपुष्यध्रुवाणियस्मात्तत्तथातस्मिन् यतोत्रस्त्रियारक्तवस्त्रभूषणधारणेदोषोदृश्यते तथाचोक्तं पुष्यादित्यध्रुवैर्धिष्ण्यैः स-
र्णरक्तांबरादिकं नवीनंभूषणंधार्यंनार्यादयितुरायुषे इति लग्नबलंप्राग्वत् अथचंद्रादीनांप्राशस्त्यमाह श्वेतेति श्वेतेवस्त्रेनिरोप्यमुक्ताफलादिके अब्जश्चंद्रोहितः सोम
वारेश्वेतवस्त्रंधार्यमित्यर्थः कुजरवी अरुणरुक्मयोः शस्येते शनिः कृष्णेवस्त्रेनिनीलवस्त्रादिकेशस्यते शनौतद्धार्यमितिभावः ह्यप्येतुसर्वंधार्यमितिपुरेचोक्तं २ अ
थनराणांभूषणधारणंद्वितीयचरणेनाह वस्त्रोक्तैरिति वस्त्रोक्तैर्भादिभिर्वस्त्रादितीत्यत्रोक्तैः अंगेस्थिरलग्नेनुः नरस्य अलंकृतिरलंकरणंहितंस्यात् किंलक्षणैर्वस्त्रोक्तैःव्य

स्त्रीरक्तांबरभूषणेनबिभृयाद्भाऽऽदित्यपुष्यध्रुवेश्वेतेज्योऽरुणरुक्मयोःकुजरवीकृष्णेशनिःशस्यते २ वस्त्रोक्तैर्व्यनिलद्वयाश्विभिरगेगेनुर्विभूषा
हिताविप्राज्ञोत्सवलब्धिभूदितमनुक्तेपीष्टमुद्धारणं ॥ मैत्रार्कानिलमूलदस्रहरिभेंद्वीज्याजपादोत्तरेपण्यानांक्रयविक्रयौघटपरंत्यक्त्वांगेसद्ग्रहेनतु ॥३॥

निलद्वयाश्विभिः अनिलद्वयंस्वातीविशाखेति अश्विनीभं विगतेअनिलद्वयाश्विन्यौयेभ्यस्तानितथातस्मिन् स्वातीविशाखाश्विनीरहितैरित्यर्थः लग्नबलंप्राग्वत् अथद्वितीय
चरणेनविशेषमाह विप्राज्ञेति विप्राज्ञाब्राह्मणाज्ञा उत्सवोविवाहादिकः लब्धिर्लाभः आसांसत्त्वे अनुक्तेपिभादौधारणंवस्त्रादिधारणमिष्टंशुभंस्यात् तथाचोक्तंव्यासेन
लब्धंराजप्रसादेनविप्रादेशात्करग्रहे प्रीत्यादत्तोत्सवेवस्त्रंधार्यंनिंद्येपिभादिकइति अ[illegible]र्धेनपण्यानांक्रयविक्रयावाह मैत्रेति मैत्रमनुराधा शेषंस्पष्टम् घटपरंत्यं
गे घटः कुंभः तस्मात्परमन्यतमंतच्चतत्लग्नंच त्यक्त्वांगं उपचयलग्नंतस्मिन् कुंभव्यतिरिक्तोपचयलग्नेपण्यानांपूगीफलखर्जूरादीनांक्रयविक्रयौ नतुविस्तारय कुर्वित्यर्थः क
स्थांसत्यां स्वशुद्धौसत्यां स्वंधनभावःतस्यशुद्धिःपापराहित्यं तस्यांसत्यां शेषंप्राग्वत् तथाचोक्तं दशमेकादशेलग्नेवित्तकेंद्रत्रिकोणगैः शुभैःपण्यस्यकर्मोक्तंवर्जयित्वाघटोदकमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथवृत्तार्धेनधनिष्ठापंचकेवर्ज्यमाह प्रेतेति कुंभद्वयस्थेविधौसति कुंभमीनगेसतिपरिहरेत् सर्वथानाचरेत् स्पष्टं अथोत्तरार्धेचरणेनसेवामाह सेवेति ध्रुवादिभिर्नक्षत्रैः सं
वाइष्टास्यात् रूगमं कस्मिन्सति रवावेरवौसति वाइत्यथवा कुजेसति रवंदशमं आ [illegible] अनयोरन्यतम [illegible] न्यतमेसतीत्यर्थः यस्मिन्लग्नेसेवाक्रिय
तेतस्माल्लग्नाद्दशमेएकादशेवारवौभौमेवासति सेवाइष्टाहितकरास्यात्इत्यर्थः शेषंप्राग्वत् अथचतुर्थचरणेनसन्यासमाह सन्यासइति स्थिरभेस्थिरनक्षत्रेस्थिर
लग्नेचसन्यासइष्टःस्यात् कैः खलैर्गतबलैः पापग्रहैर्हीनबलैरित्यर्थः सप्तम्यर्थेतृतीया कस्मिन्सति भार्गवेशुक्रेषष्ठांत्यगे ६।१२सति शेषं लग्न बलंप्राग्वत् उक्तंच
त्रिषडेकादशेसौरिर्व्ययेषष्ठेचभार्गवः सबलेधर्मपेजीवेकेंद्रेदीक्षाविरक्तिकृदिति ४ अथवृत्तद्वयेनकृषिकर्माह उद्वाहर्क्षेति उद्वाहर्क्षाणिपूर्वोक्तानि मूलांत्यार्केत्यादीनि

प्रेतज्वालनशय्यकावितननेस्तंभोच्छ्रयंयाम्यदिग्यानंकाष्ठतृणोच्चयंपरिहरेत्कुंभद्वयस्थेविधौ ॥ सेवेष्टाध्रुववारुणांत्यवसुभैःखावेरवौवाकुजे
सन्यासःस्थिरभेखलैर्गतबलैःषष्ठांत्यगेभार्गवे ॥४॥ उद्वाहर्क्षचरद्विपेंद्रलघुभत्वाष्ट्रैःशुभास्यात्कृषिर्व्यार्किज्ञारखगान्हियुग्मझषगोकन्याविलग्नेतियौ ॥ व्यंकौजेसदिशिप्रणम्यखगभूसुरव्यान्सिताच्छादनःस्वर्णोहृष्टहलंससुष्कशुक्रवृषैःसौमीपदुस्त्रिर्नयेत् ॥५॥ एकादशासंख्याकानि

चराणिप्रसिद्धानि द्विपंविशाखा इंद्रोज्येष्ठा लघुभानिप्रसिद्धानि त्वाष्ट्रंचित्रातैः व्यार्किज्ञारखगान्हि आर्किःशनिः ज्ञोबुधः आरोभौमः विगताआर्किज्ञारायेभ्य
स्तेतथा तेचतेखगाश्चतेषां अहःदिनंतस्मिन् शनिबुधभौमरहितवारेइत्यर्थः युग्मझषगोकन्याविलग्ने युग्मंमिथुनं झषोमीनः गौर्वृषः कन्याप्रसिद्धा एषामन्य-
तमविलग्नेतियौ व्यंकोजे विगतःअंकोनवमीयस्मात् असौव्यंकः सचासौओजश्च ओजोविषमस्तस्मिन् नवमीव्यतिरिक्तविषमतिथावित्यर्थः किंलक्षणे व्यंकौ
जेतियौ सदिशि दिक्दशमी तयासहवर्तमाने [illegible] चोक्तं चंद्रेश [illegible] शिजशुक्रगुरुस्तिवारे

६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लग्नेवृषेमिथुनकेझषकन्यकयोराशित्रयंकृषिप्रकरणंप्रवपेन्निधानेइति अन्यच्च दशम्येकादशीचैवतृतीयाचत्रयोदशी सप्तमीपंचमीचैवप्रतिपच्चसुखावहा हंत्यष्टमी
बलीवर्दान्नवमीसस्यघातिनी चतुर्थीकीटजननीपतिंहंतिचतुर्दशी रवौबृहस्पतौचंद्रेशुक्रेकुर्याद्विशेषतः बुधार्किभूमिपुत्राश्चनभवंतिफलप्रदाइति अथवि
धिमाह सिताच्छादनेश्वेतवस्त्रधरःपटुःकुशलः कर्तारवगभूसुरव्यान्देवाम्प्रणम्य कृष्यारंभः पूर्वोक्तः सितयज्ञःक्रियते तत्रपूजितान्रवगभूसुरव्यान् ग्रहभूम्यग्न्या
दीन् प्रदक्षिणापूर्वकंप्रणम्य मनोवाक्कायकर्मभिर्नमस्कृत्वा स्वर्णाद्युत्पहलंस्वर्णघर्षितायंहलंससुष्कस्त्वृषैः सुष्काद्वृषणास्तैः सहवर्तमानाः ससुष्काः शोभनाःवृ
षाः स्त्वृषाः गुणावयवपूर्णाः नीरोगाः ससुष्काश्चतेस्त्वृषाश्च तयातैःकृत्वा सौमीमुत्तरांदिशंप्रतित्रिवारंनयेत् हलेनपद्धतीः कुर्यादितिभावः उत्तरदिशंप्रतित्रिवा
रंनयनेनपंचरेखाउत्पद्यंते तद्यथा प्रथमगमनेनैका आवर्तनेद्वितीया पुनरुत्तरांप्रतिद्वितीयगमनेनतृतीया पुनरावर्तनेचतुर्थी पुनरुत्तरांप्रतितृतीयगमनेनपंचमीरे
खाउत्पद्यते अधिकानकार्याइतिभावः सौमीपद्धतिनिर्णयेदित्यत्रपद्धुपदग्रहणं भरवंडऋजुरेखाकरणार्थं तथाचोक्तं शस्ताशुक्लचंद्रतारासुशुभदिनैःशुक्लेनवाससा
स्नात्वागंधैश्चपुष्पैश्चपूजयित्वाविशेषतः पृथिवींग्रहसंयुक्तांपूजयित्वाप्रजापतिं अग्निंप्रदक्षिणीकृत्यदातव्याचैवदक्षिणा कृष्योद्यद्वैनियोक्तव्योजीवनश्चयुतेन
वा विबलंछिन्नलांगूलंकपिलंवृषभंत्यजेत् हलप्रवाहनंकार्यंनीरुग्भिर्वृषकर्षकैः हलादिभिर्दृढैःक्षमंकुद्धदैरशुभंप्रवेत् वृषभायदियुध्येयुस्तस्यविघ्नंसदा
भवेत् हेमरत्नहलाग्रेणछिन्नांरेखांनकारयेत् उत्तराभिमुखोभूत्वाक्षीरेणार्घ्यंप्रदापयेत् तस्यसर्वप्रकारेणनिर्विघ्नंकारयेत्तदा एकाजयकरीरेखातृतीयाचार्थदृ
द्धिदा पंचमीचभवेद्रेखाबहुसस्यफलप्रदा अतऊर्ध्वंनकर्तव्यामहादोषस्ततो [illegible] सचंद्रमाः पराशरोहलीचैवसर्वविघ्नो
पशांतयेइति अत्रदुर्निमित्तानिनत्रैवोक्तानि हलेप्रवाह्यमाणेतुकूर्मउत्पद्यतेयदि गृहिणोमृतयेतस्यततोऽग्नेश्चभयंभवेत् ईषाभंगोयदाकुर्युः संशयोजीवितस्यच
स्तनाशोयुगेभग्नेसमानेभ्रियतेशिरुः योक्त्रछेदेतु यासंगःसस्यहानिश्चजायते हलेप्रवाह्यमाणेतुगौरेकःप्रपतेद्यदि प्रपतेद्युक्तमात्रस्तुबंधनंचप्रयच्छति ज्वरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निसाररोगेण कृषिभंगं विनिर्दिशेत् प्रवहे युक्तमात्रस्तु ततो गौः स्वनते यदि वहेन युक्तमात्रस्तु तदा सस्यं चतुर्गुणमिति ५ अथ कृषिविषये लांगलचक्रमाह त्रित्रित्रीषि
ति अर्कभुक्तात्सूर्यनक्षत्रात्सकाशात् त्रिष्वादिषु स्थानादिस्थितेषु नक्षत्रेषु असत्सदि[illegible]यं भूयः व[illegible]भवति सूर्याक्रांतनक्षत्रस्य आदिमा
न्नक्षत्रात्सकाशात् त्रिषु असत् दुष्टफलं स्यात् तदनंतरं त्रिषु सत् शुभं स्यात् ततस्त्रिषु असत् ततः इषुषु पंचसु सत् ततो नलेषु त्रिषु असत् ततः अर्थेषु पंचसु सत् त
तो रामेषु त्रिषु असत् ततो हुतभुक्षु त्रिषु सत् इत्यादि इत्यर्थः अथ बीजोत्पत्तिमाह कृषिभैरिति कृषिभैः कृषिनक्षत्रैः उद्वाहर्क्षचरद्विपेत्यादिभिर्बीजवापः शुभः प्रोक्तः किंलक्षणैः कृ
षिभैः विवारुणहरीशेंद्रैः वारुणं शततारका हरिः श्रवणः इंद्रो ज्येष्ठा विगताः वारुणहरीशेंद्रा येभ्यस्तानि तथा तैः शततारकाश्रवणज्येष्ठारहितैरित्यर्थः कृषिभैरित्युपलक्षणं तस्मा

त्रित्रित्रीष्वनलार्थरामहुतभुक्ष्वर्कभुक्तादसत्सद्भूयः कृषिभैर्विवारुणहरीशेंद्रैर्बीजवापः शुभः ॥ सूर्यर्क्षाद्दिनतीयतोऽनिधृनितस्मात्त्राष्टाष्टभिः सत्फ
लः प्रोक्तोऽन्यैः फणिसप्तमाद्रविमितैस्तच्छेदनं वापभैः ॥ ६ ॥

कृष्युक्तं सर्वं तिथिवारादिकं ज्ञेयं तथा चोक्तं मूषकानां भयं भौमे मंदे शलभकीटयोः नवपेद्यतिथौ
रिक्ते हीने सोमे विशेषतः वृषलग्नेऽथवा मीने कन्यायां मिथुनेऽथवा वापयेत्सर्वसस्यानि यदीच्छेत्सस्यसंपदं इत्यादि लग्नबलं मान्यवत् अथ बीजवापविषये द्वितीयभेदं फणिचक्रमा-
ह सूर्यर्क्षादिति सूर्ययुक्तनक्षत्रादिद्वितीयं तस्मादग्निधृतिरेकोनविंशं तस्मात् अष्टाष्टभिः एकोनविंशाद्दष्टभिर्नक्षत्रैः बीजवापः सत्फलः अथ द्वितीयभेदमाह अन्यैरिति
अन्यैराचार्यैः फणिसप्तमात् राहुसप्तमात्सकाशात् रविमितैर्द्वादशभिर्नक्षत्रैर्बीजवापः शुभः प्रोक्तः एतदुक्तं भवति राहुर्यस्मिन्नक्षत्रे भवति तस्माद्यत्सप्तमं नक्षत्रं तत्फ
णिभं सप्तमसुच्यते तस्मात्सकाशात् द्वादशभिरित्यर्थः राहोस्तु फणीति नाम ग्रंथांतरे प्रसिद्धं वराहमिहिराचार्येण राहुस्वरूपविकल्पाः ग्रंथांतरोक्ता उद्घाटिताः स्वकृतसं-
हितायां अमृतास्वादविशेषाच्छिन्नमपि शिरः किलासुरस्येदं प्राणै[illegible]तां यातं वदंत्येके इंदुर्कमंडलाका[illegible]यते गगने अन्यत्रपर्व-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथप्रसंगेनतिलामलकस्नानेनिषिद्धतिथीनाह दिग्विश्वेति दिक्दशमी विश्वेत्रयोदशी अद्रिःसप्तमी दृक्द्वितीया अंकोनवमी दर्शोऽमावास्या एतेषुतिथिषुश्रीकामः धात्रीफ
लैः आमलकीफलैःस्नानंन अभ्याचरेत् तथाचोक्तं यःकरोतिदशम्यांचस्नानमामलकैःसह पुत्रहानिर्भवेत्तस्यत्रयोदश्यांधनक्षयः अर्थपुत्रक्षयस्तस्यद्वितीयायांनसंशयः अमा
यांचनवम्यांचसप्तम्यांचकुलक्षयइति अन्यच्च आतुर्जनस्यदशमीतनयांस्त्रयोदश्यर्थनिहंत्युभयमेतदपिद्वितीया सप्तम्यग्निंदुनवमीषुचसंपदिछुःस्नायात्कदाचिदपिनाम
लकैर्मनुष्यइति अथस्त्रीणांबुधादिषुअभ्यंगनिषेधमाह बुधोबुधवारः अंबुपर्क्षंशततारका पित्र्यंभंमघा एतेष्वभ्यंगस्तस्मात् अंगनास्त्रीपतिघ्नीस्यात् उक्तंच स्नानं
कुर्वंतियानार्यश्चंद्रेशतभिषग्गने सप्तजन्मभवेयुस्ताविधवादुर्भगाध्रुवमिति त्रिविक्रमशते स्नानंमाकारिशक्रेज्यविष्टिसंक्रांतिपर्वसु द्वाष्टषष्ठदिक्त्रयोदश्यांस्त्रिय-

दिग्विश्वाद्रिदृगंकदर्शतिथिषुस्नानंनधात्रीफलैःश्रीकामोथबुधांबुपर्क्षपित्र्यभाभ्यंगात्पतिघ्न्यंगना॥
पुत्रीसोमदिनेप्रसूर्यमपित्र्यत्वाष्ट्रेंद्रमिश्रांबुपऋव्यादेश्वरभेकुपुत्रहरिजेस्नायान्निशास्येपिन॥११॥

स्तनमघाबुधैः अथपुत्रवतःसोमवारेऽभ्यंगनिषेधमाह पुत्रीति पुत्रवान्सोमवारदिनेनस्नायात् उक्तंच पुत्रवान्स्वगृहेनित्यंनस्नायादुत्तरासुखः सोमवारेतथाभ्यं
गंवर्जयेत्सर्वथाबुधैरिति अथप्रसंगेनसूतिकास्नानेनिषेधकालमाह प्रसूरिति यमोभरणी पितरोमघा त्वाष्ट्रंचित्रा इंद्रोज्येष्ठा मिश्रेकृत्तिकाविशाखे अंबुपःशततार
का ऋव्यादोमूलं ईश्वरभमार्द्रा एषांसमाहारस्तस्मिन् कुपुत्रहरिजे कुत्सितःपुत्रः [illegible]वोयस्यतत्कुपुत्रं तच्चतद्धरिजंच तस्मिन् यस्माल्लग्नपंचमस्थःपापग्रहो
भवति तस्मिन्नित्यर्थः निशास्यंरात्रिमुखंसायंकालः तस्मिन्प्रसूतानस्नायात् शेषंलग्नबलप्राग्वत् उक्तंच मघामूलविशाखार्द्राचित्रादिद्वियमद्वये ज्येष्ठासायं-
जलेशर्क्षेनैवस्नायात्प्रसूतिका शुभग्रहयुतेलग्नेपंचमेपापवर्जिते परित्यज्यमहादोषान्सूतिकास्नानमाचरेत् ११ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथौषधनिषेधादनमाह मंदारेति मंदः शनिः आरो भौमः ताभ्यामन्ये रविचंद्रबुधगुरुशुक्राः तेषां दिनं तस्मिन् मृदुध्रुवचरक्षिप्रैर्नक्षत्रैः वलक्षेशुक्लपक्षे सुधायोगे अ-
मृतयोगे ग्रंथांतरप्रसिद्धे स्मृतिकेंद्रारिव्ययांगे शोभनानि पापग्रहरहितानि मृतिकेंद्रारिव्ययानि यस्य तत् स्मृतिकेंद्रारिव्ययं तच्च तत् अंगं च तस्मिन् भिषग्वैद्यः भे
षजमात्रं रक्कुर्यात् शेषं लग्नबलं प्राग्वत् अथौषधदानमाह तदिति तदौषधं इहानंतर [illegible]कआदौ दद्यात् कथंभूते इह विधुवेंदुतनयप्रद्योतने ध्रुवनक्षत्रबुधरविरहिते
अथ रक्तस्रावव्रणयोर्विशेषमाह असृक्स्रावो रक्तस्रावः व्रणः क्षतं अनयोः कर्म सूर्यकुजयोरन्हि दिवसे आचरेत् कयोः सतोः इहानयोः सूर्यकुजयोः केंद्रस्थयोः सतोः त
थाचोक्तं मंदारवर्जितेवारे चरक्षिप्रमृदुध्रुवैः सूर्यसौम्यैः केंद्रगतैः भेषजोत्पादनं हितं रक्तस्रावं कुजे कुर्यात् नद्वारायाम आपिवा कुजे केंद्रे यवा मंदे रवौ वा विरवलः षष्ठे व्र

मंदारान्यदिने मृदुध्रुवचरक्षिप्रैर्वलक्षे सुधायोगे भेषजमाचरेत्स्मृतिकेंद्रारिव्ययांगे भिषक् ॥ तद्द्याादिह विधुवेंदुतनयप्रद्योतने रोगिणे स्रुक्स्रा
वव्रणकर्म सूर्यकुजयोरन्हीह केंद्रस्थयोः ॥१२॥ याम्याहित्रयवायुमूलजलपोपांत्येंद्रहस्तांबुभे शांत्या जहिपयोर्नृपैर्नवदिनै रन्यत्र रुग्णो विरुक् ॥

णक्रिया कुजे सूर्ये केंद्रगे तद्दिने षष्ठे शुद्धे षष्ठे न सक्रूरे चरलग्ने शुवत्सरे इति १२ अथ प्रसंगेन रोगमुक्तदिवसानाह वृत्तार्धेन याम्येति याम्यं भरणी अहित्रयं आश्लेषात्रयं वायुः स्वा
ती मूलं प्रसिद्धं जलपः शततारका उपांत्यं उत्तराभाद्रपदा इंद्रो ज्येष्ठा हस्तः प्र॰ अंबुपं पूर्वाषा॰ अस्मिन्नक्षत्रगणे रुग्णः रोगी शांत्या यथोक्तशांतिकेन विरुक् ज्वरमुक्तो भवति अ
जहिपयोः श्रवणविशाखयोः रुग्णः नृपैः षोडशभिर्दिनैः विरुक् स्यात् अन्यत्र अन्येषु नक्षत्रेषु रुग्णो नवदिनैर्विरुग्भवति एतज्ज्योतिषार्काभिप्रायं किंचिद्रत्नकोशाभिप्रायसु
क्तं नत्रयेषु नक्षत्रेषु ज्वरितस्य मृत्युरुक्तः येषु च कृच्छ्रेण बहुभिर्दिनैः ज्वरेण मुक्तिरुक्ता तत्फलमत्र शांत्या विरुगित्युक्तं क्वचिदन्यथा फलदर्शनात् तथा येषु येषु नक्षत्रेषु सप्तभिर्नवभि
रेकादशभिर्दिनैर्ज्वरनिर्मोचनमुक्तं तत्फलमत्र मध्यमत्वेन नवदिनैर्विरुगित्युक्तं ग्रंथगौरवभयात्स्वल्पांतरत्वात् तथा च ज्योतिषार्के सप्ताहमृतिं [illegible]द्रिरुद्रमृत्युनगाद्रिभिः रुछ्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृत्युमृतीशैश्चहुछ्रेशाव्यसुतानृपैरित्यादि अथोत्तरार्धेनरोगमुक्तिस्नानमाह आदित्येति आदित्यंपुनर्वसु अहिराश्लेषा अनिलःस्वाती [illegible]श्रवणिपूर्वोक्तानि अंत्यंरेवती
पितृभंमघा अस्मिन्नक्षत्रगणे शुक्रेंदुवारे शुक्रसोमवारे गदत्यक्तस्नानंरोगमुक्तिस्नानं अनिष्टंस्यात् तर्हिकुत्रकर्तव्यमित्यतआह अथशुभेभादौइष्टंशुभंस्यात् कस्मिन्स
ति खलास्तुस्थिरेसति खलःपापग्रहः अस्त्येयस्यनत् तथा तच्चनत्स्थिरंच तस्मिन् स्थिरलग्नेपापेसप्तमेसतीत्यर्थः तथाचोक्तं वैधृतौचव्यतीपातेभद्रायांधिष्ण्यसंक्रमे
रोगमुक्तोनरःस्नायात्कुवारर्क्षतिथिष्वपि द्यूनंपापयुतंशस्तंदशमंचशुभान्वितं सौम्यक्रूरयुतंरंध्रंरोगस्नानेरिभंनयेति चंद्रबलंसर्वत्रयोज्यं कुतिथिभादौसदित्यनेन चंद्रा
दिबलविषयेमोहोमाभूदित्यतः चंद्रबलंसूचितं यतः ग्रंथादौगर्भाधानेसदिंदाविल्याद्युक्तंतत्सर्वकर्मसुज्ञेयं तथाचोक्तं स्पष्टं स्नायाद्रोगविमुक्तस्तुशुभयोश्चंद्रतारयोरिति

आदित्याह्यनिलध्रुवांत्यपितृभेशुक्रेंदुवारेगदत्यक्तस्नानमनिष्टमिष्टमशुभेभादौखलास्तुस्थिरे ॥१३॥ द्रव्यंसंव्यवहारतोलघुचरैर्योज्यंचरांगेबु
धेधर्माष्टात्मजगेथतस्यहरणेहस्तोरविर्ज्ञःकुजः॥ संक्रांतिर्भरणीत्रिपुष्करयमौकुंभांत्ययोश्चंद्रमाद्वद्विश्चेतिशुभाविदूनइहयत्कुर्याद्धणंतत्स्थिरं॥१४

१३ अथव्यवहारद्रव्यंवृत्तेनैकेनाह द्रव्यमिति द्रव्यंसुवर्णादिसंव्यवहारतः कुसीदव्यवहारेणलघुचरैर्नक्षत्रैर्योज्यं देयमित्यर्थः कुचरांगेचरलग्ने कस्मिन्सति बुधेध
र्माष्टात्मजगेसति धर्मोनवमं अष्टमं आत्मजः पंचमं एष्वन्यतमस्थानगतेसतीत्यर्थः अन्यत्पूर्वोक्तंज्ञेयं अथानंतरंतस्यप्रयुक्तस्यद्रव्यस्यहरणंपुनर्ग्रहणं तस्मिन्विषयेह
स्तोनक्षत्रं रविः रविवारः ज्ञोबुधवारः कुजोभौमवारः संक्रांतिःसूर्यसंक्रमणदिनं भ[illegible]प्रसिद्धा त्रिपुष्करोयोगः यमोयमलयोगः त्रिपुष्करयोगयमलयोगौग्रंथांत
रेप्रसिद्धौ रत्नमालायां विषमचरणंधिष्ण्यंभद्रातिथिर्यदिजायते गुरुगुरुशनिक्ष्मापुत्राणांकमंचनवासरे मुनिभिरुदितःसोयंयोगस्त्रिपुष्करसंज्ञकइत्यादि अ
थयमलयोगः शनिभौमेज्यवारेषुतिथिर्भद्राद्विपादभं तदाद्विगुणयोगःस्याद्विगुणफलप्रदः कुंभांत्ययोश्चंद्रमाः धनिष्ठापंचके वृद्धिर्द्वियोगोपिशुभः हस्तादयोत्रस-

मु॰ मा॰ ६६

कीयद्रव्यग्रहणे शुभाः विदुर्नेइहहस्तादौ ये यत्‌ ऋणं कुर्यान्नास्थिरं स्यात्‌ तथा चोक्तं चरैः क्षिप्रैश्चरे लग्ने बुधे धर्मसुताष्टमे व्यवहारादिना द्रव्यप्रयोगो मुनिभिः स्मृतः भरण्या-
संग्रहं कुर्यात्‌ यं च केन्द्रे त्रिपुष्करे ऋणं कर्म चरैः क्षिप्रैः ऋणच्छेदः कुजेऽह्नि नः पंचके पंचराशिगां त्रिगुणं च त्रिपुष्करे यमले द्विगुणं प्रोक्तं हानिवृद्ध्यादिकं बुधैः ऋणं भौमेन कुर्वी
तनदेयं बुधवासरे ऋणच्छेदं कुजे कुर्यात्‌ संचयं सोमनंदने हस्तार्कवारसंक्रांतौ यद्दणं स्यात्‌ कुलेषु नत्‌ वृद्धियोगेन यातज्ञेयमृणच्छेदं तु कारयेद्दिनि १४ अथ तीक्ष्णादिषु
नष्टादिद्रव्यस्य प्राप्तिं तयाद्रव्यनिक्षेपं वृत्तार्धेनाह तीक्ष्णेति तीक्ष्णोग्रध्रुवमिश्राणि पूर्वोक्तानि वासुः स्वाती एषु नष्टादिकं धनं नष्टप्रयुक्तविनिक्षिप्तादिकं स्वर्णादिकं द्र
व्यं नैति यथा क्रांत रोहिणी नक्षत्रान्‌ भेऽष्टनक्षत्रे व्यासे चतुर्भक्ते सति त्रिरवशेषयोः गतं नैति अथ द्रव्यनिक्षेपमाह अंत्यांबुशक्रो क्षिपेन धनमित्यनुषंगः अंत्यं द्वादशं

तीक्ष्णोग्रध्रुवमिश्रवासुषु धनं नष्टादिकं नैति च द्वेऽब्ध्यासे त्रिरवशेषयोर्न गतमंत्यं त्यांबुशक्रे क्षिपेत्‌ ॥ विद्यां प्रोक्तवदिष्टदेवतिथिभेः ध्रुवे शामूलघ्रुवैर्भैर्वृद्ध
श्चीज्यकरांबुपैः सुजलरवा भांगे तरून्‌ रोपयेत्‌ ॥१५॥

अंबु चतुर्थं अनयोः शुद्धिः पापराहित्यं तस्यां तस्यां क्षिपेत्‌ निक्षिपेदित्यर्थः तथा चोक्तं साधारणोग्रतीक्ष्णेषु स्वा
त्यां द्रव्यं न लभ्यते दत्तं प्रयुक्तं निक्षिप्तं नष्टमित्याह नारदः अथ नृसिंहादिमंत्रविद्यासाधनमुहूर्तं तया वृक्षारोपणमुहूर्तं उत्तरार्धेनाह विद्यामिति विद्यां मंत्रविद्यां प्रोक्तवत्‌ वेदविद्योक्तभा
दौ विद्यां भोज्युक्तभादौ इत्याद्युक्ते तथा स्वदेवतिथिभेष्वेष्टदेवतिथिनक्षत्रे साधयेत्‌ गुरुसुरवाङ्गुल्यादित्यर्थः तत्रागमोक्तमंत्रग्रहणे अनध्यायदोषो नास्ति तत्तु स्वदेवतिथिभेइत्य
नेनैव पदेन परिहृतं तथा चोक्तं मृदुध्रुवक्षिप्रैर्वारार्कौ धर्मसत्क्रिया कार्या विद्योक्तभैर्दीक्षा स्वदेवतिथिभेषु चेति अथ वृक्षारोपणमाह ध्रुवेति विशारवा मूलं प्र॰ ध्रुवमृदूनि पूर्वोक्तानि
अश्विनी प्र॰ ईज्यः पुष्यः करो हस्तः अंबुपः शततारका एभिर्नक्षत्रैरंघ्रिपान्‌ पादपान्‌ रोपयेत्‌ कस्मिन्‌ सुजलरवा भांगे अंगे भः अजांगं अंगं लग्नं तस्मिन्‌ अभः जलचरराशि-
श्चंद्रो वा तदभांगमुच्यते जलं चरवं च जलरवे शोभने जलरवे यस्य तत्‌ सुजलरवं तच्च तदभांगं च सुजलरवाभांगं तस्मिन्‌ शोभनेऽपग्रहरहिते [illegible] चतुर्थदशमयस्याब्जा
[illegible]र्थः शेषं पूर्ववत्‌ १५

२१ ६६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालाहरप्रदानात्कमलयोनेः मुखपुच्छविभक्तांगंभुजंगमाकारमुपदिशत्यन्यइति भुजंगमाकारकथनात्फणीत्यभिधानमसंदु्ं रत्नमालायामपि फणिभाद्दीजो त्रिकालेस्फुटमिति तथाचागमांतरे राहुभादष्टभंयावद्दीजोप्तिः परिवर्जयेदिति अथधान्यच्छेदनमाह तच्छेदनंवापभैरिति तेषांधान्यानांछेदनंतच्छेदनं वापभैर्बीज वापननक्षत्रैः प्रोक्तं ननुयस्यांगंयदरोगिनोगदितभेकुर्यादिति पुरैवोक्तं तत्कथं पुनरुक्तंतच्छेदनंवापभैरिति सत्यं कृषिनक्षत्राणांबीजवापननक्षत्राणांच किंचिद्भे दोऽस्ति द्वयोः कृष्यंगत्वात्कैः कार्यमितिसंदेहनिवारणार्थंतच्छेदनंवापभैरित्युक्तं ६ अथनिष्पन्नेधान्येक्रमप्राप्तंमेथिरोपणंतृतीयचरणेनाह मेथिमिति क्षीरतरोर्वटवृ क्षादेर्मेथिं उड्डाहभैर्विवाहनक्षत्रैर्मूलांत्यार्केत्यादिभिरारोपयेत् निखनेत् मेथिर्नामखलेधान्यमर्दनार्थंवृषपंक्तियोजनार्थंकाष्ठमारोप्यते मेथ्यंतेसंगम्यंतेवृषभा अस्मि न्निति मेधिः मेथृसंगमे पुंसिमेथिःखलेदारुन्यस्तंयत्पशुबंधनइत्यमरः किंलक्षणैरुड्डाहभैः उफानुरहितैः उफा उत्तराफल्गुनी अनु अनुराधा ताभ्यांरहितैः उक्तंच

मेथिंक्षीरतरोरुफानुरहितैरुड्डाहभैरोपयेदन्नप्राशनवद्वसंतशरदोः प्रोक्तंनवान्नंबुधैः ॥

रेवतीरोहिणीमूलंस्वातीहस्तोमृगस्तथा आषाढोत्तरहस्तश्चतथा भाद्रपदामता बंधनेसर्वबीजानांतथाशालाप्रवेशने दुःखदावनदावैषाः गुराधोत्तरफल्गुनी वटश्चसप्तपर्णश्च भंगारीशाल्मलीतथा औदुंबरीतथाधात्रीयाचान्याक्षीरवाहिनी स्त्रीनाम्नीकर्षकैर्नित्यंमेथिः कार्याफलप्रदेति अथनवधान्यप्रसंगेननवान्नकर्मद्वितीयचरणेनाह अन्नप्राशन भैरिति वसंतशरदोः भवत्वोः अन्नप्राशनभैर्नवान्नंनवान्नकर्मबुधैः प्रोक्तं अन्नप्राशनभैरित्युपलक्षणं तस्मादन्नप्राशनोक्ततिथिवारादिकमत्रग्राह्यम् साग्निकस्यनवान्नकर्म णाविनाव्रीह्यादीनांनवनवमितानांधान्यानांभक्षणेदोषप्रसंगादावश्यकंकर्मैतत् नवधान्यानामानि व्रीहयोयवगोधूमानीवाराः कगुवेणवः शालयोमुद्गमाषाश्चनवधान्या निचक्रमात् एषांमध्येशरत्संभवानिधान्यानिव्रीह्याग्रयणेनविनानभक्षणीयानि वसंतसंभवानियवाग्रयणेनविनानभक्षणीयानीतिनियमादिकर्मशरद्वसंतयोः क्रियतइति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदन्नप्राशनोदितैस्तिथिभादिभिः मासेषष्ठेष्टमेवेत्यत्रोक्तैर्नवान्नंकर्तव्यमित्यर्थः अथोत्तरार्धेननृत्यसंगीतयोरारंभमाह मैत्रार्कांत्येति मैत्रमनुराधा अर्कोहस्तः अंत्यंरेवती
वसवोधनिष्ठा उत्तरास्तिस्रः ईज्यः पुष्यः वरुणःशततारका इंद्रोज्येष्ठा तैर्नर्तनमारभेत संगीतकंचारभेत् कस्मिन्सति लग्नेवर्तमानेज्ञेगुरुवीक्षितेसति कैः हिबुकगैः सौम्ये
श्चतुर्थस्थानस्थितैः सौम्यग्रहैः शेषंप्राग्वत् ७ अथनानापशूनांकर्मदृक्तैनैकेनाह ह्रीशार्क[illegible]दृशिविशाखा अर्कोहस्तः इंदुर्मृगः अदितिः पुनर्वसुः ईज्यः पुष्यः वसवोध-
निष्ठा शिवः आर्द्रा अश्विनीप्रः अंत्यंरेवती अग्निःकृत्तिका पाशीशततारका इंद्रोज्येष्ठा तैः पूर्वाभिस्तिसृभिः विसिंहभतनौ विगतः सिंहोयेभ्यस्तानिविसिंहानि तानिच
भानिविसिंहभानि सिंहरहितराशयः तेषांतुनुःलग्नं तस्मिन्नानापशूनांक्रियाशुभदाउदिता पशूनांक्रयविक्रयादिकर्मशुभदंप्रोक्तमित्यर्थः अथोत्तरार्धेनवर्ज्यमाह अर्क

मैत्रार्कांत्यवसूत्तरेज्यवरुणैः सैंद्रैः शुभंनर्तनंलग्नेज्ञेगुरुवीक्षितेहिबुकगैः सौम्यैश्चसंगीतकं ॥७॥ ह्रीशार्केंदूदितीज्यवासवशिवाश्व्यंत्याग्निपाशींद्र
भैः पूर्वाभिस्त्रिशुभदाविसिंहभतनौनानापशूनांक्रिया ॥ वारेष्वर्कचतुष्ककोत्तरहरित्वाष्ट्रेष्वमारिक्तयोरष्टम्यांनहितोदितास्वभगभेनस्याद्धदोषःकि
ल ॥८॥

चतुर्षुवारेषु रविचंद्रभौमबुधवारेषु कोत्तरहरित्वाष्ट्रेषु कः रोहिणी उत्तरास्तिस्रः आसांसमाहारः कोत्तरं हरिः श्रवणः त्वाष्ट्रंचित्रा एष्वमारिक्तयोः अमा
अमावास्या रिक्तानवमीचतुर्थीचतुर्दशीनामन्यतमा तयोः अष्टमीप्रसिद्धा तस्यांनानापशूनांक्रियाहितानउदिता अपवादमाह स्वभगभेसतिभदोषोनस्तत्रदोषःक्व
चित्पशुकर्मणिनस्यात् लग्नबलंप्राग्वत् उक्तंच ह्यादित्यद्विवसूद्यांत्यार्केंद्रद्विशैः क्रियादिग्गोः दर्शभूताष्टमीचित्राध्रुवकर्णैर्गमाद्यसत् सोमार्कवैधृतेपातेलग्नेपं
चाननेबुधे भद्रासंक्रांतिरिक्तासुपशुकर्मविवर्जयेत् शुभग्रहोदयेशुद्धेनैधनेस्वर्क्षयोनिषु रक्षावृद्धिक्रियाशस्तापशूनांमुनिभिःस्मृतेति तथाचागमांतरे सोमेभौ
मेबुधेगावोनचाल्यास्तुरगाःशनाविति अन्यच्च पूर्वात्रयामृतमयूखहुताशनेषु शक्राग्निवाजिवसुवारुणशाकरेषु एतेषुगोमहिषदंतितुरंगमादिनानाप्रकारपशुजातिगतिःप्रशस्तेति न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाश्वकर्मर्क्षैनैकेनाह ध्यादित्यमिति ध्यादित्यं पुनर्वसुपुष्यौ द्विवस्रुधनिष्ठाशततारकं स्थिराणिप्रसिद्धानि अश्विनीभं० मृदूनिभं० स्वा[illegible]भं० अर्कोहस्तः तैः त्रत्रया-
र्कारान्हि त्रत्रयंबुधगुरुशुक्राः अर्कःसूर्यः आरोभौमः एषामहःदिनं तस्मिन् ईज्यभृगूदये उदयेलग्ने ईज्यभृगोइतिईज्यभृगूदयं तस्मिन् गुरुशुक्रयुतेलग्नेइत्यर्थः
द्विकमदेषु इंदौ द्विद्वितीयं कंचतुर्थं मदःसप्तमं एषुचंद्रेसतीत्यर्थः अश्वीक्रिया क्रयविक्रयादिका हिताशुभकर्त्रीस्यात् अथाश्ववचक्रमाह तत्रापीति तत्रापिध्यादित्या
दिषुनक्षत्रेषुसत्स्वपिअर्कभतः सूर्यनक्षत्रात्सकाशात् क्रमात्तिथिमितैर्नक्षत्रैः पश्चादुत्क्रमतस्त्रिभिर्नक्षत्रैः साभिजिद्यथातथा अश्विनीक्रियाशस्ताशोभनास्यात् एवंसामान्यतोः
श्वकर्मोक्त्वेदानींविशेषमाह येति याअश्विक्रियानृसमामनुष्यसदृशासाक्रियातदुक्तभमुखैः कार्या तस्मैमनुष्यायउक्तानिभमुखानिनक्षत्रादीनितैः कार्येत्यर्थः परायान्नृस

ध्यादित्यद्विवस्रुस्थिराश्विभमृदुस्वात्यर्कभैर्ज्ञत्रयार्कारान्हीज्यभृगूदयेद्विकमदेष्विंदौक्रियाश्वीहिता ॥ तत्राप्यर्कभतः क्रमात्तिथि
मितैः पश्चात्त्रिभिः साभिजिच्छस्तायानृसमातदुक्तभमुखैः कार्यापरैर्भिर्बुधैः ॥ ९ ॥ भद्रासंक्रमपातवैधृतिसितेज्यार्कारषष्ठ्यादिषु

मानभवतिसाएभिः सामान्यैर्ध्यादित्यादिभिर्बुधैः कार्येत्यर्थः लग्नंप्रागवत् तथाचनारदः विविष्णुचरभेक्षिप्रेमृदुभेस्थिरभेषुच वाजिकर्माखिलंसूर्यवारेकार्यंविशेषत
इत्यादि तथाचोक्तं घृतान्नचणकक्षीरतृणमुद्गादिभक्षणे अन्नप्राशनवद्दृक्षंस्नानंसौम्यग्रहोदये चौलोक्तंक्षुरकर्मादौभेषजेभेषजोदितं गर्भाधानोक्तमश्वानांमैथुनेतु
विलोकयेत् गृहारंभोदितेकालेहयशालाविधीयते शिक्षाविद्योक्तकालेचभूषणंभूषणोदि[illegible] चर्मकर्मादिकंकार्यंजययोगेशुभोदये एवंखरोष्ट्रादिकंकार्यंपूर्वाण्हेवाह-
नादिकमिति ९ अथाभ्यंगनिषिद्धकालमाह भद्रेति भद्राप्रसिद्धा संक्रमःसंक्रांतिः [illegible]पातोव्यतीपातः वैधृतिःप्रसिद्धा सितःशुक्रवारः ईज्योगुरुवारः अर्कोरविवा
रः आरोभौमवारः षष्ठ्यादयःसर्वास्तिथयः तासु ६ ७ ८ ९ १० ११ १२ १३ १४ १५ ३० ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्राद्धाहः श्राद्धदिनं प्रतिपद्द्वयं प्रतिपद्द्वितीये तस्मिन्हेतुकारणंविना अभ्यंजनमभ्यंगः परिहरेत् कारणेसतिअवश्यंचरेदित्यर्थसिद्धं तथाचोक्तं सप्तम्यांनस्पृशेत्तै
लंनवम्यांप्रतिपत्तिथौ चतुर्दश्यामथाष्टम्यांषष्ठ्यांचैवविशेषतइति ग्रंथांतरे चतुर्दश्यष्टमी[illegible]वपौर्णमास्यर्कसंक्रमः तैलस्नानंनकुर्वीतस्वतबंधुधनक्षयाविति तथान्यद
